KUSUMAMÂLÂ

No. II.

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

1615-36 The Bangalore Press

KUSUMAMÂLÂ

OR

A COLLECTION OF CHOICE EXTRACTS FROM STANDARD SANSKRIT WRITERS IN PROSE AND VERSE.

No. II.

Designed for students preparing for the Matriculation Examination.

With Explanatory Notes.

BY

THE LATE

VAMAN SHIVRAM APTE, M. A.

EIGHTH EDITION

(Revised)

BY

M. S. APTE, B. A

Printed at the " Arya Vijaya Press, Budhwar Peth, Poona City, by Trimbak Sitaram Joshi.

and

PUBLISHED BY

P. R. SHIRALKAR & Co.

Budhwar Peth, POONA.

1914.

Price Rs: 1-4.

PREFACE TO THE FIRST EDITION.

The following pages have been intended to serve as a reading book for Sanskrit students preparing for the Matriculation Examination. They contain about 90 extracts taken from the well-known works of most of the renowned standard Sanskrit writers, beginning with Valmiki and ending with Jagannatha Pandita. The extracts are intended to give the student specimens of different styles and modes of thought, and will be found to display a variety of forms, descriptive, moral, didactic, narrative argumentative, epic, dramatic, lyric &c. Each extract has an intelligible beginning and an end, the subject treated therein being given in English at the commencement, and its source at the end. In selecting passages from different works I have had to abridge or condense them in several cases by leaving out single words or long compounds, or even several sentences or verses, where the omission could be made without impairing the beauty of the original or affecting the context or train of reasoning. It was found necessary to do so to prevent the extracts from being needlessly long, but in some cases even the passages so condensed became rather lengthy, and have, therefore, been divided into Parts.

The extracts have been divided into three Series, each Series being expected to be read in the class during one year. An attempt has been made to arrange extracts in each Series progressively but the order may in some cases have to be changed in a subsequent edition, if they be found to be too easy or difficult where they are at present. The passages in prose and verse are almost alternate, and miscellaneous verses have been added at the end of each Series, being intended to be learnt by heart by the student. In adapting stories, as in the tale of Purûravas

and Urvasi or of Savitri, I have tried to retain, as far as possible, the language of the original, making changes only where absolutely necessary. Dfficult words and expressions have been explained in the notes, but mere words have not been given, as Sanskrit English Dictionaries are now accessible to even the poorest student. Thus the bcok is intended to supply the want of a Sanskrit reading book hitherto felt by senior students in High Schools, and will, I hope, give them some familiarity with the styles and modes of thought of at least the more celebrated writers,

Any suggestion as to improvement &c, will be thankfnlly received,

Poona.
31st January, 1891 } V. S. APTE.

PREFACE TO THE SECOND EDITION.

This edition does not materially differ from the first. The only changes made are in the order of the lessons, the easiest ones being placed first. A few additional notes on points found to require explanation in the course of teaching have been added. The appendix given at the end of the first edition has been altogether omitted. The changes mentioned above were the only ones which the author intended to make in the second edition.

Dhulia,
3rd December, 1892. } M. S. APTE.

PREFACE TO THE THIRD EDITION.

The rapid sale of the first two editions has encouraged the Editor to give the public the third edition of this book and in doing so he has omitted such of the extracts as he thought difficult

for an ordinary student of Sanskrit to understand. He has also added a few more explantory notes in places where necessary for a clear elucidation of the text. It is hoped that this edition will receive that support which was accorded to the first two.

Dhulia, 1893. } M. S. APTE.

PREFACE TO THE FOURTH EDITION.

Nothing new has been done in this Edition, except that a few passages found to be difficult from experience have been omitted and a few more explanatory notes added.

Dhulia, 25th July 1901. } M. S. APTE.

PREFACE TO THE EIGHTH EDITION.

This edition differs materially from its immediate pre- lecessor, the 7th, in as much as poetical Extracts with a very few exceptions have been retained in their original form and length; this again being necessitated by the change made in the Univer- ity Matriculation Curriculum in Sanskrit which requires poetry lso. in addition to prose as before. It is thus hoped that the present Edition will exactly meet the requirements of the new tandard and continue to be as popular as ever, notwithstanding few mis-prints which in spite of every care on my part may unfortunately creep through owing to peculiar causes over which have no control. No apology is I think needed to explain he rather backward position which this edition has taken for easons explained above.

Satara, 7th March 1913. } M. S. APTE.

CONTENTS.

—:o:—

FIRST SERIES.

SECOND SERIES.

THIRD SERIES.

कुसुममाला.

प्रथमावलिः

FIRST SERIES.

I.

The three fishes.

कस्मिंश्चिज्जलाशयेऽनागतविधाता प्रत्युत्पन्नमतिर्यद्भविष्यश्चेति त्रयो
मत्स्याः सन्ति । अथ कदाचित्तं जलाशयं दृष्ट्वाऽऽगच्छद्भिर्मत्स्यजी-
विभिरुक्तं यदहो बहुमत्स्योऽयं ह्रदः कदाचिदपि नास्माभिरन्वेषितः ।
तदद्याहारवृत्तिः संजाता । संध्यासमयश्च संभूतस्ततः प्रभातेऽत्रा-
गन्तव्यमिति निश्चयः । अतस्तेषां तत्कुलिशपातोपमं वचः समा-
कर्ण्यानागतविधाता सर्वान्मत्स्यानाहूयेदमूचे । अहो श्रुतं भवद्भिर्य-
न्मत्स्यजीविभिरभिहितम् । तद्रात्रावपि किंचिद्गम्यतां समीपवर्ति सरः ।
यन्नूनं प्रभातसमये मत्स्यजीविनोऽत्र समागम्य मत्स्यसंक्षयं करिष्यन्ति ।
एतन्मम मनसि वर्तते । तन्न युक्तं सांप्रतं क्षणमप्यत्रावस्थातुम् ।
तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह । अहो सत्यमभिहितं भवता ।
ममाप्यभीष्टमेतत् । तदन्यत्र गम्यतामिति । उक्तं च

यस्यास्ति सर्वत्र गतिः स कस्मात्स्वदेशरागेण हि याति नाशम् ।
तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरुषाः पिबन्ति ॥१॥

अथ तत्समाकर्ण्य प्रोच्चैर्विहस्य यद्भविष्यः प्रोवाच । अहो न

भवद्भ्यां मंत्रितं सम्यगेतदिति । यतः किं वाङ्मात्रेणापि तेष
पितृपैतामहिकमेतत्सरस्त्यक्तुं युज्यते । तद्यद्यायुःक्षयोऽस्ति तदन्यत्र
गतानामपि मृत्युर्भविष्यत्येव । उक्तं च

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे विनश्यति ॥२॥

तदहं न यास्यामि । भवद्भ्यां च यत्प्रतिभाति तत्कार्यम् । अथ
तस्य तं निश्चयं ज्ञात्वानागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ सह
परिजनेन । अथ प्रभाते तैर्मत्स्यजीविभिर्जालैस्तज्जलाशयमालोड्य
यद्भविष्येण सह जलाशयो निर्मत्स्यतां नीतः । अतोऽहं ब्रवीमि

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥ ३ ॥

Panchatantra I.

II.

The vulture and the cat.

अथ भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटीवृक्षः । तस्
कोटरे दैवदुर्विपाकाद्गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति
अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात्किंचिदु
द्धृत्य ददति । तेनासौ जीवति । अथ कदाचिद्दीर्घकर्णनामा मार्जार
पक्षिशावकान्भक्षयितुं तत्रागतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकै
भयार्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेनोक्तं कोऽयमायाति

दीर्घकर्णो गृध्रमवलोक्य सभयमाह । हा हतोऽस्मि । अधुनास्य संनिधाने पलायितुमक्षमः । तद्यथा भवितव्यं तद्भवतु । तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि । इत्यालोच्याब्रवीत् । आर्य त्वामभिवन्दे । गृध्रोऽवदत् कस्त्वम् । सोऽवदत् । मार्जारोऽहम् । गृध्रो ब्रूते दूरमपसर । नो चेद्धन्तव्योऽसि मया । मार्जारोऽवदत् । श्रूयतां तावदस्मद्वचनम् । ततो यद्यहं वध्यस्तदा हन्तव्यः । यतः

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥ १ ॥

गृध्रो ब्रूते । ब्रूहि किमर्थमागतोऽसि । सोऽवदत् । अहमत्र गङ्गातीरे नित्यस्नायी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि । यूयं धर्मज्ञानरता विश्वासभूमय इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति । अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः । गृध्रोऽवदत् । मार्जारो हि मांसरुचिः । पक्षिशावकाश्चात्र निवसन्ति । तेनाहमेवं ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । ब्रूते च । मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम् । परस्परं विवदमानानामपि धर्मशास्त्राणामहिंसा परमो धर्म इत्यत्रैकमत्यम् । एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः ।

ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । येषामपत्यानि खादितानि तैः शोकार्तैर्विलपद्भिरितस्ततो

जिज्ञासा समारब्धा। तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः पलायितः। पश्चात्पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि। अनन्तरं त ऊचुः। अनेनैव जरद्गवेनास्माकं शावकाः खादिताः। इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः। अतोऽहं ब्रवीमि

अज्ञातकुलशीलस्य वासो देयो न कस्यचित्।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥ २ ॥

Hitopadesa I.

III.

An account of Mâlavikâ.

राजा–(चेट्यौ प्रति) के भवत्यौ का चेयम्।

प्रथमा– देव इयमावयोर्भर्तृदारिका।

राजा– कथमिव।

उभे– शृणोतु भर्ता। योऽसौ भर्त्रा विजयदण्डैर्विदर्भनाथं वशीकृत्य बन्धनान्मोचितः कुमारो माधवसेनो नाम तस्येयं कनीयसी भगिनी मालविका नाम।

देवी– अहो राजदारिकेयम्। चन्दनं खलु मया पादुकापरिभोगेण दूषितम्।

राजा– अथात्रभवती कथमिवेत्थंभूता।

मालविका–(निःश्वस्यात्मगतम्) विधेर्नियोगेन।

द्वितीया– भर्ता शृणोतु । दायादवशं गत आवयोर्भर्तृदारके माधवसेने तस्यामात्येनार्यसुमतिनास्मादृशं परिजनमुज्झित्वा गूढमपनीतैषा ।

राजा– श्रुतपूर्वं मयैतत् । ततस्ततः ।

उभे– एतावदेव । अतः परं न जानीवः ।

परिव्राजिका –अतः परमहं मन्दभागिनी कथयिष्यामि । माधवसेनसचिवं सुमतिं ममाग्रजमवगच्छ । स इमां तथागतभ्रातृकां मयासार्धमपवाह्य भवत्संबन्धापेक्षया पथिकसार्थं वैदिशगामिनमनुप्रविष्टः । स चाटव्यन्ते निविष्टो गताध्वा वणिग्जनोऽध्वश्रमार्तो विश्रमितुम् । ततश्च

तूणीरबन्धपरिणद्धभुजान्तरालमाकर्णलम्बिशिखिपिच्छकलापधारि ।
कोदण्डपाणि निनदत्प्रतिरोधकानामापातदुष्प्रसहमाविरभूदनीकम् ॥१॥

ततो मुहूर्तं बद्धयुद्धास्ते पराङ्मुखीकृतास्तस्करैः सार्थवाहयोद्धारः । ततः स मत्सोदर्यः

इमां परीप्सुर्दुर्जातेः पराभिभवकातराम् ।
भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः ॥ २ ॥

राजा– भगवति तनुभृतामीदृशी लोकयात्रा । शोचितव्यस्तत्रभवान्सफलीकृतभर्तृपिण्डः ।

परिव्राजिका– ततोऽहं मोहमुपागता यावत्संज्ञामुपलभे तावदियं दुर्लभदर्शना संवृत्ता । ततो भ्रातृशरीरमग्निसात्कृत्वा पुनर्नवीकृतवैधव्यदुःखया मया त्वदीयं देशमवतीर्येमे काषाये गृहीते ।

इयमप्याटविकेभ्यो वीरसेनं वीरसेनाद्देवीं गता देवीगृहे लब्धप्रवेशया मया पुनर्दृष्टा । इत्येतदवसानं कथायाः ।

धारिणी– भगवति त्वयाभिजनवतीं मालविकामनाचक्षाणया-सांप्रतं कृतम् ।

परिव्राजिका– शान्तं पापं शान्तं पापम् । कारणेन खलु मया नैभृत्यमवलम्बितम् । इयं पितरि जीवति केनापि सिद्धादेशेन साधुना मत्समक्षमादिष्टा संवत्सरमात्रं प्रेष्यभावमनुभूय ततः सदृश-भर्तृगामिनी भविष्यतीति । तमवश्यंभाविनमादेशमस्यास्त्वत्पादशुश्रूषया परिणमन्तमवेक्ष्य कालप्रतीक्षया मया तत्साधु कृतमिति पश्यामि ।

Mâlavikâgnimitra V.

IV.

Pârvatî practising penance.

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता ॥ १ ॥
इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥२॥
निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिसक्तमानसाम् ।
उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात् ॥ ३ ॥
मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्त्रिणः ॥ ४ ॥
इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात् ।

क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् ॥ ५ ॥
कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी ।
अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपःसमाधये ॥ ६ ॥
अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत् ॥७॥
विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम् ।
बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ॥ ८ ॥
यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ॥ ९ ॥
विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥१०॥
महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले ॥११॥
पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टिं हरिणाङ्गनासु च ॥१२॥
अतन्द्रिता सा स्वयमेव वृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ॥१३॥
अरण्यबीजाञ्जलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात्पुरः सखीनाममिमीत लोचने ॥१४॥
कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते ॥१५॥

विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथि ।
नवोटजाभ्यन्तरसंभृतानलं तपोवनं तच्च बभूव पावनम् ॥१६॥
यदा फलं पूर्वतपःसमाधिना न तावता लभ्यममंस्त काङ्क्षितम् ।
तदाऽनपेक्ष्य स्वशरीरमार्दवं तपो महत्सा चरितुं प्रचक्रमे ॥१७॥
क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत ।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च ॥१८॥
शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ॥१९॥
तथातितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ ।
अपाङ्गयोः केवलमस्य दीर्घयोः शनैः शनैः श्यामिकया कृतं पदम् ॥२०॥
निनाय साऽत्यन्तहिमोत्किरानिलाः सहस्यरात्रीरुदवासतत्परा ।
परस्पराक्रन्दिनि चक्रवाकयोः पुरो वियुक्ते मिथुने कृपावती ॥२१॥
स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः ॥२२॥
मृणालिकापेलवमेवमादिभिर्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ।
तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा ॥२३॥

Kumârasambhava V.

V.

A specimen of a letter.

स्वस्ति । यज्ञशरणात्सेनापतिः पुष्पमित्रो वैदिशस्थं पुत्रमायुष्मन्त-

मग्निमित्रं स्नेहात्परिष्वज्यानुदर्शयति । विदितमस्तु । योऽसौ राजसूययज्ञे दीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य संवत्सरोपावर्तनीयो निरर्गलस्तुरगो विसृष्टः स सिन्धोर्दक्षिणरोधसि चरन्नश्वानीकेन यवनानां प्रार्थितः । तत उभयोः सेनयोर्महानासीत्संमर्दः ।

ततः परान्पराजित्य वसुमित्रेण धन्विना ।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः ॥१॥

सोऽहमिदानीमंशुमतेव सगरपौत्रेण प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसंदर्शनायागन्तव्यमिति ।

Mâlavikâgnimitra V.

VI.

Yayâti with renovated youth.

यतिर्ययातिः संयातिरायातिर्वियतिः कृतिसंज्ञा नहुषस्य षट् पुत्रा महाबलपराक्रमा बभूवुः । यतिस्तु राज्यं नैच्छत् । ययातिस्तु भूभृदभवत् । उशनसश्च दुहितरं देवयानीं शर्मिष्ठां च वार्षपर्वणीमुपयेमे ।

यदुं च तुर्वसुं चैव देवयानी व्यजायत ।
द्रुह्युं चाणुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ १ ॥

काव्यशापाच्चाकालेनैव ययातिर्जरामवाप । प्रसन्नशुक्रवचनाच्च

जरां संक्रमयितुं ज्येष्ठं पुत्रं यदुमुवाच । त्वन्मातामहशापादियमकाले-नैव जरा मामुपस्थिता । तामहं तस्यैवानुग्रहाद्भवतः संचारयाम्येकं वर्षसहस्रं न तृप्तोऽस्मि विषयेषु । त्वद्वयसा विषयानहं भोक्तुमिच्छामि नात्रभवता प्रत्याख्यानं कर्तव्यमित्युक्तः स नैच्छत्तां जरामादातुम् । तं चापि पिता शशाप । त्वत्प्रसूतिर्न राज्यार्हा भविष्यतीति । अनन्तरं द्रुह्युं तुर्वसुमणुं च पृथिवीपतिर्जराग्रहाणार्थं स्वयौवनप्रदानाय च चोदयामास । तैरप्येकैकशः प्रत्याख्यातस्तांश्च शशाप । अथ शर्मिष्ठातनयं पूरुं तथैवाह । स चातिप्रवणमतिः प्रणम्य पितरं सबहुमानं महान्प्रसादोऽयमस्माकमित्यभिधाय जरां प्रतिजग्राह स्वकीयं च यौवनं पित्रे ददौ । सोऽपि च नवं यौवनमासाद्य धर्माविरोधेन यथाकामं यथाकालोपपन्नं यथोत्साहं विषयं चचार । सम्यक् प्रजापालनमकरोत् । विश्वाच्या सहोपभोगं भुक्त्वा कामानामन्तमवाप्स्यामीत्यनुदिनं तन्मनस्को बभूव । अनुदिनं चोपभोगतः कामानतीव रम्यान्मेने । ययातिरुवाच

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ २ ॥
यदा न कुरुते भावं सर्वभूतेषु पापकम् ।
समदृष्टेस्तदा पुंसः सर्वा एव सुखा दिशः ॥ ३ ॥
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
तां तृष्णां संत्यजन्प्राज्ञः सुखेनैवाभिपूर्यते ॥ ४ ॥
जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।

धनाशा जीविताशा च जीर्यतोपि न जीर्यतः ॥ ५ ॥
पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः
तथाप्यनुदिनं तृष्णा ममैतेष्वेव जायते ॥ ६ ॥
तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ॥
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥ ७ ॥
पूरोः सकाशादादाय जरां दत्त्वा च यौवनम् ।
राज्येऽभिषिच्य पूरुं च प्रययौ तपसे वनम् ॥ ८ ॥

Vishṇupurâṇa.

VII.

Introduction of Patralekhâ to Chandrâpîda.

अन्येद्युश्च स प्रभातसमय एव सर्वान्तःपुराधिकृतमवनिपतेः परमसंमतं कैलासनामानं कञ्चुकिनमायान्तमपश्यत् । स कृतप्रणामः समुपसृत्य क्षितितलनिहितदक्षिणकरो विज्ञापयामास । कुमार महादेवी विलासवती समाज्ञापयति । इयं खलु कन्यका महाराजेन पूर्वं कुलूतराजधानीमवजित्य कुलूतेश्वरदुहिता पत्रलेखाभिधाना बालिका सती बन्दीजनेन सहानीयान्तःपुरपरिचारिकामध्यमुपनीता । सा मया विगतनाथा राजदुहितेति च समुपजातस्नेहया दुहितृनिर्विशेषमियन्तं कालमुपलालिता संवर्धिता च । तदियमिदानीमुचिता भवतस्ताम्बूलकरङ्कवाहिनीति कृत्वा मया प्रेषिता । न चास्यामायुष्मता परिजनसामान्यदर्शिना भवितव्यम् । बालेव लालनीया । स्वचित्त-

वृत्तिरिव चापलेभ्यो निवारणीया । शिष्येव द्रष्टव्या । सुहृदिव सर्व विश्रम्भेष्वभ्यन्तरीकरणीया । दीर्घकालसंवर्धितस्नेहतया स्वसुतायामिव हृदयमस्यामस्ति मे । बलवानस्यां पक्षपातः । महाभिजनराजवंश-प्रसूता चार्हतीयमेवंविधानि कर्माणि । नियतं स्वयमेवेयमभिविनी-ततया कतिपयैरेव दिवसैः कुमारमाराधयिष्यति । केवलमतिचिरका-लोपचिता बलवती मे प्रेमवृत्तिरस्यामविदितशीलश्चास्याः कुमार इति संदिश्यते । सर्वथा तथा कल्याणिना प्रयतितव्यं यथेयमतिचिरमुचिता परिचारिका ते भवतीति । इत्यभिधाय विरतवचसि कैलासे कृताभि-जातप्रणामां पत्रलेखामनिमिषलोचनं सुचिरमालोक्य चन्द्रापीडो यथाज्ञापयत्यम्बैवमुक्त्वा कञ्चुकिनं प्रेषयायास ।

पत्रलेखा तु ततः प्रभृति दर्शनेनैव समुपजातसेवारसा न दिवा न रात्रौ न सुप्तस्य नासीनस्य नोत्थितस्य न भ्रमतो न राजकुल-गतस्य छायेव राजसूनोः पार्श्वं मुमोच । चन्द्रापीडस्यापि तस्यां दर्शनादारभ्य प्रतिक्षणमुपचीयमाना महती प्रीतिरासीत् । अभ्यधिकं च प्रतिदिवसमस्याः प्रसादमकरोत् । आत्महृदयादव्यतिरिक्तामिव चैनां सर्वविश्रम्भेष्वमन्यत ।

Kâdambarî.
(Page 100 B. S. S.)

VIII.

Atreyî and Vâsantî (a Sylvan deity).

(नेपथ्ये) स्वागतं तपोधनायाः ।

(प्रविश्य) अध्वगवेशा तापसी । अये वनदेवतेयं फलकुसुमपल्लवार्घ्येण मामुपातिष्ठते ।

(प्रविश्य) वनदेवता । (अर्घ्यं विकीर्य)

यथेच्छं भोग्यं वो वनमिदमयं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।
तरुच्छाया तोयं यदपि तपसो योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः ॥ १ ॥

ताप.– किमत्रोच्यते

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥

(इत्युपविशतः) ।

वन.– कां पुनरत्रभवतीमवगच्छामि ।

ताप.– आत्रेय्यस्मि ।

वन.– आत्रेयि कुतः पुनरिहागम्यते किं प्रयोजनं वा दण्डकारण्यप्रवेशे ।

आत्रे.– अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति ।
तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्यटामि ॥३॥

वन.– यदि तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणायोपासते तत्कोऽयमत्रार्याया दीर्घप्रवासः ।

आत्रे.– तत्र महानध्ययनप्रत्यूह इति दीर्घप्रवासोऽङ्गीकृतः ।

वन.– कीदृशः ।

आत्रे.– तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीतम् ।

वन.– अपि तयोर्नामसंविज्ञानमस्ति ।

आत्रे.– तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः ।

वन.– कीदृशः प्रभावः ।

आत्रे.– तयोः किल सरहस्यजृम्भकास्त्राण्याजन्मसिद्धानीति ।

वन.– अहो नु भोश्चित्रमेतत् ।

आत्रे.– तौ च भगवता वाल्मीकिना धात्रीकर्म वस्तुतः परिगृह्य पोषितौ परिरक्षितौ च । वृत्तचूडौ त्रयीवर्जमितरा विद्याः सावधानेन परिपाठितौ । समनन्तरं च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय तौ त्रयीविद्यामध्यापितौ । नह्येताभ्यामतिप्रदीप्तप्रज्ञाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति । यतः

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति च पुनर्भूयान्भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः ॥४॥

वन.— अयमसावध्ययनप्रत्यूहः ।

आत्रे.-- अपरश्च ।

वन.-- अथापरः कः ।

आत्रे.-- अथ स ब्रह्मर्षिरेकदा मध्यंदिनसमये नदीं तमसामनुप्रपन्नः । तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श । आकस्मिकप्रत्यवभासां च देवीं वाचमनुष्टुप्छन्दसा परिणतामभ्युदैरयत् ।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ ५ ॥ ।

वन.-- चित्रमाम्नायादन्योऽयं नूतनश्छन्दसामवतारः ।

आत्रे.--तेन खलु पुनः समयेन तं भगवन्तमाविर्भूतशब्दब्रह्मप्रकाशमृषिमुपसंगम्य भगवान्भूतभावनः पद्मयोनिरवोचत् । ऋषे प्रबुद्धोऽसि वागात्मनि ब्रह्मणि । तद् ब्रूहि रामचरितम् । अव्याहतज्योतिरार्षं ते चक्षुः प्रतिभातु । आद्यः कविरसीत्युक्त्वाऽन्तर्हितः । अथ भगवान्प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय ।

वन.-- हन्त तर्हि पण्डितः संसारः ।

आत्रे.– तस्मादवोचं तत्र महानध्ययनप्रत्यूह इति ।

वन.– युज्यते ।

आत्रे.– विश्रान्तास्मि भद्रे संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि ।

वन.– इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण ।

आत्रे.– (सबाष्पा) अप्येतत्तपोवनम् । अप्येषा पञ्चवटी । अपि सरिदियं गोदावरी । अप्ययं गिरिः प्रस्रवणः । अपि वनदेवता जनस्थानवासिनी वासन्ती त्वम् ।

वास.– अस्त्येतत्सर्वम् ।

आत्रे.– वत्से जानकि

स एष ते वल्लभबन्धुवर्गः प्रासङ्गिकीनां विषयः कथानाम् ।
त्वां नामशेषामपि दृश्यमानः प्रत्यक्षदृश्यामिव नः करोति ॥६॥

वास.– (सभयं स्वगतं) कथं नामशेषामित्याह । (प्रकाशम्) आर्ये किमत्याहितं सीतादेव्याः ।

आत्रे.– न केवलमत्याहितं सापवादमपि ।

वास.– कथमिव ।

आत्रे.– (कर्णे) एवमेवम् ।

वास.– अहह दारुणो दैवनिर्घातः । (इति मूर्च्छति) ।

आत्रे.– भद्रे समाश्वसिहि समाश्वसिहि ।

वास.– हा प्रियसखि । हा महाभागे । ईदृशस्ते निर्माणभागः। रामभद्र रामभद्र । अथवा अलं त्वया । आर्ये आत्रेयि । अथ तस्मादरण्यात्परित्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किं वृत्तमिति काचिदस्ति प्रवृत्तिः ।

आत्रे.– नहि नहि ।

वास.– हा कष्टमार्यारुन्धतीवशिष्ठाधिष्ठिते रघुकुलगृहे जीवन्तीषु च प्रवृद्धराज्ञीषु कथमिदं जातम् ।

आत्रे.– ऋष्यशृङ्गसत्रे गुरुजनस्तदाऽऽसीत् । संप्रति परिसमाप्तं तद् द्वादशवार्षिक सत्रम् । ऋष्यशृङ्गेण च संपूज्य विसर्जिता गुरवः । ततो भगवत्यरुन्धती नाहं वधूविरहितामयोध्यां गमिष्यामीत्याह । तदेव राममातृभिरनुमोदितम् । तदनुरोधाद्भगवतो वशिष्ठस्य परिशुद्धा वाचो यथा वाल्मीकितपोवनं गत्वा तत्र वत्स्याम इति ।

वास.– अथ स राजा किमारम्भः संप्रति ।

आत्रे.– तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः ।

वास.– अहह । धिक् परिणीतमपि ।

आत्रे.– शान्तं पापम् ।

वास.– का तर्हि यज्ञे सहधर्मचारिणी ।

आत्रे.– हिरण्मयी सीताप्रतिकृतिः ।

वास.– हन्त भोः ।

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥ ७ ॥

आत्रे.– विसृष्टश्च वामदेवानुमन्त्रितो मेध्योऽश्वः। उपकल्पिताश्च यथाशास्त्रं तस्य रक्षितारः। तेषामधिष्ठाता च लक्ष्मणात्मजश्चन्द्रकेतुर्दत्तदिव्यास्त्रसंप्रदायश्चतुरङ्गसाधनान्वितोऽनुप्रहितः।

वास.-- (सस्नेहकौतुकास्त्रं) कुमारलक्ष्मणस्यापि पुत्रः। हन्त मातर्जीवामि।

आत्रे.-- अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुक्षिप्य राजद्वारे सोरस्ताडनमब्रह्मण्यमुद्घोषितम्। ततो न राजापराधमन्तरेण प्रजास्वकालमृत्युश्चरतीत्यात्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत्

शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः।
शीर्षच्छेद्यः स ते राम तं हत्वा जीवय द्विजम्॥ ८॥

इत्युपश्रुत्य कृपाणपाणिः पुष्पकं विमानमारुह्य सर्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय जगत्पतिः संचरितुमारब्धवान्।

वास.-- शम्बूको नाम धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति। तदपि नाम रामभद्रः पुनरपीदं वनमलंकुर्यात्।

आत्रे.--भद्रे गम्यतेऽधुना।

Uttararámacharita II.

IX.

The Yaksha's abode.

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन

यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥ १ ॥

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥ २ ॥

तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गेहिन्या प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ ३ ॥

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥ ४ ॥

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्जावलयसुभगैर्नर्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ ५ ॥

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शंखपद्मौ च दृष्ट्वा ।

क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥६॥
गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ ७ ॥

Meghadûta.

X.

A foundling.

कदाचिद्वामदेवशिष्यः सोमदेवशर्मा नाम कंचिदेकं बालकं राज्ञः पुरो निक्षिप्याभाषत । देव रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धार्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि । स्थविरे का त्वम् । एतस्मिन्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसीति । वृद्धयाप्यभाषि । मुनिवर कालयवननाम्नि द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवरः कश्चिदस्ति । तन्नन्दिनीं नयनानन्दकारिणीं सुवृत्तां नामैतस्माद् द्वीपादागतो मगधनाथमन्त्रिसम्भवो रत्नोद्भवो नाम रमणीयगुणालयो भ्रान्तभूवलयो मनोहारी व्यवहार्युपयम्य सुवस्तुसंपदा श्वशुरेण संमानितोऽभूत् । कालक्रमेण नताङ्गी गर्भिणी जाता । ततः सोदरविलोकनकुतूहलेन रत्नोद्भवः कथंचिच्छ्वशुरमनुनीय चपललोचनयानया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे । कल्लोलमालिकाभिहतः पोतः समुद्राम्भस्यमज्जत् । गर्भभरालसां ललनां धात्री-

भावेन कल्पिताहं कराभ्यामुद्वहन्ती फलकमेकमधिरुह्य दैवगत्या तीरभूमिमगमम् । सुहृज्जनपरिवृतो रत्नोद्भवस्तत्र निमग्नो वा केनोपायेन तीरमगमद्वा न जानामि । क्लेशस्य परां काष्ठामधिगता सुवृत्तास्मिन्नटवीमध्येऽद्य सुतमसूत । प्रसववेदनया विचेतना सा प्रच्छायशीतले तरुतले निवसति । विजने वने स्थातुमशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारोऽप्यानायीति । तस्मिन्नेव क्षणे वन्यो वारणः कश्चिददृश्यत । तं विलोक्य भीता सा बालकं निपात्य प्राद्रवत् । अहं समीपलतागुल्मके प्रविश्य परीक्षमाणोऽतिष्ठम् । निपतितं बालकं पल्लवकवलमिवाददति गजपतौ कण्ठीरवो भीमरवो महाग्रहेण न्यपतत् । भयाकुलेन दन्तावलेन झटिति वियति समुत्पात्यमानो बालको न्यपतत् । चिरायुष्मत्तया स चोन्नततरुशाखासमासीनेन वानरेण केनचित्पक्वफलबुद्ध्या परिगृह्य फलेतरतया विततस्कन्धमूले निक्षिप्तोऽभूत् । सोऽपि मर्कटः क्वचिदगात् । बालकेन सत्त्वसंपन्नतया सकलक्लेशसहेनाभावि । केसरिणा करिणं निहत्य कुत्रचिदगामि । लतागृहान्निर्गतोऽहमपि तेजःपुञ्जं बालकं शनैरवनीरुहादवतार्य वनान्तरे वनितामन्विष्याविलोक्यैनमानीय गुरवे निवेद्य तन्निदेशेन भवन्निकटमानीतवानस्मीति । सर्वेषां सुहृदामेकदैवानुकूलदैवाभावेन महदाश्चर्यं बिभ्राणो राजा रत्नोद्भवः कथमभवदिति चिन्तयंस्तन्नन्दनं पुष्पोद्भवनामधेयं विधाय तद्वृत्तान्तं व्याख्याय सुश्रुताय विषादसंतोषावनुभवंस्तदनुजतनयं समर्पितवान् ।

Dasakumaracharita.

XI.
An ideal king.

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ १ ॥
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥ २ ॥
व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥ ३ ॥
सर्वातिरिक्तसारेण सर्वतेजोभिभाविना ।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥ ४ ॥
आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥ ५ ॥
भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥ ६ ॥
रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥ ७ ॥
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥ ८ ॥
सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥ ९ ॥
तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥ १० ॥

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥ ११ ॥

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥ १२ ॥

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना ॥ १३ ॥

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥ १४ ॥

स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥ १५ ॥

दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥ १६ ॥

न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥ १७ ॥

द्वेष्योऽपि संमतः शिष्टस्तस्यार्त्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥ १८ ॥

तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथाहि सर्वे तस्यासन्परार्थैकफला गुणाः ॥ १९ ॥

स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामूर्वीं शशासैकपुरीमिव ॥ २० ॥

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥ २१ ॥
कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥ २२ ॥

Raghuvams'a, I.

XII.

Chandrápída requesting Mahâsvetâ to tell her story.

इति परिसमापिताहारां निर्वर्तितसन्ध्योचिताचारां शिलातले विश्रब्धमुपविष्टां निभृतमुपसृत्य नातिदूरे समुपविश्य मुहूर्तमिव स्थित्वा चन्द्रापीडः सविनयमवादीत् । भगवति त्वत्प्रसादप्राप्तिप्रोत्साहितेन कुतूहलेनाकुलीक्रियमाणो मानुषतासुलभो लघिमा बलादनिच्छन्तमपि मां प्रश्नकर्मणि नियोजयति । जनयति हि प्रभुप्रसादलवोऽपि प्रागल्भ्यमधीरप्रकृतेः । स्वल्पाप्येकदेशावस्थानकालकला परिचयमुत्पादयति । अणुरप्युपचारपरिग्रहः प्रणयमारोपयति । तद्यदि नातिखेदकरमिव ततः कथनेनात्मानमनुग्राह्यमिच्छामि । अतिमहत्खलु भवद्दर्शनात्प्रभृति मे कौतुकमस्मिन्विषये । कतरन्मरुतामृषीणां गन्धर्वाणां गुह्यकानामप्सरसां वा कुलमनुगृहीतं भगवत्या जन्मना । किमर्थं वास्मिन्कुसुमसुकुमारे नवे वयसि व्रतग्रहणम् । क्वेदं वयः क्वेदं तपः क्वेयमाकृतिः क्व चायं लावण्यातिशयः क्वेयमिन्द्रियाणामुपशान्तिः । तदद्भुतमिव मे प्रतिभाति । किंनिमित्तं वानेकसिद्धसाध्यसंबाधानि सुरलोकसुभगान्यपहाय दिव्याश्रमपदान्येकाकिनी वनमिदममानुषमधिवससि । अपनयतु

नः कौतुकमावेदयतु भवती सर्वमिदम्। इत्येवमभिहिता सा किमप्यन्तर्ध्यायन्ती तूष्णीं मुहूर्तमिव स्थित्वा निःश्वस्य स्थूलस्थूलैरश्रुभिरामीलितलोचना निःशब्दं रोदितुमारेभे।

तां च प्ररुदितां दृष्ट्वा चन्द्रापीडस्तत्क्षणमचिन्तयत्। अहो दुर्निवारता व्यसनोपनिपातानां यदीदृशीमप्याकृतिमनभिभवनीयामात्मीयां कुर्वन्ति। सर्वथा न कंचन न स्पृशन्ति शरीरधर्माणमुपतापाः। बलवती हि द्वन्द्वानां प्रवृत्तिः। इदमपरमधिकतरमुपजनितमतिमहन्मनसि मे कौतुकमस्या बाष्पसलिलपातेन। न ह्यल्पीयसा शोककारणेन क्षेत्रीक्रियन्त एवंविधा मूर्तयः। न हि क्षुद्रनिर्घातपाताभिहता चलति वसुधा। इति संवर्धितकुतुहलश्च शोकस्मरणहेतुतामुपगतमपराधिनमिवात्मानमवगच्छन्नुत्थाय प्रस्रवणादञ्जलिना मुखप्रक्षालनोदकमुपनिन्ये। सा तु प्रक्षाल्य लोचने वल्कलोपान्तेन वदनमपमृज्य दीर्घमुष्णं च निःश्वस्य शनैः प्रत्यवादीत्। राजपुत्र किमनेनातिनिर्घृणहृदयाया मम मन्दभाग्यायाः पापायाः जन्मनः प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेन श्रुतेन। तथापि यदि महत्कुतूहलं तत्कथयामि श्रूयताम्।

Kâdambarî.

XIII.

A contrast.

अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः ।
कुशः प्रवासस्थकलत्रवेशामदृष्टपूर्वां वनितामपश्यत् ॥ १ ॥
सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात्पुरहूतभासः ।
जेतुः परेषां जयशब्दपूर्वं तस्याञ्जलिं बन्धुमतो बबन्ध ॥ २ ॥
अथानपोढार्गलमप्यगारं छायामिवादर्शतलं प्रविष्टाम् ।
सविस्मयो दाशरथेस्तनूजः प्रोवाच पूर्वार्धविसृष्टतल्पः ॥ ३ ॥
लब्धान्तरा सावरणेऽपि गेहे योगप्रभावो न च लक्ष्यते ते ।
बिभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम् ॥ ४ ॥
का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते ।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥ ५ ॥
तमब्रवीत्सा गुरुणानवद्या या नीतपौरा स्वपदोन्मुखेन ।
तस्याः पुरः संप्रति वीतनाथां जानीहि राजन्नधिदेवतां माम् ॥ ६ ॥
वस्वौकसारामभिभूय साहं सौराज्यबद्धोत्सवया विभूत्या ।
समग्रशक्तौ त्वयि सूर्यवंश्ये सति प्रपन्ना करुणामवस्थाम् ॥ ७ ॥
विशीर्णतल्पाट्टशतो निवेशः पर्यस्तसालः प्रभुणा विना मे ।
विडम्बयत्यस्तनिमग्नसूर्यं दिनान्तमुग्रानिलभिन्नमेघम् ॥ ८ ॥
निशासु भास्वत्कलनूपुराणां यः संचरोऽभूदभिसारिकाणाम् ।
नदन्मुखोल्काविचितामिषाभिः स वाह्यते राजपथः शिवाभिः ॥ ९ ॥
आस्फालितं यत्प्रमदाकराग्रैर्मृदङ्गधीरध्वनिमन्वगच्छत ।

वन्यैरिदानीं महिषैस्तदम्भः शृङ्गाहतं क्रोशति दीर्घिकाणाम् ॥ १० ॥
वृक्षेशया यष्टिनिवासभङ्गा मृदङ्गशब्दापगमादलास्याः ।
प्राप्ता दवोल्काहतशेषबर्हाः क्रीडामयूरा वनबर्हिणत्वम् ॥ ११ ॥
सोपानमार्गेषु च येषु रामा निक्षिप्तवत्यश्चरणान्सरागान् ।
सद्यो हतन्यङ्कुभिरस्रादिग्धं व्याघ्रैः पदं तेषु निधीयते ते ॥ १२ ॥
चित्रद्विपाः पद्मवनावतीर्णाः करेणुभिर्दत्तमृणालभङ्गाः ।
नखाङ्कुशाघातविभिन्नकुम्भाः संरब्धसिंहप्रहृतं वहन्ति ॥ १३ ॥
कालान्तरश्यामसुधेषु नक्तमितस्ततो रूढतृणाङ्कुरेषु ।
त एव मुक्तागुणशुद्धयोऽपि हर्म्येषु मूर्छन्ति न चन्द्रपादाः ॥ १४ ॥
आवर्ज्य शाखाः सदयं च यासां पुष्पाण्युपात्तानि विलासिनीभिः ।
न्यवैः पुलिन्दैरिव वानरैस्ताः क्लिश्यन्त उद्यानलता मदीयाः ॥१५॥
रात्रावनाविष्कृतदीपभासः कान्तामुखश्रीवियुता दिवापि ।
तिरस्क्रियन्ते कृमितन्तुजालैर्विच्छिन्नधूमप्रसरा गवाक्षाः ॥ १६ ॥
बलिक्रियावर्जितसैकतानि स्नानीयसंसर्गमनाप्नुवन्ति ।
उपान्तवानीरगृहाणि दृष्ट्वा शून्यानि दूये सरयूजलानि ॥ १७ ॥
तदर्हसीमां वसतिं विसृज्य मामभ्युपेतुं कुलराजधानीम् ।
हित्वा तनुं कारणमानुषीं तां यथा गुरुस्ते परमात्ममूर्तिम् ॥ १८ ॥
तथेति तस्याः प्रणयप्रतीतः प्रत्यग्रहीत्प्राग्रहरो रघूणाम् ।
पूरप्यभिव्यक्तमुखप्रसादा शरीरबन्धेन तिरोबभूव ॥ १९ ॥

Raghuvams'a XVI.

———

XIV.

The heroic and fiery-tempered Asvatthâman.

Part I.

(ततः प्रविशत्युत्खातखड्गः कलकलमाकर्णयन्नश्वत्थामा)

अश्वत्थामा—महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकंदरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥ १ ॥

(विचिन्त्य) ध्रुवं गाण्डीविना सात्यकिना वृकोदरेण वा यौवनदर्पादतिक्रान्तमर्यादेन परिकोपितस्तातः समुल्लङ्घ्य शिष्यप्रियतामात्मसदृशभावमाचेष्टते । (पृष्ठतोऽवलोक्य) तदलमिदानीं मम रथप्रतीक्षयानया । सशस्त्रश्चास्मि सजलजलधरप्रभाभास्वरेण खड्गेन । यावत्समरभुवमवतरामि । (परिक्रम्य वामाक्षिस्पंदनं सूचयित्वा) आः कथं ममापि नामाश्वत्थाम्नः समरमहोत्सवप्रमोदनिर्भरस्य तातविक्रमदर्शनलालस्यानिमित्तानि समरगमनविघ्नमुत्पादयन्ति । भवतु । अवगच्छामि (सावष्टम्भं परिक्रम्याग्रतो विलोक्य) कथं रणभूमेः समन्तादपक्रामतां महान्नादोयं बलानाम् । हा धिक्कष्टम् कथमेते महारथाः कर्णादयोऽपि समरात्पराङ्मुखा भवति । कथं नु ताताधिष्ठितानामपि बलानामियमवस्था भवेत् । भवतु । एवं तावत् । भो भोः कौरवसेनासमुद्रवेलापरिपालनमहामहीधरा नरपतयः कृतं कृतं समरपरित्यागसा

यदि समरमपास्य नास्ति मृत्योर्भयमिति युक्तमितोऽन्यतः प्रयातुम् ।
अथ मरणमवश्यमेवजन्तोः किमिति मुधा मलिनं यशः कुरुध्वम् ॥२॥

अपि च ताते चापद्वितीये रणधुरां वहति को भयस्यावकाशः ।

(नेपथ्ये) कुतोऽद्यापि ते तातः ।

अश्वत्थामा– (श्रुत्वा) किं ब्रूथ । कुतोऽद्यापि ते तात इति । आः क्षुद्राः समरभीरवः कथमेवं प्रलपतां वः सहस्रधा न दीर्णमनया जिह्वया ।

दग्धुं विश्वं दहनकिरणैर्नोदिता द्वादशार्का
वाता वाता दिशि दिशि न वा सप्तधा सप्त भिन्नाः ॥
छन्नं मेघैर्न गगनतलं पुष्करावर्तकाद्यैः
पापं पापाः कथयत कथं शौर्यराशेः पितुर्मे ॥ ३ ॥

(ततः प्रविशति संभ्रान्तः सप्रहारः सूतः) ।

सूतः–परित्रायतां परित्रायतां कुमारः । (इति पादयोः पतति)

अश्वत्थामा–(विलोक्य) अये तातस्य सारथिरश्वसेनः । आर्य त्रैलोक्यत्राणक्षमस्य सारथिरसि । किं मत्तः शिशुजनात्परित्राणमिच्छसि ।

सूतः–(उत्थाय सकरुणम्) कुमार कुतोऽद्यापि ते तातः ।

अश्वत्थामा–(सावेगम्) किं तातो नामास्तमुपगतः ।

सूतः–अथ किम् ।

अश्वत्थामा–हा तात हा सुतवत्सल हा लोकत्रयैकधनुर्धर ।

सूतः–कुमार अलमत्यन्तशोकावेगेन । वीरपुरुषोचितां विपत्तिमुपगते पितरि त्वमपि त्वदनुरूपेणैव वीर्येण शोकसागरमुत्तीर्य सुखी भव ।

अश्वत्थामा–(अश्रूणि विमुच्य) आर्य कथय कथय कथं तादृग्भुजवीर्यसागरस्तातोपि नामास्तमुपगतः ।

सूतः–(अश्रूणि विमुच्य) श्रूयताम् ।

अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्त्वा
स्वैरं शेषे गज इति किल व्याहृतं सत्यवाचा ।
तच्छ्रुत्वासौ दयिततनयः प्रत्ययात्तस्य राज्ञः
शस्त्राण्याजौ नयनसलिलं चापि तुल्यं मुमोच ॥ ४ ॥

अश्वत्थामा–हा तात हा सुतवत्सल हा वृथा मदर्थपरित्यक्तजीवित हा शौर्यराशे हा युधिष्ठिरपक्षपातिन् । (इति रोदिति)

सूतः--कुमार अलमत्यन्तपरिदेवनकार्पण्येन ।

अश्वत्थामा---(आकाशे) युधिष्ठिर युधिष्ठिर ।

आजन्मनो न वितथं भवता किलोक्तं
न द्वेक्षि यज्जनमतस्त्वमजातशत्रुः ।
ताते गुरौ द्विजवरे मम भाग्यदोषा-
त्सर्वं तदेकपद एव कथं निरस्तम् ॥ ५ ॥

(ततः प्रविशति सोद्वेगः कृपः) ।

सूतः--कुमार एष ते मातुलः शारद्वतः पार्श्वे तिष्ठति ।

अश्वत्थामा---(विलोक्य सबाष्पम्) मातुल क नु खलु स ते स्वसुः श्लाघ्यो भर्ता गतः ।

कृपः—वत्स परिगतपरिगन्तव्य एव भवान् । अलमत्यन्तशोकावेगेन ।

अश्वत्थामा--- मातुल परित्यक्तमेव मया परिदेवनम् । एषोऽहं सुतवत्सलं तातमेवानुगच्छामि ।

कृपः— वत्स अनुपपन्नमिदं भवद्विधानाम् ।

अश्वत्थामा—आर्य सत्यमेवेदम् । किं त्वतिदुर्वहत्वाच्छोकभारस्य न शक्नोमि तातविरहितः क्षणमपि प्राणान्धारयितुम् । तद्गच्छामि तमेवोद्देशं यत्र तादृशमपि पितरं द्रक्ष्यामि ।

(नेपथ्ये) आचार्यस्य त्रिभुवनगुरोर्न्यस्तशस्त्रस्य शोकाद्

द्रोणस्याजौ नयनसलिलक्षालितार्द्राननस्य ।

मौलौ पाणिं पलितधवले न्यस्य कृत्वा नृशंसं

धृष्टद्युम्नः स्वशिबिरमयं याति सर्वे सहध्वम् ॥ ६ ॥

अश्वत्थामा—(सक्रोधं सकम्पं च कृपसूतौ दृष्ट्वा) किं नामेदम् ।

प्रत्यक्षमात्तधनुषां मनुजेश्वराणां

प्रायोपवेशसदृशव्रतमास्थितस्य ।

तातस्य मे पलितमौलिनिरस्तकाशे

व्यापारितं शिरसि शस्त्रमशस्त्रपाणेः ॥ ७ ॥

कृपः—वत्स एवं किल जनः कथयति ।

अश्वत्थामा-- किं तातस्य दुरात्मना परिभूष्टमभूच्छिरः ।

सूतः - (सभयम्) कुमार आसीदयं तस्य तेजोराशेर्नवः परिभवावतारः ।

अश्वत्थामा-- हा तात हा पुत्रप्रिय मम मन्दभागधेयस्य कृते शस्त्रपरित्यागात्तथाविधेन क्षुद्रेणात्मा परिभावितः । अथवा

परित्यक्ते देहे रणशिरसि शोकान्धमनसा
शिरः श्वा काको वा द्रुपदतनयो वा परिमृशेत् ।
स्फुरद्दिव्यास्त्रौघद्रविणमदमत्तस्य च रिपो-
र्मयैवायं पादः शिरसि निहितस्तस्य न करः ॥ ८ ॥

आ दुरात्मन्पाञ्चालापसद
तातं शस्त्रग्रहणविमुखं निश्चयेनोपलभ्य
त्यक्त्वा शङ्कां खलु विदधतः पाणिमस्योत्तमाङ्गे
अश्वत्थामा करधृतधनुः पाण्डुपाञ्चालसेना-
तूलोत्क्षेपप्रलयपवनः किं न यातः स्मृतिं ते ॥ ९ ॥

अहो युधिष्ठिर । युधिष्ठिर । अजातशत्रो । अमिथ्यावादिन् । धर्मपुत्र । सानुजस्य ते किमनेनापकृतम् । अथवा किमनेनालीकप्रकृतिजिह्मचेतसा । अर्जुन सात्यके वृकोदर माधव युक्तं नाम भवतां सुरासुरमनुजलोकैकधनुर्धरस्य द्विजन्मनः परिणतवयसः सर्वाचार्यस्य विशेषतो मम पितुरमुना द्रुपदकुलकलङ्केन स्पृशमानमुत्तमाङ्गमुपेक्षितुम् । अथवा सर्व एवैते पातकिनः । किमेतैः ।

कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥ १० ॥

कृपः— वत्स किं न संभाव्यते भारद्वाजतुल्ये बाहुशालिनि दिव्या-स्त्रग्रामकोविदे भवति ।

अश्वत्थामा— सूत गच्छ । सर्वोपकरणैः सांग्रामिकैः सर्वायु-धैरुपेतमस्मत्स्यन्दनमुपनय ।

सूतः— यदाज्ञापयति कुमारः । (इति निष्क्रान्तः) ।

कृपः— वत्स । अवश्यप्रतिकर्तव्येऽस्मिन्दारुणे परिभवाग्नौ सर्वेषा-मस्माकं कोऽन्यस्त्वामन्तरेण शक्तः प्रतिकर्तुम् ।

अश्वत्थामा— किमतः परम् ।

कृपः— सैनापत्येऽभिषिक्तं भवन्तमिच्छामि समरभुवमतारयितुम्

अश्वत्थामा— मातुल परतन्त्रमिदमकिंचित्करं च ।

कृपः— वत्स न खलु परतन्त्रं नाकिंचित्करं च । पश्य

अवेदभीष्ममद्रोणं धृतराष्ट्रबलं कथम् ।
यदि तत्तुल्यकर्मात्र भवान्धूर्यो न युज्यते ॥ ११ ॥

कृतपरिकरस्य भवादृशस्य त्रैलोक्यमपि न क्षमं परिपन्थीभवितुं किं पुनर्युधिष्ठिरबलम् । तदेवं मन्ये । परिकल्पिताभिषेकोपकरणः कौरवराजो न चिरात्त्वामेवाभ्युदीक्षमाणस्तिष्ठतीति ।

अश्वत्थामा– यद्येवं त्वरते मे परिभवानलदह्यमानमिदं चेतस्तत्प्रतीकारजलावगाहनाय । तदहं गत्वा तातवधविषण्णमानसं कुरुपतिं सैनापत्यस्वयंग्रहणप्रणयसमाश्वासनया मन्दसन्तापं करोमि ।

कृपः– वत्स एवमिदम् । अतस्तमेवोद्देशं गच्छावः ।

(इति परिक्रामतः)

Venisamhâra III.

XV.

The heroic and fiery-tempered Asvatthâman.

Part II.

(ततः प्रविशतः कर्णदुर्योधनावासनस्थौ)

दुर्योधन– अङ्गराज

तेजस्वी रिपुहतबन्धुदुःखपारं
बाहुभ्यां व्रजति धृतायुधप्लवाभ्याम् ।
आचार्यः सुतनिधनं निशम्य संख्ये
किं शस्त्रग्रहसमये विशस्त्र आसीत् ॥ १ ॥

अथवा सूक्तमिदमभियुक्तैः प्रकृतिर्दुस्त्यजेति । यतः शोकान्धचेतसा तेन विमुच्य क्षत्रधर्मकार्कश्यं द्विजातिसुलभो मार्दवपरिग्रहः कृतः ।

कर्णः– राजन्कौरवेश्वर न खल्विदमेवम् ।

दुर्यो.–कथं तर्हि ।

कर्णः–एवं किल द्रोणस्याभिप्राय आसीद्यथाश्वत्थामा मया

पृथिवीराज्येऽभिषेक्तव्य इति । तस्याभावाद्वृद्धस्य मे ब्राह्मणस्य वृथा शस्त्रग्रहणमिति तथा कृतवान् ।

दुर्यो.– (सशिरःकम्पम्) एवमिदम् ।

कर्णः–एतदर्थं च कौरवपाण्डवपक्षपातप्रवृत्तमहासंग्रामस्य राजकस्य परस्परक्षयमुपेक्षमाणेन तेन प्रधानपुरुषवध उपेक्षा कृता ।

दुर्यो.–उपपन्नमिदम् ।

कर्णः–न चायं ममैकस्याभिप्रायः । अन्येऽभियुक्ता अपि नैवेदमन्यथा मन्यन्ते ।

दुर्यो.–एवमेतत् । कः संदेहः ।

दत्त्वाभयं सोऽतिरथी वध्यमानं किरीटिना ।
सिन्धुराजमुपेक्षेत नैवं चेत्कथमन्यथा ॥ २ ॥

(तत उपसर्पतः कृपाश्वत्थामानौ)

दुर्यो.– (दृष्ट्वा) अये कथं कृपोऽश्वत्थामा च । (आसनादवतीर्य) गुरो अभिवादये । (अश्वत्थामानं प्रति) आचार्यपुत्र एहि परिष्वजस्व माम् ।

(आलिङ्ग्य पार्श्वे उपवेशयति । अश्वत्थामा बाष्पमुत्सृजति) ।

कर्णः– द्रौणायने अलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम् ।

दुर्यो.– आचार्यपुत्र को विशेष आवयोरस्मिन्व्यसनार्णवे । पश्य-

तातस्तव प्रणयवान्स पितुः सखा मे
शस्त्रे यथा तव गुरुः स तथा ममापि ।

किं तस्य देहनिधने कथयामि दुःखं
जानीहि तद्गुरुशुचा मनसा त्वमेव ॥ ३ ॥

अश्व.– राजन्नेवं पक्षपातिनि त्वयि युक्तमेव शोकभारो लघूकर्तुम्। किं तु–

मयि जीवति मत्तातः केशग्रहमवाप्तवान्।
कथमन्ये करिष्यन्ति पुत्रेभ्यः पुत्रिणः स्पृहाम् ॥ ४ ॥

कर्णः– द्रौणायने किमत्र क्रियते यदा तेनैव सर्वपरिभवत्राणहेतुना शस्त्रमुत्सृजतैतादृशीमवस्थामात्मा नीतः।

अश्व.– अङ्गराज किमाह भवान् किमत्र क्रियत इति। श्रूयतां यत्क्रियते।

यो यः शस्त्रं बिभर्ति स्वभुजगुरुबलः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥ ५ ॥

दुर्यो.– आचार्यपुत्र तस्य तथाविधस्यानन्यसाधारणस्य ते वीरभावस्य किमन्यत्सदृशम्।

कृपः–राजन्सुमहान्खलु द्रोणपुत्रेण वोढुमध्यवसितः समरभारः। तदहमेवं मन्ये। भवता कृतपरिकरोऽयमुच्छेत्तुं लोकत्रयमपि समर्थः। किं पुनर्युधिष्ठिरबलम्। अतोभिषिच्यतां सैनापत्ये।

दुर्यो.– सुष्ठु युज्यमानमभिहितं युष्माभिः। किं तु प्राक्प्रतिपन्नोयमर्थोऽङ्गराजस्य।

कृपः— राजन्—असदृशपरिभवशोकसागरे निमज्जन्तमेनमङ्गराजस्यार्थे नैवोपेक्षितुं युक्तम्। अस्यापि च तदेवारिकुलमनुशासनीयम्। अतः किमस्य पीडा न भविष्यति।

अश्व.— राजन्कौरवेश्वर किमद्यापि युक्तायुक्तविचारणया

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा-
मकेशवमपाण्डवं भुवनमद्य निःसोमकम्।
इयं परिसमाप्यते रणकथाद्य दोःशालिना
व्यपैतु नृपकाननातिगुरुरद्य भारो भुवः ॥ ६ ॥

कर्णः—द्रोणात्मज वक्तुं सुकरमिदमध्यवसितुं दुष्करम्। बहवः कौरवबलेऽस्य कर्मणः शक्ताः।

अश्व.—अङ्गराज एवम्। बहवः कौरवबले शक्ताः। किं तु दुःखोपहतः शोकावेशाद्ब्रवीमि। न पुनर्वीरजनाधिक्षेपेण।

कर्णः— मूढ दुःखितस्याश्रुपातः कुपितस्य चायुधद्वितीयस्य संग्रामावतरणमुचितम्। नैवंविधाः प्रलापाः।

अश्व.— (सक्रोधम्) अरेरे राधागर्भभारभूत सूतापसद किमेवमाक्षिपसि।

कर्णः— सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् ॥ ७ ॥

अश्व.— किमाह भवान्। ममापि नामाश्वत्थाम्नो दुःखितस्याश्रुभिः प्रतिक्रियामुपादिशसि न शस्त्रेण।

निर्वीर्यं गुरुशापभाषितवशात्किं मे तवेवायुधं
संप्रत्येव भयाद्विहाय समरं प्राप्तोऽस्मि किं त्वं यथा ।
जातोऽहं स्तुतिवंशकीर्तनविदां किं सारथीनां कुले
क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्त्रेण नास्त्रेण किम् ॥ ८ ॥

कर्णः---(सक्रोधम्) अरेरे वाचाट वृथाशस्त्रग्रहणदुर्विदग्ध बटो
निर्वीर्यं वा सवीर्यं वा मया नोत्सृष्टमायुधम् ।
यथा पाञ्चालभीतेन पित्रा ते बाहुशालिना ॥ ९ ॥

अश्व.--(सक्रोधम्) अरे रथकारकुलकलङ्क राधागर्भभारभूत आयुधानभिज्ञ तातमप्यधिक्षिपसि । अथवा

स भीरुः शूरो वा प्रथितभुजसारस्त्रिभुवने
कृतं यत्तेनाजौ प्रतिदिनमियं वेत्ति वसुधा ।
परित्यक्तं शस्त्रं कथमिति स सत्यव्रतधरः
पृथासूनुः साक्षी त्वमसि रणभीरो क्व नु तदा ॥ १० ॥

कर्णः-- (विहस्य) एवं भीरुरहम् । त्वं पुनर्विक्रमैकरसः । तव पितरमनुस्मृत्य महान्मे संशयो जातः । अपि च रे मूढ

यदि शस्त्रमुज्झितमशस्त्रपाणयो न निवारयन्ति किमरीनुदायुधान् ।
यदनेन मौलिदलनेप्युदासितं सुचिरं स्त्रियेव नृपचक्रसंनिधौ ॥११॥

अश्व.--(सक्रोधं सकंपं च) दुरात्मन् राजवल्लभप्रगल्भ सूतापसद असम्बद्धप्रलापिन्--

कथमपि न निषिद्धो दुःखिना भीरुणा वा
द्रुपदतनयपाणिस्तेन पित्रा ममाद्य ।

तव भुजबलदर्पध्मायमानस्य वामः

शिरसि चरण एष न्यस्यते वारयैनम् ॥ १२ ॥

(इति तथा कर्तुमुत्तिष्ठति)।

कृपदुर्योधनौ– गुरुपुत्र मर्षय मर्षय (इति वारयतः) ।

(अश्वत्थामा चरणप्रहारं नाटयति) ।

कर्णः– (सक्रोधमुत्थाय खड्गमाकृष्य) अरे दुरात्मन् ब्रह्मबन्धो आत्मश्लाघिन्

जात्या काममवध्योसि चरणं त्विदमुद्धृतम् ।

अनेन लूनं खड्गेन पतितं वेत्स्यसि क्षितौ ॥ १३ ॥

अश्व.– अरे मूढ जात्या चेदवध्योऽहमियं सा जातिः परित्यक्ता ।

(इति यज्ञोपवीतं छिनत्ति) ।

अद्य मिथ्याप्रतिज्ञोसौ किरीटी क्रियते मया ।

शस्त्रं गृहाण वा त्यक्त्वा मौलौ वा रचयाञ्जलिम् ॥ १४ ॥

(उभावपि खड्गमाकृष्यान्योन्यं प्रहर्तुमुद्यतौ) ।

दुर्यो.– आचार्यपुत्र शस्त्रग्रहणेनालम् ।

कृपः– वत्स सूतपुत्र शस्त्रग्रहणेनालम् ।

अश्व.– मातुल मातुल किं निवारयसि । अयमपि तातनिन्दाप्रगल्भः सूतापसदो धृष्टद्युम्नपक्षपात्येव ।

कर्णः– राजन्न खल्वहं निवारयितव्यः ।

उपेक्षितानां मन्दानां धीरसत्त्वैरवज्ञया ।

अत्रासितानां क्रोधान्धैर्भवत्येषा विकत्थना ॥ १५ ॥

दुर्यो.– कर्ण गुरुपुत्र कोऽयमद्य युवयोर्व्यामोहः ।

कृप:– वत्स अन्यदेव प्रस्तुतमन्यत्रावेग इति कोयं व्यामोहः । स्वबलव्यसनं चेदमस्मिन्काले राजकुलस्यास्य युष्मत्त एव भवतीति वामः पन्थाः ।

अश्व.– मातुल न लभ्यतेऽस्य कटुप्रलापिनो रथकारकुलकलङ्कस्य दर्पः शादयितुम् ।

कृप:– वत्स अकालः खलु स्वबलप्रधानविरोधस्य ।

अश्व.– मातुल यद्येयं—

अयं पापो यावन्न निधनमुपेयादरिशरैः
परित्यक्तं तावत्प्रियमपि मयास्त्रं रणमुखे ।
बलानां नाथेऽस्मिन्परिकुपितभीमार्जुनभये
समुत्पन्ने राजा प्रियसखममुं वेत्तु समरे ॥ १६ ॥

(इति खड्गमुत्सृजति) ।

कर्णः—(विहस्य) अपरित्यक्तमपि भवादृशैरायुधं ननु चिरपरित्यक्तमेव निष्फलत्वात् ।

धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम तत्केन सेत्स्यति ॥ १७ ॥

Venisambâra III.

———

XVI.

Aja's lamentation on the death ot his wife.

विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥ १ ॥

कुसुमान्यपि गात्रसंगमात्प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः ॥ २ ॥
अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः ।
हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता ॥ ३ ॥

स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ॥ ४ ॥
अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा ।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ॥ ५ ॥

कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि ।
कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ॥ ६ ॥
मनसापि न विप्रियं मया कृतपूर्वं तव किं जहासि माम् ।
ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबन्धना रतिः ॥ ७ ॥
कुसुमोत्खचितान्वलीभृतश्चलयन्भृङ्गरुचस्तवालकान् ।
करभोरु करोति मारुतस्त्वदुपावर्तनशङ्कि मे मनः ॥ ८ ॥
तदपोहितुमर्हसि प्रिये प्रतिबोधेन विषादमाशु मे ।
ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधिः ॥ ९ ॥

इदमुच्छ्वसितालकं मुखं तव विश्रान्तकथं दुनोति माम् ।
निशि सुप्तमिवैकपङ्कजं विरताभ्यन्तरषट्पदस्वनम् ॥ १० ॥

शशिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्रिणम् ।
इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः ॥ ११ ॥

नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितम् ।
तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम् ॥ १२ ॥

कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतम् ।
पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमाः ॥ १३ ॥

त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया ।
विरहे तव मे गुरुव्यथं हृदयं न त्ववलम्बितुं क्षमाः ॥ १४ ॥

मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ ।
अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसांप्रतम् ॥ १५ ॥

कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति ।
अलकाभरणं कथं नु तत्तव नेष्यामि निवापमाल्यताम् ॥ १६ ॥

स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभम् ।
अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे ॥ १७ ॥

तव निःश्वसितानुकारिभिर्बकुलैरर्धचितां समं मया ।
असमाप्य विलासमेखलां किमिदं किंनरकण्ठि सुप्यते ॥ १८ ॥

समदुःखसुखः सखीजनः प्रतिपच्चन्द्रनिभोऽयमात्मजः ।
अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ॥ १९ ॥

धृतिरस्तमिता रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः ।
गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ॥ २० ॥
गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥ २१ ॥
मदिराक्षि मदाननार्पितं मधु पीत्वा रसवत्कथं नु मे ।
अनुपास्यसि बाष्पदूषितं परलोकोपनतं जलाञ्जलिम् ॥ २२ ॥
विभवेऽपि सति त्वया विना सुखमेतावदजस्य गण्यताम् ।
अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रयाः ॥ २३ ॥
विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति ।
अकरोत्पृथिवीरुहानपि स्रुतशाखारसबाष्पदूषितान् ॥ २४ ॥
अथ तस्य कथंचिदङ्कतः स्वजनस्तामपनीय सुन्दरीम् ।
विससर्ज तदन्त्यमण्डनामनलायागुरुचन्दनैधसे ॥ २५ ॥
प्रमदामनु संस्थितः शुचा नृपतिः सन्निति वाच्यदर्शनात् ।
न चकार शरीरमग्निसात्सह देव्या न तु जीविताशया ॥ २६ ॥

Raghuvams'a VIII.

XVII.

Advice of S'ukanâsa to Chandrâpîda.

तात चन्द्रापीड विदितवेदितव्यस्याधीत सर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवाभानुभेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवमित्यतो विस्तरेणाभिधीयसे । गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महतीयं खल्वनर्थपरंपरा ।

सर्वाविनयानामेकैकमप्येषामायतनं किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका। तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु। भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगुणाः। अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य। गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानं नोद्वेगकरः प्रजागरः। विशेषेण तु राज्ञाम्। विरला हि तेषामुपदेष्टारः। अलीकाभिमानोन्मादकारीणि धनानि। राज्यविषविकारतन्द्राप्रदा राज्यलक्ष्मीः।

आलोकयतु तावल्लक्ष्मीमेव भवान्प्रथमम्। इयमनार्या लब्धापि दुःखेन परिपाल्यते। न परिचयं रक्षति। नाभिजनमीक्षते। न वैदग्ध्यं गणयति। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। न क्वचिन्निर्भरमाबध्नाति पदम्। यथा यथेयं दीप्यते तथा तथा कज्जलमलिनमेव कर्म केवलमुद्वमति न हि तं पश्यामि यो ह्यपरिचितयानया न निर्भरमूपगूढो यो वा न विप्रलब्धः। एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः सर्वाविनयाधिष्ठानतां च गच्छन्ति। तेषां दाक्षिण्यं प्रक्षाल्यते हृदयं मलिनीभवति सत्यवादितापह्रियते गुणाश्चोत्सार्यन्ते केचित्संपद्भिः प्रलो-

भ्यमाना रागावेशेन बाध्यमाना विह्वलतामुपयान्ति । आसन्नमृत्यव इव बन्धुजनमपि नाभिजानन्ति । अदूरदर्शिनः पापेनेवाध्मातमूर्तयो भवन्ति । तदवस्थाश्च व्यसनशतशरव्यतामुपगताः पतितमप्यात्मानं नावगच्छन्ति । अपरे तु स्वार्थनिष्पादनपरैर्धूर्तं विनोद इति प्रमत्तता शौर्यमिति स्वच्छन्दता प्रभुत्वमिति दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वयमपि हसद्भिः प्रतारणकुशलैर्धूर्तैः स्तुतिभिः प्रतार्यमाणाः सर्वजनस्योपहास्यतामुपयान्ति । दृष्टिपातमप्युपकारपक्षे स्थापयन्ति । स्पर्शमपि पावनमाकलयन्ति । मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यो नाभिवादयन्त्यभिवादनार्हान्नाभ्युत्तिष्ठंति गुरून् । जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम् । आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय कुप्यन्ति हितवादिने । सर्वथा तमभिनन्दन्ति तं पार्श्वे कुर्वन्ति तं बहु मन्यन्ते तमाप्ततामापादयन्ति योऽहर्निशमुपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति यो वा माहात्म्यमुद्भावयति । तदेवंप्राये राज्यतन्त्रेऽस्मिन्महामोहकारिणि च यौवने कुमार तथा प्रयतेथा यथा नोपहस्यसे जनैर्नोपालभ्यसे सुहृद्भिर्न प्रहस्यसे विटैर्नावलुप्यसे सेवकवृकैर्न प्रलोभ्यसे वनिताभिर्नोन्मत्तीक्रियसे मदनेन नाक्षिप्यसे विषयैर्न विकृष्यसे रागेण नापह्रियसे सुखेन । कामं भवान्प्रकृत्यैव धीरः पित्रा च महता प्रयत्नेन समारोपितसंस्कारस्तरलहृदयमप्रतिबुद्धमेव मादयन्ति धनानि । तथापि भवद्गुणसंतोषो मामेवं मुखरीकृतवान् । इदमेव च पुनः पुनरभिधीयसे विद्वांसमपि धीरमप्यभिजातमपीयं दुर्विनीता खलीकरोति लक्ष्मीरिति । सर्वथा पित्रा क्रियमाणम-

नुभवतु भवान्यौवराज्याभिषेकमनेकमङ्गलम् । कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम् । अवनमय द्विषतां शिरांसि । उन्नमय बन्धुवर्गम् । अयं च ते कालः प्रतापमारोपयितुम् । आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति । इत्येतावदभिधायोपशशाम ।

Kâdambarî.

XVIII.

The tale of Pûruravas and Urvasi.

Part I.

पुरा किल सोमकुलावतंसः पुरूरवा नाम राजा बभूव । स एकदा सूर्योपस्थानान्निवर्तमानः परित्रायतां परित्रायतां यः सुरपक्षपाती यस्य वाम्बरतले गतिरस्तीति करुणं क्रन्दन्तमप्सरसां गणं ददर्श । ता अभ्युपेत्य प्रोवाच च । अलमलमाक्रन्दितेन । कथ्यतां कुतो भवत्यः परित्रातव्या इति । तासामेकतमा मेनका नाम प्रत्युवाच । शृणोतु महाराजः । या तपोविशेषपरिशङ्कितस्य महेन्द्रस्य सुकुमारं प्रहरणं रूपगर्वितायाः श्रियः प्रत्यादेशः स्वर्गस्य चालङ्कारः सा नः प्रियसख्युर्वशी कुबेरभवनात्प्रतिनिवर्तमाना समापत्तिदृष्टेन केशिना दानवेन चित्रलेखाद्वितीया बन्दिग्राहं गृहीता । तद्रस्मादसुरावलेपाद्वयं परित्रातव्या इति । तच्छ्रुत्वा पूर्वोत्तरेण दिग्भागेन गतः स जाल्मो दानव इति च विज्ञायैशानीं दिशं प्रत्यश्वांश्चोदयितुं सूतमादिश्य राजा ता अप्सरसः सान्त्वयन्प्रोवाच । विमुच्यतां विषादो यतिष्ये वः सखीप्रत्या-

नयनाय । इत्युक्त्वा महता रथवेगेन तं मघोनोऽपकारिणमसुरमासादयितुं गते पुरूरवसि ताः सर्वाः हेमकूटशिखरे तदागमनं प्रतिपालयन्त्यस्तस्थुः। अत्रान्तरे राजापि केशिनं पराभूय तद्धस्ताच्चित्रलेखाद्वितीयामुर्वशीमाच्छिद्याजगाम । उर्वशी सुरारिसंभवेन भयेन बलवत्परित्रस्ता कंचित्कालं प्रकृतिं नापद्यत । किं तु नातिचिराद्रोधःपतनकलुषां प्रसादं गृह्णतीं गङ्गामिव मोहेन मुच्यमानां प्रियसखीमवलोक्य चित्रलेखोवाच । सखि विश्रब्धा भव । पराभूताः खलु त्रिदशपरिपन्थिनो हताशाः । तच्छ्रुत्वा चक्षुषी उन्मील्योर्वशी सखीं पप्रच्छ किं महेन्द्रेणेति । न महेन्द्रेण महेन्द्रसदृशानुभावेनानेन राजर्षिणेति सख्या कथिते सा राजानमवलोक्यात्मगतमाह । उपकृतं खलु दानवैः । राजापि तन्मनोहरं रूपं प्रेक्ष्य तद्गतमना नेयं तपस्विनो नारायणस्य मुनेः सृष्टिर्भवितुमर्हतीति निश्चिकाय । कुत्रेदानीं मे सखीजनो भवेदित्युर्वश्या पृष्टे राजा हेमकूटस्थिताभिः स्वसखीभिस्ते उभे संयोजयामास । ताः सर्वा अप्सरसः प्रत्यानीतां सखीं महाराजं चापरिक्षतमवलोक्य तं विजयेनावर्धापयन् । अत्रान्तरे चित्ररथो नाम गन्धर्वराजस्तदेव शैलशिखरमवततार। आगमनप्रयोजनं च पृष्टोऽकथयत् । वयस्य केशिना हृतामुर्वशीं नारदादुपश्रुत्य प्रत्याहरणार्थमस्याः शतक्रतुना गन्धर्वसेना समादिष्टा । ततो वयमन्तरा चारणेभ्यस्त्वदीयं जयोदाहरणं श्रुत्वा त्वामिहस्थमुपागताः स भवानिमां पुरस्कृत्य सहास्माभिर्मघवन्त द्रष्टुमर्हति । महत्खलु तत्रभवतो मघोनः प्रियमनुष्ठितं भवतेति । राजा प्रत्युवाच । मैवं ननु वज्रिण एव वीर्यमेतद्यदस्य पक्ष्या द्विषतो विजयन्ते । वसुधाधर-

कन्दराभिसर्पी हरेः प्रतिशब्दोऽपि नागान् हिनस्ति । तथापि नाय-मवसरो मम शतक्रतुं द्रष्टुं त्वमेवात्रभवतीं प्रभोरन्तिकं प्रापयेति । तथेत्युक्त्वा चित्ररथः सह सर्वाभिरप्सरोभिः प्रस्थितः । उर्वशी तु राजर्षिमामन्त्रयितुमशक्नुवती चित्रलेखामुखेन महाराजेनाभ्यनुज्ञातेच्छामि प्रियसखीमिव महाराजस्य कीर्तिं महेन्द्रलोकं नेतुमिति राजानं विज्ञापयामास । तेनानुज्ञाता च लताविटप एकावली लग्ना इति सव्याजं तां मोचयितुं सखीमभ्यर्थ्य राजानमेवावलोकयन्ती सनिःश्वासं निष्क्रान्ता ।

राजा तु तां सुरसुन्दरीं गतामवलोक्य मदनशरपीडितस्तस्याः कृते भृशमुत्कण्ठितोऽभूत् । तां तस्यावस्थां दृष्ट्वा तस्य देवी काशीराजपुत्र्यौशीनरी नाम तस्य शून्यहृदयत्वस्य कारणं राज्ञः प्रियवयस्यान्माणवकाद्विज्ञातुं निपुणिकां नाम स्वचेटीमाज्ञापयामास । यथार्थनाम्नी सा निपुणिकाऽतिविदग्धतया भर्तृरहस्यदुर्गभेदनं कृतवती । ततो राजा रहस्यनिक्षेपरक्षणविषये माणवकेन समाश्वासित उर्वशीगतामेव कथां कुर्वन्वयस्येन सहोत्कण्ठाविनोदनार्थं प्रमदवनं प्रविवेश । किं तु वसन्तावतारसूचकं तदभिरामत्वमवलोक्य संजाताधिकतरोत्कण्ठः कुत्रापि धृतिं न लेभे । तस्माद्वयस्यमाह । कोऽप्युपायस्तावच्चिन्त्यतां येन सफलप्रार्थनो भवेयमिति । यावन्माणवकः समाधिमास्थायोपायं चिन्तयति तावदाकाशयानेन चित्रलेखासहितोर्वशी प्रतिष्ठानस्य शिखाभरणभूतं राजर्षेर्भवनमुपस्थिता । ते उभे तिरस्करिणीप्रतिच्छन्ने भूत्वा राज्ञो वयस्येन सह संलापं शृण्वत्यौ तस्थतुः । माणवको राजानमाह । भो वयस्य चिन्तितो मयोपायः । स्वप्नसमागमकारिणीं निद्रां सेवतां भवान् । अथवा

तत्रभवत्या उर्वश्याः प्रतिकृतिमालिख्यावलोकयंस्तिष्ठ । राजा प्राह । सखे उभयमप्यनुपपन्नम् । मम हृदयं कामस्येषुभिः सशल्यमतः स्वप्नसमागमकारिणीं निद्रां कथमुपलभे । अपरं च यदि तस्याः प्रतिकृतिमालिखामि तर्ह्यालेख्येऽसमाप्त एव मम नयने उद्बाष्पे भवतः । अतो या मम मानसीं रुजं न वेत्ति विदित्वा वा मामवमन्यते तस्यामुर्वश्यां मम समागममनोरथमलब्धफलनीरसं विधाय पञ्चबाणः सर्वथा कृती भवतु । उर्वशी तद्वचनं श्रुत्वा स्वामिन्यदि नामाहमनुरक्तस्य तवोपरि यथा त्वया संभाविता तथा परमार्थतः स्यां तर्हि किमिति नन्दनवनवाता अपि ललितपरिजातशयनीये मम शरीरकेऽत्युष्णा भवेयुरिति तुल्यानुरागपिशुनं काव्यं प्रभावनिर्मिते भूर्जपत्रे लिखित्वा राज्ञः पुरतस्तत्पत्रं न्यक्षिपत् । राजापि तद् गृहीत्वा वाचयित्वा च संजातानन्दो धार्यतामयं प्रियायाः स्वहस्त इत्युक्त्वा माणवकस्य हस्ते तत्पत्रं ददौ । अत्रान्तर एवोर्वशीप्रेषिता चित्रलेखा—त्वद्दर्शनसमुत्थेन मदनेन बलवद्बाध्यमानाहं भूयोऽपि महाराजेनानुकम्पनीया—इति प्रियसख्या विज्ञप्तिं राज्ञे निवेदयामास । सोऽपि ततोधिकतरं मदनेन पीडयमानस्तां विज्ञप्तिं परमाल्हादेनानुमेने । यावदुर्वशी राजानं प्रणम्योपविशति तावदेव चित्रलेखे त्वरयोर्वशीं यतो भरतेन मुनिना भवतीषु यः प्रयोगो नियुक्तस्तमयं सलोकपालो मरुतां भर्ता द्रष्टुमना इति देवदूताह्वानं ते अशृणुतां राज्ञानुज्ञाते च स्वर्गमगच्छताम् । गतायां तस्यां राजा वैयर्थ्यमिव संप्रति चक्षुष इति संप्रधार्य तद्भूर्जपत्रावलोकनेन दृष्टिं विलोभयितुकामो माणव-

कमाह । उपनय भूर्जपत्रमिति । किं तु माणवकस्य प्रमादेन तत्पत्रं तस्य हस्ताद् भ्रष्टं भर्तारं द्रष्टुमायान्त्या देव्या—औशीनर्या समासादितम् । तद्गताक्षरार्थं च परिज्ञाय सेर्ष्यया तयेतस्ततस्तदन्वेषणपरस्य तस्य पुरत एव सहसानीय प्रक्षिप्तम् । राजा तु लोप्त्रेण गृहीतः कुम्भीरक इव प्रतिवचनं दातुमसमर्थ आत्मनः सौभाग्यं प्रच्छादयितुं कथं कथमपि प्रायतत । देवीं तु कुपितां दृष्ट्वाऽपराधी नामाहं प्रसीद रम्भोरु विरम संरम्भादित्यादिवचनैस्तां सप्रणिपातमनुनेतुं प्रवृत्तः । किं तु तत्प्रणिपातमवधूय प्रावृड्नदीवाप्रसन्ना सा सपरिवारा निष्क्रान्ता । अनेन समयेन गतमर्धं दिवसस्य । तस्मात्स्नानभोजने सेवितुं राजा सवयस्योन्तःपुरमेव प्राविशत् ।

भरतमुनिप्रयोगं द्रष्टुमना महेन्द्र उर्वशीं ससखीमाह्वाययदिति प्राग्निर्दिष्टमेव । तथा च तस्य पुरतः सरस्वतीकृतलक्ष्मीस्वयंवरनामके काव्यबन्धेऽभिनीयमाने तेषु तेषु रसेषु परिषत्तन्मय्यासीत् । किं तु भवितव्यतानुविधायीनीन्द्रियाणीति वचनानुरोधादुर्वश्या वचनमेकस्मिन् स्थले प्रमादस्खलितमासीत् । यतो लक्ष्मीभूमिकायां वर्तमानोर्वशी वारुणीभूमिकायां वर्तमानया मेनकया पृष्टा । सखि समागता एते सकेशवा लोकपालाः । कतमस्मिंस्ते भावाभिनिवेश इति । ततस्तया पुरुषोत्तम इति भणितव्ये पुरूरवसीति निर्गता वाणी । तां श्रुत्वा भरतः क्रुद्धस्तां शशाप येन ममोपदेशस्त्वया लङ्घितस्तेन न ते दिव्यं स्थानं भविष्यतीति । महेन्द्रेण पुनः प्रेक्षणावसाने लज्जावनतमुखी सा भणिता यस्मिन् बद्धभावासि तस्य मे रणसहायस्य राजर्षेः प्रियमत्र करणी-

यम् । अतस्त्वं यथाकामं पुरूरवसमुपतिष्ठ यावत्स त्वयि दृष्टसंतानो भवेदिति । तदादेशानुरोधादुर्वशी—अस्तमिते सूर्ये—पुरूरवसमुपस्थातुकामाऽल्पाभरणभूषितं नीलांशुकपरिग्रहमभिसारिकावेषं परिधाय सह सख्या परिवर्तितमिव कैलासशिखरं प्रियतमस्य भवनमुपगता । तदा राजा वयस्येन सह स्वामवस्थामेवोद्दिश्य स्वैरालापं कुर्वाणस्तया दृष्टः । यदा चाहमेवास्योत्कण्ठाहेतुरिति तस्याः संशयच्छेदो जातस्तदा तमुपगन्तुमियेष । किं तु तत्क्षण एव इत इतो देवीति वचनं श्रुत्वा परं विषादमगमत् । किं तूपवासनियमवेषा राजर्षिमहिषी दृश्यते तन्नैषा चिरमिह स्थास्यतीति चित्रलेखया समाश्वासिता तथैव तिरस्करिणीप्रतिच्छन्नातिष्ठत् । एवमवस्थितायां तस्यां देव्यवधूतार्यपुत्रप्रणिपाता पश्चात्संतप्यमानसापि प्रियानुप्रसादननामकव्रतापदेशेनोपचारातिक्रमं प्रमार्ष्टुकामा तत्रैवागता । तां दृष्ट्वा राजाऽन्यसंक्रान्तप्रेमाऽधिकतरमेव देव्यां दक्षिणोऽभूत् । देव्यपि व्रतानुरूपं गन्धपुष्पादिभिरादौ चन्द्रपादानभ्यर्च्य पश्चाद्राजानं च पूजयित्वा प्राञ्जलिः प्रणिपत्याह । एषाहं देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्यार्यपुत्रमनुप्रसादयामि । अद्य प्रभृति यां स्त्रियमार्यपुत्रः प्रार्थयते या चार्यपुत्रसमागमप्रणयिनी तया सह मया प्रीतिबन्धेन वर्तितव्यमिति । इदं देवीवचनं श्रुत्वा माणवकोऽपवार्याह । छिन्नहस्ते मत्स्ये पलायिते निर्विण्णो धीवरो भणति धर्मो मे भविष्यति । प्रकाशं च देवीमाह । भवति किं तादृशः प्रियस्तत्रभवान् । देव्याह । मूढ अहं खल्वात्मनः सुखावसानेनार्यपुत्रं निर्वृतशरीरं कर्तुमिच्छामि । एतावता चिन्तय तावत्प्रियो न वेति ।

एवमुक्त्वा निष्क्रान्ता देवी। उर्वश्यपि महानुभावया देव्या अभ्यनुज्ञातोऽनन्तरायी मे प्रियसमागमो भाविष्यतीति मन्यमाना राजानं सहसोपसृत्य जयशब्दमुदीरयामास। तेन चाभिनन्दिता तस्यैवासन उपविष्टा। वयस्य वसन्तानन्तर उष्णसमये भगवान् सूर्यो मयोपचरितव्यस्तद्यथेयं मे प्रियसखी स्वर्गस्य नोत्कण्ठते तथा त्वया कर्तव्यमिति राजानं विज्ञाप्य चित्रलेखा गता। राजापि तथेति प्रतिपद्य मनोरथसंपत्या हर्षनिर्भरः कंचित्कालं प्रदोषरमणीयांश्चन्द्रपादान् सेवित्वा वासगृहं प्रविवेश।

Vikramorvasiyam.

XIX.

The tale of Purûravas and Urvasi

Part 11.

अथ समतिक्रान्तेषु केषुचिद्दिवसेषु उर्वशी तं राजर्षिममात्यनिवेशितराज्यधुरं गृहीत्वा गन्धमादनवनं विहर्तुं गता। तत्र खलु मन्दाकिन्या पुलिनेषु स्थिता सिकतापर्वतकेलिभिः क्रीडन्ती विद्याधरदारिका—उदयवती नाम तेन राजर्षिणा निध्यातेति कुपितोर्वशी यतो दूरारूढः प्रणयोऽसहनः। ततो भर्तुरनुनयमप्रतिपद्यमाना गुरुशापसंमूढहृदया स्त्रीजनपरिहरणीयं कुमारवनं प्रविष्टा प्रवेशानन्तरमेव च काननोपान्तवर्तिलताभावेन परिणतमस्या रूपम्। अथ स राजर्षिस्तस्मिन्नेव कानने प्रियतमां विचिन्वन्नहोरात्रमतिवाहयामास। प्रथमं तावत्तस्य प्रियया वियोग एकपद उपनतः। अपरं च निर्वृतानामप्युत्कण्ठाकारी

जलदसमयः संप्राप्तः। तेन तस्य दुःखं दुःखानुबन्धीव संजातम्। तथा चोन्मत्त इव तस्मिन्वने यत्किंचित्तस्य दृष्टिपथमाययौ तत्प्रियाप्रवृत्तिं सोत्सुकं पप्रच्छ। एवं तेन मयूरः परभृता राजहंसश्चक्रवाको मधुकरो नागराजः शिलोच्चयः सरित्कृष्णसारश्च क्रमेणाभ्यर्थिताः। किं तु स सर्वत्र भग्नाशो बभूव। एवं प्रियान्वेषणार्थं परिभ्रमन्नेकदा रक्ताशोकस्तबकसमरागं कमपि शिलाभेदान्तरगतं मणिं ददर्श। स च संगमनीयो नाम मणिः शैलसुताचरणरागसमुद्भवो धार्यमाणश्चिरात्प्रियजनेन संगममावहतीति केनापि मुनिनानुशिष्टस्तं गृहीत्वा पुनः परिचक्राम। अन्ते स एकां कुसुमरहितां लतां दृष्ट्वा तां स्वप्रियानुकारिणीं च मत्वालिङ्गितुं प्रवृत्तः। स्पृष्टमात्रायां लतायां तत्स्थान एवोर्वशी प्रादुर्भूता। राजा तां विलोक्य दिष्ट्या गतासुना चेतनेव त्वं मया प्रत्युपलब्धासि त्वद्दर्शनादेव प्रसन्नबाह्यान्तःकरणो ममान्तरात्मा तत्कथय कथमियन्त कालमवस्थिता मया विना भवतीति तामुवाच। उर्वशी प्रत्युवाच। शृणोतु महाराजः। भगवता कुमारेण शाश्वतकुमारव्रतं गृहीत्वाऽकलुषो नाम गन्धमादनकच्छोऽध्यासितः कृतश्चैष विधिः। यैतं प्रदेशं स्त्री प्रवेक्ष्यति सा लताभावेन परिणंस्यति गौरीचरणसंभवं मणिं विना ततो न मोक्ष्यत इति। साहं गुरुशापसंमूढहृदया देवतासमयं विस्मृत्य कुमारवनं प्रविष्टा प्रवेशानन्तरमेव वासन्तीलता संवृत्तेति। तन्निशम्य राजा प्राह सर्वमुपपन्नमधुना। शयने सुप्तमपि मां या प्रवासगतं मन्यसे सा त्वं मदीयं चिरवियोगं कथं सहेथाः। इदं तद्यथा कथितं त्वत्संगमनिमित्तं मुनेरुपलभ्य मणिं भावात्त्वमासादिताऽस्माभि-

रिति वदन्मणिं तामदर्शयत् । सा तं गृहीत्वा मूर्ध्न्यवहद्राजानं चोवाच । महान्खलु कालस्तव प्रतिष्ठानान्निर्गतस्य । तदेहि निवर्तावह इति । ततो भर्त्रा सहिता विमानतां गमितेन नवेन पयोमुचा राजधानीमाससाद ।

उर्वशीसहितं महाराजं चिरस्य कालस्य प्रतिनिवृत्तमवलोक्याखिलाः प्रजाः सप्रजा ननन्दुः । ताभिः स ससत्कारोपचारैरनुरज्यमानश्च राज्यमशिषत् । संतानं वर्जयित्वा न तस्य किमपि हीनम् । एकदा तु तिथिविशेष इति सान्तःपुरो गङ्गायमुनयोः संगमे कृताभिषेक उपकार्यां प्रविष्टः । अत्रान्तर एव दुकूलोत्तरच्छेदे तालवृन्ताधारे निक्षिप्य कयापि दास्या नीयमानः संगमनीयमणिरामिषशङ्किना गृध्रेणाक्षिप्तः । तदवलोक्यासमाप्तनेपथ्य एव राजा सावेगं प्राह । आत्मनो वधमाहर्ता क्वासौ विहगतस्करः । येन तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम् । अतः सायं निवासवृक्षाश्रयिणं विहगदस्युं विचेतुं नागरिकमादिदेश । समनन्तरमेव कञ्चुकी सशरं मणिमादाय राज्ञेऽदर्शयत् । आह च । त्वब्दलेन मार्गणतां गतेन निर्भिन्नतनुः स वध्योऽपराधोचितं प्राप्यान्तरिक्षात्समौलिरत्नः पतित इति । राजा मणिमग्निशुद्धं कृत्वा पेटकं प्रवेशयेति किरातीमादिश्य कञ्चुकिनं पप्रच्छ । अपि जानीते भवान्कस्यायं बाण इति । स आह । नामाङ्कितो दृश्यते किं तु न मे वर्णविचारक्षमा दृष्टिरिति राज्ञे शरमुपानयत् । राजा तस्मिन्निमानि नामाक्षराण्यपश्यत् । उर्वशीसंभवस्यायमैलसूनोर्धनुष्मतः । कुमारस्यायुषो बाणः प्रहर्तुर्द्विषदायुषाम् ॥ इति । तानि वाचयित्वा स वयस्यमाह । सखे कथमेतत् । अन्यत्र नैमिषेयस-

आदवियुक्तोहमुर्वश्या । न च मया गर्भव्यक्तिरालक्षिता कुत एव प्रसूतिः। केवलं कानिचिद्दिनानि तस्या वपुः पाण्डुराननच्छायमलसेक्षणं चाभूत्। माणवक आह। मा भवान्सर्वं मानुषीधर्मं दिव्यासु संभावयतु। प्रभावनिगूढानि तासां चरितानि। राजा प्रोवाच। अस्तु तावदेवं यथा भवानाह। पुत्रसंवरणे किमिव कारणं तत्रभवत्याः। माणवकः प्रत्युवाच। को देवतारहस्यानि तर्कयिष्यति। इति तयोः संलापे प्रवर्तमाने कञ्चुकी प्रविश्याह। देव च्यवनाश्रमात्कुमारं गृहीत्वा तापसी संप्राप्ता देवं द्रष्टुमिच्छति। अविलम्बितमुभावपि प्रवेशयेत्यादिष्टः कञ्चुकी तथाकरोत्। माणवकः कुमारं विलोक्योवाच। किं न खलु स एष तत्रभवान् क्षत्रियकुमारो यन्नामाङ्कितो गृध्रलक्षवेधी नाराचः। तथा बहुतरं भवन्तमनुकरोति। राजा प्राह। स्यादेवम्। अतः खलु मम दृष्टिरस्मिन्निपतिता वाष्पायते। वात्सल्यबन्धि हृदयं मनसः प्रसादः। एनं चादयं परिष्वक्तुमिच्छामि। राज्ञाऽभिवादिता तापसी सोमवंशविस्तारयिता भवेत्याशिषं प्रयुयुजे कुमारं च प्राह जात प्रणम ते गुरुम्। कुमारस्तथा कृत्वोपविष्टः। ततो राजा तापसीं पप्रच्छ भगवति किमागमनप्रयोजनम्। तापसी प्रत्युवाच। शृणोतु महाराजः। एष दीर्घायुरायुर्जातमात्र एवोर्वश्या किमपि निमित्तमवेक्ष्य मम हस्ते न्यासीकृतः। यत्क्षत्रियकुमारस्य जातकर्मादिविधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितं गृहीतविद्यो धनुर्वेदेऽभिविनीतः। अद्य पुष्पसमिदर्थमृषिकुमारकैः सह गतेनानेनाश्रमविरुद्धमाचरितं यदनेन गृहीतामिषः किल गृध्रः पादपशिखरे

निलीयमानो लक्ष्यीकृतो बाणस्य। तत उपलब्धवृत्तान्तेन भगवता च्यवनेनाहं समादिष्टा निर्यातय हस्तन्यासमिति। तदिच्छाम्युर्वशीं प्रेक्षितुमिति। राज्ञाहूतामूर्वशीं तापसी प्राह। एष गृहीतविद्य आयुः सांप्रतं कवचधरः संवृत्तः। तदेतस्य ते भर्तुः समक्षं निर्यातितो हस्तनिक्षेपः। अधुना विसर्जय मामुपरुध्यते ममाश्रमधर्मः। उर्वशी तु तच्चिरदर्शनेनाधिकतरमतितृष्णा सती कथं कथमपि तां विससर्ज। राजा पुत्रवतीं भार्यां प्रेक्ष्य सानन्दमाह। कल्याणि पौलोमीसंभवेन जयन्तेन पुरंदर इवाद्याहममुना तव सत्पुत्रेण पुत्रिणामग्रयः। तद्वचः श्रुत्वोर्वशी सहसा रोदितुमारेभे। कारणं पृष्टा प्रत्युवाच। महाराज प्रथमं पुत्रदर्शनेन विस्मृतवत्यस्मि। इदानीं महेन्द्रसंकीर्तनेन समयो मम हृदयमायासयति। स समयस्त्वेवंविधः। अहं पुरा महाराजगृहीतहृदया महेन्द्रेणाज्ञप्ता यदैष मम प्रियसखो राजर्षिस्त्वयि समुत्पन्नस्य वंशकरस्य मुखं प्रेक्षिष्यते तदा त्वया भूयोपि मम समीपमागन्तव्यमिति। ततो मया महाराजवियोगभीरुतया जातमात्र एव विद्यागमनिमित्त भगवतश्च्यवनस्याश्रमपद आर्यायाः सत्यवत्या हस्तेऽप्रकाशं निक्षिप्तः। अद्य पितुराराधनसमर्थः संवृत्त इति कलयन्त्या निर्यातितो मे दीर्घायुः। तदेतावान्मे महाराजेन संवास इति। तच्छ्रुत्वा राजा दैवस्य सुखप्रत्यर्थितां निन्दन् प्रियामाह। सुलभवियोगा परवत्तात्मप्रियाणि कर्तुं न प्रभवति। अतस्त्वं भर्तुः शासने तिष्ठ। अहमपि तव सूनावायुषि न्यस्तराज्यो विचरितमृगयूथानि वनान्याश्रयिष्ये। इति निश्चित्य कुमारस्यायुषोऽभिषेकसंभाराः क्रियन्तामित्यमात्यपरिषदमा-

दिदेश । तस्मिन्नेव क्षणे भगवान्नारद आकाशादवतीर्णः सर्वैस्तैरर्घ्यादिभिरुपचारैः पूजित आसनं परिगृह्य राजानमुवाच । श्रूयतां महेन्द्रसंदेशः । प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति । त्रिकालदर्शिभिर्मुनिभिरादिष्टः सुरासुरसंगरो भावी । भवांश्च सांयुगीनः सहायो नः । तेन त्वया न शस्त्रं संन्यस्तव्यम् । इयं चोर्वशी यावदायुस्तव सहधर्मचारिणी भवत्विति । तच्छ्रुत्वोर्वशी हृदयाच्छल्यमपनीतमिव मेने । राजाप्युवाच । परवानस्मि देवेश्वरेण । नारदस्तमभिनन्द्याह । युक्तम्—त्वत्कार्यं वासवः कुर्यात्त्वं च तस्येष्टमाचरेः । सूर्यस्तेजसाऽग्निं समेधयत्यग्निः सूर्यं च । इत्युक्त्वा कुमारमायुषं स्वहस्तेनैव यौवराज्येऽभिषिषेच राजानं पप्रच्छ च । किं ते भूयः पाकशासनः प्रियं करोतु । राजोवाच । यदि मे मघवा प्रसन्नः किमतः परमिच्छामि । तथापीदमस्तु भरतवाक्यम् ।

परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
संगतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम् ॥

XX.

Râma's return journey from Lankâ to Ayodhyâ.

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच ॥ १ ॥
वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम् ।
छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ॥ २ ॥

गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रामिते तुरंगे ।
तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः ॥ ३ ॥

नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान्पुरुषोऽधिशेते ॥ ४ ॥

पक्षच्छिदा गोत्रभिदात्तगन्धाः शरण्यमेनं शतशो महीध्राः
नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयन्ते ॥ ५ ॥

एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः ।
प्राप्ता मुहूर्तेन विमानवेगात्कूलं फलावर्जितपूगमालम् ॥ ६ ॥

अमी जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि ।
अध्यासते चीरभृतो यथास्वं चिरोज्झितान्याश्रममण्डलानि ॥ ७ ॥

सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥ ८ ॥

त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमेताः कृपया लता मे ।
अदर्शयन्वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ॥ ९ ॥

एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यम्बरलेखि शृङ्गम् ।
नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥ १० ॥

उपान्तवानीरवनोपगूढान्यालक्ष्यपारिप्लवसारसानि ।
दूरावतीर्णा पिबतीव खेदादमूनि पम्पासलिलानि दृष्टिः ॥ ११ ॥

अत्रावियुक्तानि रथाङ्गनाम्नामन्योन्यदत्तोत्पलकेसराणि ।
द्वन्द्वानि दूरान्तरवर्तिना ते मया प्रिये सस्पृहमीक्षितानि ॥ १२ ॥

एषा त्वया पेशलमध्ययापि घटाम्बुसंवर्धितबालचूता ।
आनन्दयत्युन्मुखकृष्णसारा दृष्टा चिरात्पञ्चवटी मनो मे ॥ १३ ॥
अत्रानुगोदं मृगयानिवृत्तस्तरंगवातेन विनीतखेदः ।
रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तः ॥ १४ ॥
भ्रूभेदमात्रेण पदान्मघोनः प्रभ्रंशयां यो नहुषं चकार ।
तस्याविलाम्भःपरिशुद्धिहेतोर्भौमो मुनेः स्थानपरिग्रहोऽयम् ॥ १५ ॥
हविर्भुजामेधवतां चतुर्णां मध्ये ललाटंतपसप्तसप्तिः ।
असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥ १६ ॥
अदः शरण्यं शरभङ्गनाम्नस्तपोवनं पावनमाहिताग्नेः ।
चिराय संतर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत् ॥ १७ ॥
छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु ।
तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु ॥ १८ ॥
धारास्वनोद्गारिदरीमुखोऽसौ शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः ।
बध्नाति मे बन्धुरगात्रि चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः ॥ १९ ॥
एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी ।
मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ॥ २० ॥
अयं सुजातोऽनुगिरं तमालः प्रवालमादाय सुगन्धि यस्य ।
यवाङ्कुरापाण्डुकपोलशोभी मयावतंसः परिकल्पितस्ते ॥ २१ ॥
अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेमपद्माम् ।
प्रवर्तयामास किलानुसूया त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ॥ २२ ॥

त्वया पुरस्तादुपयाचितो यः सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ॥ २३ ॥

क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव ॥ २४ ॥
क्वचित्खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।
अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ॥ २५ ॥
क्वचित्प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥ २६ ॥
क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः ॥ २७ ॥
पुरं निषादाधिपतेरिदं तद्यस्मिन्मया मौलिमणिं विहाय ।
जटासु बद्धास्वरुदत्सुमन्त्रः कैकेयि कामाः फलितास्तवेति ॥ २८ ॥
जलानि या तीरनिखातयूपा वहत्ययोध्यामनु राजधानीम् ।
तुरंगमेधावभृतावतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ॥ २९ ॥
सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता ।
दूरे वसन्तं शिशिरानिलैर्मां तरंगहस्तैरुपगूहतीव ॥ ३० ॥

Raghuvams'a XIII.

XXI.

Another foundling.

अथकदाचिदेकेन तापसेन राजलक्षणविराजितं कंचिन्नयनानन्दकरं सुकुमारं कुमारं राज्ञे समर्प्यावोचि । भूवल्लभ कुशसमिदानयनाय वनगतेन मया काचिदशरण्या व्यक्तकार्पण्याश्रु मुञ्चन्ती वनिता विलोकिता निर्जने वने किंनिमित्तं रुद्यते त्वयेति पृष्टा सा करसरोरुहैरश्रु प्रमृज्य सगद्गदं मामवोचत् । मुने लावण्यजितपुष्पसायके मिथिलानायके पुत्रदारसमन्विते पुष्पपुरमुपेत्य कंचन कालमधिवसति समाराधितगिरीशो मालवाधीशो मगधराजं योद्धुमभ्यगात् । तत्र प्रख्यातयोरेतयोरसंख्ये संख्ये वर्तमाने सुहृत्साहाय्यकं कुर्वाणो निजबले सति विदेहे विदेहेश्वरः प्रहारवर्मा जयवता रिपुणाभिगृह्य कारुण्येन पुण्येन विसृष्टो हतावशेषेण शून्येन सैन्येन सह स्वपुरगमनमकरोत् । ततो वनमार्गेण दुर्गेण गच्छन्नधिकबलेन शबरबलेन रभसादभिहन्यमानो मूलबलाभिरक्षितावरोधः स पलायिष्ट । तदीयार्भकयोर्यमयोर्धात्रीभावेन परिकल्पिताहं मद्दुहितापि तीव्रगतिं भूपतिमनुगन्तुमक्षमे अभूव । तत्र विवृतवदनः कोऽपि रूपी कोप इव व्याघ्रः शीघ्रमामाघ्रातुमागतवान् । भीताहमुदग्रग्राविणि स्खलन्ती पर्यपतम् । मदीयपाणिभ्रष्टो बालकः कस्यापि कपिलाशवस्य क्रोडमभ्यलीयत । तच्छवाकर्षिणोऽमर्षिणो व्याघ्रस्य प्राणान्बाणो बाणासनयन्त्रमुक्तोऽपाहरत् । विलोलालको बालकोऽपि शबरैरादाय कुत्राचिदुपानीयत । कुमारमपरमुद्वहन्ती मद्दुहिता कुत्र गता न जाने । साहं मोहं गता केनापि कृपा-

सुना वृष्णिपालेन स्वकुटीरमावेश्य विरोपितव्रणाऽभवम् । ततः स्वस्थीभूय भूयः क्ष्माभर्तुरन्तिकमुपातिष्ठासुरसहायतया दुहितुरनभिज्ञतया च व्याकुलीभवामि । इत्यभिदधाना एकाकिन्यपि स्वामिनं गमिष्यामीति सा तदैव निरगात् । अहमपि भवन्मित्रस्य विदेहनाथस्य विपन्निमित्तं विषादमनुभवंस्तदन्वयाङ्कुरं कुमारमन्विष्यंस्तदैकं चण्डिकामन्दिरं सुन्दरं प्रागाम् । तत्र सततमेवंविधविजयसिद्धये कुमारं देवतोपहारं करिष्यन्तः किराता मया समभ्यभाष्यन्त । ननु किरातोत्तमा घोरप्रचारे कान्तारे स्खलितपथः स्थविरभूसुरोऽहं मम पुत्रकं क्वचिच्छायायां निक्षिप्य मार्गान्वेषणाय किंचिदन्तरमगच्छम् । स कुत्र गतः केन वा गृहीत इति परीक्ष्यापि न वीक्ष्यते । तन्मुखालोकनेन विनानेकान्यहान्यतीतानि । किं करोमि क्व यामि भवद्भिर्न किमदर्शीति । द्विजोत्तम कश्चिदत्र तिष्ठति । किमेष तव नंदनः सत्यमेव तदेनं गृहाणेत्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरन् । तेभ्यो दत्ताशीरहं बालकमङ्गीकृत्य शिशिरोदकादिनोपचारेणाश्वास्य निःशङ्कं भवदङ्कं समानीतवानस्मि । एनमायुष्मन्तं पितृरूपो भवानभिरक्षतामिति । राजा सुहृदापन्निमित्तं शोकं तन्नन्दनविलोकनसुखेन किंचिदधरीकृत्य तमुपहारवर्मनाम्नाहूय राजवाहनमिव पुपोष ।

Dasakumâracharita.

XXII.

Das'aratha and Vis'vámitra.

अभून्नृपो विबुधसखः परंतपः श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं सनातनः पितरमुपागमत्स्वयम् ॥ १ ॥
सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनपारीत्सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च ॥ २ ॥
वसूनि तोयं घनव्यकारीत्सहासनं गोत्रभिदोऽध्यवात्सीत् ।
न त्र्यम्बकादन्यमुपास्थिताऽसौ यशांसि सर्वेषुभृतां निरास्यत् ॥ ३ ॥
पुण्यो महाब्रह्मसमूहजुष्टः संतर्पणो नाकसदां वरेण्यः ।
जज्वाल लोकस्थितये स राजा यथाऽध्वरे वह्निरभिप्रणीतः ॥ ४ ॥
स पुण्यकीर्तिः शतमन्युकल्पो महेन्द्रलोकप्रतिमां समृद्ध्या ।
अध्यास्त सर्वर्तुसुखामयोध्यामध्यासितां ब्रह्मभिरिद्धबोधैः ॥ ५ ॥
निर्माणदक्षस्य समीहितेषु सीमेव पद्मासनकौशलस्य ।
ऊर्ध्वस्फुरन्द्रत्नगभस्तिभिर्या स्थितावहस्येव पुरं मघोनः ॥ ६ ॥
धर्म्यासु कामार्थयशस्करीषु मतासु लोकेऽधिगतासु काले ।
विद्यासु विद्वानिव सोऽभिरेमे पत्नीषु राजा तिसृषूत्तमासु ॥ ७ ॥
पुत्रीयता तेन वराङ्गनाभिरानायि विद्वान् क्रतुषु क्रियावान् ।
विपत्तिमज्ञानगतिर्मनस्वी मान्यो मुनिः स्वां पुरमृष्यशृङ्गः ॥ ८ ॥
ऐहिष्ट तं कारयितुं कृतात्मा क्रतुं नृपः पुत्रफलं मुनीन्द्रम् ।
ज्ञाताशयस्तस्य ततो व्यतानीत्स कर्मठः कर्म सुतानुबन्धम् ॥ ९ ॥

निष्ठां गते दत्रिमसभ्यतोषे विहित्रिमे कर्मणि राजपत्न्यः ।
प्राशुर्हुतोच्छिष्टमुदारवंश्यास्तिस्रः प्रसोतुं चतुरस्तु पुत्रान् ॥ १० ॥
कौशल्ययाऽसावि सुखेन रामः प्राक्कैकयीतो भरतस्ततोऽभूत् ।
प्रासोष्ट शत्रुघ्नमुदारचेष्टमेका सुमित्रा सह लक्ष्मणेन ॥ ११ ॥
आर्चीद् द्विजातीन्परमार्थविंदानुदेजयान्भूतगणान् न्यषेधीत् ।
विद्वानुपानेष्ट च तान्स्वकाले यतिर्वशिष्ठो यमिनां वरिष्ठः ॥ १२ ॥
वेदोऽङ्गवांस्तैरखिलोऽध्यगायि शस्त्राण्युपायंसत जित्वराणि ।
ते भिन्नवृत्तीन्यपि मानसानि समं जनानां गुणिनोऽध्यवात्सुः ॥ १३ ॥
ततोऽभ्यगाद्गाधिसुतः क्षितीन्द्रं रक्षोभिरभ्याहतकर्मवृत्तिः ।
रामं वरीतुं परिरक्षणार्थं राजार्जिहत्तं मधुपर्कपाणिः ॥ १४ ॥
आख्यन्मुनिस्तस्य शिवं समाधेर्विघ्नन्ति रक्षांसि वने क्रतूंश्च ।
तानि द्विषद्वीर्यनिराकरिष्णुस्तृणेढु रामः सह लक्ष्मणेन ॥ १५ ॥
स शुश्रुवांस्तद्वचनं मुमोह राजाऽसहिष्णुः सुतविप्रयोगम् ।
अहंयुनाथ क्षितिपः शुभंयुरूचे वचस्तापसकुञ्जरेण ॥ १६ ॥
मया त्वमाप्थाः शरणं भयेषु वयं त्वयाप्स्महि धर्मवृद्धयै ।
क्षात्रं द्विजत्वं च परस्परार्थं शङ्कां कृथा मा प्रहिणु स्वसूनुम् ॥ १७ ॥
घानिष्यते तेन महान्विपक्षः स्थायिष्यते येन रणे पुरस्तात् ।
मा मां महात्मन्परिभूरयोग्ये न मद्विधो न्यस्यति भारमग्र्यम् ॥ १८ ॥
क्रुध्यन्कुलं धक्ष्यति विप्रवह्निर्यास्यन् सुतस्तप्स्यति मां समन्युम् ।
इत्थं नृपः पूर्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्य ॥ १९ ॥

Bhatti-Kâvya I.

XXIII.

Draupadî and Yudhishthira.

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ॥ १ ॥
निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥ २ ॥
भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥ ३ ॥
अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥ ४ ॥
व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ॥ ५ ॥
गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥ ६ ॥
भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ ७ ॥
अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥ ८ ॥
परिभ्रमँल्लोहितचन्दनोचितः पदातिरन्तर्गिरिरेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥ ९ ॥
विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुना हरन्करोति मन्युं न कथं धनंजयः ॥ १० ॥

वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥ ११ ॥
इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ॥ १२॥
पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥१३॥
पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥१४॥
अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥ १५ ॥
द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसंपदां पराभवोऽप्युत्सव एव मानिनाम् ॥ १६ ॥
विहाय शान्तिं नृप धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥१७॥
पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ॥ १८ ॥
अथ क्षमामेव निरस्तविक्रमश्चिरस्य पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम् ॥१९॥
न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि॥२०॥

Kirâtârjunîyam I.

———

XXIV.

Miscellaneous verses.

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ॥ १ ॥
पुरा सरसि मानसे विकचसारसालिस्खलत्-
परागसुरभीकृते पयसि यस्य यातं वयः ।
स पल्वलजलेऽधुना मिलदनेकभेकाकुले
मरालकुलनायकः कथय रे कथं वर्तताम् ॥ २ ॥
अयि दलदरविन्द स्यन्दमानं मरन्दं
तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः ।
दिशि दिशि निरपेक्षस्तावकीनं विवृण्वन्
परिमलमयमन्यो बान्धवो गन्धवाहः ॥ ३ ॥
समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः ।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ॥ ४ ॥
तावत्कोकिल विरसान् यापय दिवसान्वनान्तरे निवसन् ।
यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति ॥ ५ ॥
कमलिनि मलिनीकरोषि चेतः किमिति बकैरवहेलिताऽनभिज्ञैः ।
परिणतमकरन्दमार्मिकास्ते जगति भवन्तु चिरायुषो मिलिन्दाः ॥ ६ ॥
नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदापि कृथाः

अत्यन्तसरसहृदयो यतः परेषां गुणगृहीतासि ॥ ७ ॥
येनामन्दमरन्दे दलदरविन्दे दिनान्यनायिषत ।
कुटजे खलु तेनेहा तेने हा मधुकरेण कथम् ॥ ८ ॥
अयि मलयज महिमायं कस्य गिरामस्तु विषयस्ते ।
उद्गिरतो यद्गरलं फणिनः पुष्णासि परिमलोद्गारैः ॥ ९ ॥
पाटीर तव पटीयान् कः परिपाटीमिमामुरीकर्तुम् ।
यत्पिंषतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम् ॥ १० ॥
नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ॥ ११ ॥
स्वच्छन्दं दलदरविन्द ते मरन्दं
विन्दन्तो विदधतु गुञ्जितं मिलिन्दाः
आमोदानथ हरिदन्तराणि नेतुं
नैवान्यो जगति समीरणात्प्रवीणः ॥ १२ ॥
आपेदिरेऽम्बरपथं परितः पतंगा भृङ्गा रसालकुसुमानि समाश्रयन्ते ।
संकोचमञ्चति सरस्त्वयि दीनदीनो मीनो नु हन्त कतमां गतिमभ्युपेतु ॥ १३ ॥
गुञ्जति मञ्जु मिलिन्दे मा मालति मौनमुपयासीः ।
शिरसा वदान्यगुरवः सादरमेनं वहन्ति सुरतरवः ॥ १४ ॥
यैस्त्वं गुणगणवानपि सतां द्विजिह्वैरसेव्यतां नीतः ।
तानपि वहसि पटीरज किं कथयामस्त्वदीयमौन्नत्यम् ॥ १५ ॥
गाहितमखिलं गहनं परितो दृष्टाश्च विटपिनः सर्वे ।

सहकार न प्रपेदे मधुपेन भवत्समं जगति ॥ १६ ॥

अपनीतपरिमलान्तरकथे पदं न्यस्य देवतरुकुसुमे ।
पुष्पान्तरेऽपि गन्तुं वाञ्छसि चेद्भ्रमर धन्योऽसि ॥ १७ ॥

तरुकुलसुषमापहारां जनयन्तीं जगति जीवजातार्त्तिम् ।
केन गुणेन भवानीतात हिमानीमिमां वहसि ॥ १८ ॥

कलभ तवान्तिकमागतमलिमेनं मा कदाप्यवज्ञासीः ।
अपि दानसुन्दराणां द्विपधुर्याणामयं शिरोधार्यः ॥ १९ ॥

न यत्र स्थेमानं दधुरतिभयभ्रान्तनयना
गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः ।
लुठन्मुक्ताभारे भवति परलोकं गतवतो
हरेरद्य द्वारे शिव शिव शिवानां कलकलः ॥ २० ॥

ग्रीष्मे भीष्मतरैः करैर्दिनकृता दग्धोऽपि यश्चातक-
स्त्वां ध्यायन्घन वासरान् कथमपि द्राघीयसो नीतवान् ।
दैवाल्लोचनगोचरेण भवता तस्मिन्निदानीं यदि
स्वीचक्रे करकानिपातनकृपा तत्कं प्रति ब्रूमहे ॥ २१ ॥

दवदहनजटालज्वालजालाहतानां
परिगलितलतानां म्लायतां भूरुहाणाम् ।
अयि जलधर शैलश्रेणिशृङ्गेषु तोयं
वितरसि बहु कोऽयं श्रीमदस्तावकीनः ॥ २२ ॥

साकं ग्रावगणैर्लुठन्ति मणयस्तीरेऽर्कबिम्बोपमा
नीरे नीरचरैः समं स भगवान्निद्राति नारायणः ।

एवं वीक्ष्य तवाविवेकमथ च प्रौढिं परामुन्नतेः
किं निन्दान्यथवा स्तवानि कथय क्षीरार्णव त्वामहम् ॥२३॥

किं खलु रत्नैरेतैः किं पुनरभ्रायितेन वपुषा ते ।
सलिलमपि यन्न तावकमर्णव वदनं प्रयाति तृषितानाम् ॥ २४ ॥

इयत्यां संपत्तावपि च सलिलानां त्वमधुना
न तृष्णमार्त्तानां हरसि यदि कासार सहसा ।
निदाघे चण्डांशौ किरति परितोऽङ्गारनिकरं
कृशीभूतः केषामहह परिहर्तासि खलु ताम् ॥ २५ ॥

भुक्ता मृणालपटली भवता निपीता-
न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस वद तस्य सरोवरस्य
कृत्येन केन भवितासि कृतोपकारः ॥ २६ ॥

प्रारम्भे कुसुमाकरस्य परितो यस्योल्लसन्मञ्जरी-
पुञ्जे मञ्जुलगुञ्जितानि रचयंस्तानातनोरुत्सवान् ।
तस्मिन्नद्य रसालशाखिनि दशां दैवात्कृशामञ्चति
त्वं चेन्मुञ्चसि चञ्चरीक विनयं नीचस्त्वदन्योऽस्ति कः ॥

स्थितिं नो रे दध्याः क्षणमपि मदान्धेक्षण सखे
गजश्रेणीनाथ त्वमिह जटिलायां वनभुवि ।
असौ कुम्भिभ्रान्त्या खरनखरविद्रावितमहा-
गुरुग्रावग्रामः स्वपिति गिरिगर्भे हरिपतिः ॥ २८ ॥

गिरिगह्वरेषु गुरुगर्वगुम्फितो

गजराजपोत न कदापि संचरेः ।
यदि बुध्यते हरिशिशुः स्तनंधयो
भविता करेणुपरिशेषिता मही ॥ २९ ॥

निसर्गादारामे तरुकुलसमारोपसुकृती
कृती मालाकारो बकुलमपि कुत्राऽपि निदधे ।
इदं को जानीते यदयमिह कोणान्तरगतो
जगज्जालं कर्ता कुसुमभरसौरभ्यभरितम् ॥ ३० ॥

स्वस्वव्यापृतिमग्नमानसतया मत्तो निवृत्ते जने
चञ्चूकोटिविपाटिताररपुटो यास्याम्यहं पञ्जरात् ।
एवं कीरवरे मनोरथमयं पीयूषमास्वादय-
त्यन्तः संप्रविवेश वारणकराकारः फणिग्रामणीः ॥ ३१ ॥

नीरान्निर्मलतो जनिर्मधुरता वामामुखस्पर्धिनी
वासो यस्य हरेः करे परिमलो गीर्वाणचेतोहरः ।
सर्वस्वं तदहो महाकविगिरां कामस्य चाम्भोरुह
त्वं चेत् प्रीतिमुरीकरोषि मधुपे तत्त्वां किमाचक्ष्महे ॥ ३२ ॥

विदुषां वदनाद्वाचः सहसा यान्ति नो बहिः ।
याताश्चेन पराञ्चन्ति द्विरदानां रदा इव ॥ ३३ ॥

औदार्यं भुवनत्रयेऽपि विदितं संभूतिरम्भोनिधे-
र्वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः ।
एवं दातृगुरोर्गुणाः सुरतरोः सर्वेऽपि लोकोत्तराः
स्यादर्थिप्रवरार्थितार्पणविधावेको विवेको यदि ॥ ३४ ॥

विश्वास्य मधुरवचनैः साधून् ये वञ्चयन्ति नम्रतमाः ।
तानपि दधासि मातः काश्यपि यातस्तवापि च विवेकः ॥ ३५ ॥

अन्या जगद्धितमयी मनसः प्रवृत्ति-
रन्यैव काऽपि रचना वचनावलीनाम् ।
लोकोत्तरा च कृतिराकृतिरार्यहृद्या
विद्यावतां सकलमेव गिरां दवीयः ॥ ३६ ॥

आपद्गतः किल महाशयचक्रवर्ती
विस्तारयत्यकृतपूर्वमुदारभावम् ।
कालागुरुर्दहनमध्यगतः समन्ता-
ल्लोकोत्तरं परिमलं प्रकटीकरोति ॥ ३७ ॥

विश्वाभिरामगुणगौरवगुम्फितानां
रोषोऽपि निर्मलधियां रमणीय एव ।
लोकंपृणैः परिमलैः परिपूरितस्य
काश्मीरजस्य कटुताऽपि नितान्तरम्या ॥ ३८ ॥

गीर्भिर्गुरूणां परुषाक्षराभिस्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां न जातु मौलौ मणयो वसन्ति ॥ ३९ ॥

वहति विषधरान् पटीरजन्मा शिरसि मसीपटलं दधाति दीपः ।
विधुरपि भजतेतरां कलङ्कं पिशुनजनं खलु बिभ्रति क्षितीन्द्राः ॥४०॥

सत्पूरुषः खलु हिताचरणैरमन्दमानन्दयत्यखिललोकमनुक्त एव ।
आराधितः कथय केन करैरुदारैरिन्दुर्विकासयति कैरविणीकुलानि ॥४१॥

कृतमपि महोपकारं पय इव पीत्वा निरातङ्कः ।

प्रत्युत हन्तुं यतते काकोदरसोदरः खलो जगति ॥ ४२ ॥

खलः कापट्यदोषेण दूरेणैव विसृज्यते ।
अपायशङ्किभिर्लोकैर्विषेणाशीविषो यथा ॥ ४३ ॥

वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥ ४४

अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
निखिलरसायनमहितो गन्धेनोग्रेण लशुन इव ॥ ४५ ॥

किं तीर्थं हरिपादपद्मभजनं किं रत्नमच्छा मतिः
किं शास्त्रं श्रवणेन यस्य गलति द्वैतान्धकारोत्करः ।
किं मित्रं सततोपकाररसिकं तत्त्वावबोधः सखे
कः शत्रुर्वद खेददानकुशलो दुर्वासनासंचयः ॥ ४६ ॥

निष्णातोऽपि च वेदान्ते साधुत्वं नैति दुर्जनः ।
चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥ ४७ ॥

नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम् ।
शाखिनोऽन्ये विराजन्ते खण्ड्यन्ते चन्दनद्रुमाः ॥ ४८ ॥

शून्येऽपि च गुणवत्तामातन्वानः स्वकीयगुणजालैः ।
विवराणि मुद्रयन् द्रागूर्णायुरिव सज्जनो जयति ॥ ४९ ॥

धत्ते भरं कुसुमपत्रफलावलीनां
घर्मव्यथां वहति शीतभवां रुजं च ।
यो देहमर्पयति चान्यसुखस्य हेतो-
स्तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥ ५० ॥

हालाहलं खलु पिपासति कौतुकेन
    कालानलं परिचुचुम्बिषति प्रकामम् ।
व्यालाधिपं च यतते परिरब्धुमद्धा
    यो दुर्जनं वशयितुं तनुते मनीषाम् ॥ ५१ ॥

दीनानामिह परिहाय शुष्कशस्या-
    न्यौदार्यं प्रकटयतो महीधरेषु ।
औन्नत्यं परममवाप्य दुर्मदस्य
    ज्ञातोऽयं जलधर तावको विवेकः ॥ ५२ ॥

गिरयो गुरवस्तेभ्योऽप्युर्वी गुर्वी ततोऽपि जगदण्डम् ।
तस्मादप्यतिगुरवः प्रलयेऽप्यचला महात्मनः ॥ ५३ ॥

व्योमनि बीजाकुरुते चित्रं निर्माति सुन्दरं पवने ।
रचयति रेखाः सलिले यस्तु खले चरति सत्कारम् ॥ ५४ ॥

किमहं वदामि खल दिव्यमते गुणपक्षपातमभितो भवतः ।
गुणशालिनो निखिलसाधुजनान् यदहर्निशं न खलु विस्मरसि ॥ ५५ ॥

रे खल तव खलु चरितं विदुषामग्रे विविच्य वक्ष्यामि ।
अथवालं पापात्मन् कृतया कथयापि ते हतया ॥ ५६ ॥

आनन्दमृगदावाग्निः शीलशाखिमदद्विपः
ज्ञानदीपमहावायुरयं खलसमागमः ॥ ५७ ॥

खलास्तु कुशलाः साधुहितप्रत्यूहकर्मणि
निपुणाः फणिनः प्राणानपहर्तुं निरागसाम् ॥ ५८ ॥

वदने विनिवेशिता भुजंगी पिशुनानां रसनामिषेण धात्रा ।

अनया कथमन्यथावलीढा न हि जीवन्ति जना मनागमन्त्राः ॥५९॥
एत्य कुसुमाकरो मे संजीवयिता गिरं चिरं मग्नाम् ।
इति चिन्तयतो हृदये पिकस्य समाधायि शौभिकेन शरः ॥ ६० ॥

निर्गुणः शोभते नैव विपुलाडम्बरोऽपि ना ।
आपातरम्यपुष्पश्रीशोभितः शाल्मलिर्यथा ॥ ६१ ॥

पङ्कैर्विना सरो भाति सदः खलजनैर्विना ।
कटुवर्णैर्विना काव्यं मानसं विषयैर्विना ॥ ६२ ॥

तत्त्वं किमपि काव्यानां जानाति विरलो भुवि ।
मार्मिकः को मरन्दानामन्तरेण मधुव्रतम् ॥ ६३ ॥

यथा तानं विना रागो यथा मानं विना नृपः ।
यथा दानं विना हस्ती तथा ज्ञानं विना यतिः ॥ ६४ ॥

सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम् ।
आमोदो न हि कस्तूर्याः शपथेतानुभाव्यते ॥ ६५ ॥

अयि बत गुरु गर्वं मास्म कस्तूरि यासी-
रखिलपरिमलानां मौलिना सौरभेण ।
गिरिगहनगुहायां लीनमत्यन्तदीनं
स्वजनकममुनैव प्राणहीनं करोषि ॥ ६६ ॥

दूरीकरोति कुमतिं विमलीकरोति ।
चेतश्चिरंतनमवं चुलुकीकरोति ।
भूतेषु किं च करुणां बहुलीकरोति
सङ्गः सतां किमु न मङ्गलमातनोति ॥ ६७ ॥

अनवरतपरोपकारव्यग्रीभवदमलचेतसां महताम् ।
आपातकाटवानि स्फुरन्ति वचनानि भेषजानीव ॥ ६८ ॥

मृतस्य लिप्सा कृपणस्य दित्सा
विमार्गगायाश्च रुचिः स्वकान्ते ।
सर्पस्य शान्तिः कुटिलस्य मैत्री ।
विधातृसृष्टौ न हि दृष्टपूर्वा ॥ ६९ ॥

Bhaminivilasa I.

— —

द्वितीयावलिः
SECOND SERIES.

I.

A jackal fallen into an indigo-vat.

अस्त्यरण्ये कश्चिच्छृगालः स्वेच्छया नगरोपान्ते भ्राम्यन्नीलीभाण्डे पतितः। पश्चात्तत उत्थातुमसमर्थः प्रातरात्मानं मृतवत्संदर्श्य स्थितः अथ नीलीभाण्डस्वामिना मृत इति ज्ञात्वा तस्मात्समुत्थाप्य दूरे नीत्वापसारितस्तस्मात्पलायितः। ततोऽसौ वनं गत्वा स्वकीयमात्मानं नीलवर्णमवलोक्याचिन्तयत्। अहमिदानीमुत्तमवर्णः। तदाहं स्वकीयोत्कर्षं किं न साधयामि। इत्यालोच्य शृगालानाहूय तेनोक्तम्। अहं भगवत्या वनदेवतया स्वहस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः। तदद्यारभ्यारण्येऽस्मदाज्ञया व्यवहारः कार्यः। शृगालाश्च तं विशिष्टवर्णमवलोक्य साष्टाङ्गपातं प्रणम्योचुः। यथाज्ञापयति देवः। इत्यनेनैव क्रमेण सर्वेष्वरण्यवासिष्वाधिपत्यं तस्य बभूव। ततस्तेन स्वज्ञातिभिरावृतेनाधिक्यं साधितम्। ततस्तेन व्याघ्रसिंहादीनुत्तमपरिजनान्प्राप्य सदसि शृगालानवलोक्य लज्जमानेनावज्ञया स्वज्ञातयः सर्वे दूरीकृताः। ततो विषण्णाञ् शृगालानवलोक्य केनचिद्वृद्धशृगालेनैतत्प्रतिज्ञातम्। मा विषीदत। यदनेनानभिज्ञेन नीतिविदो मर्मज्ञा वयं स्वसमीपात्परिभूतास्तद्यथायं नश्यति तथा विधेयम्। यतोऽमी व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजानमिमं मन्यन्ते। तद्यथायं परिचितो भवति तथा कुरुत। तत्र चैवमनुष्ठेयम्। यतः सर्वे संध्यासमये

संनिधाने महारावमेकदैव करिष्यथ। ततस्तं शब्दमाकर्ण्य जातिस्वभावात्तेनापि शब्दः कर्तव्यः। ततस्तथानुष्ठिते सति तद्भूतम्। यतः

य: स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।
श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम्॥ १॥

ततः शब्दादभिज्ञाय स व्याघ्रेण हतः। अतोऽहं ब्रवीमि।

आत्मपक्षं परित्यज्य परपक्षेषु यो रतः।
स परैर्हन्यते मूढो नीलवर्णशृगालवत्॥ २॥

Hitopadesa III.

II.

Monkeys advised by a bird.

अस्ति कस्मिंश्चित्पर्वतैकदेशे वानरयूथम्। तच्च कदाचिद्धेमन्तसमयेऽसौम्यवातसंस्पर्शवेपमानकलेवरं प्रवर्षद्घनधारानिपातसमाहतं न कथंचिच्छान्तिमगमत्। अथ केचिद्वानरा वह्निकणसदृशानि गुञ्जाफलानि विचित्य वह्निवाञ्छया फूत्कुर्वन्तः समन्तात्तस्थुः। अथ सूचीमुखो नाम पक्षी तेषां तं वृथायासमवलोक्य प्रोवाच। भो भवन्तः सर्वे मूर्खतमाः। नैते वह्निकणा वह्निकणसदृशानि गुञ्जाफलान्येतानि। तत्किं वृथा श्रमेण नैतस्माच्छीतरक्षा भवति। तदन्विष्यतां कश्चिन्निर्वातो वनप्रदेशो गुहा वा गिरिकन्दरं वा। अद्यापि साटोपो मेघो दृश्यते। अथ तेषामेकतमो वृद्धवानरस्तमुवाच। भोः किं तवानेन व्यापारेण। तद्गम्यताम्। सोऽपि तमनादृत्य भूयोऽपि वानराननवरतमाह। भोः किं वृथा क्लेशेन। अथ यावदसौ न कथंचित्प्रलपन्वि-

रमति तावदेकेन वानरेण व्यर्थश्रमत्वात्कुपितेन पक्षाभ्यां गृहीत्वा शिलायामास्फालित उपरतश्च । अतोऽहं ब्रवीमि ।

नानाम्यं नमते दारु नाश्मनि स्यात्क्षुरक्रिया ।
सूचीमुख विजानीहि नाशिष्यायोपदिश्यते ॥

Panchatantra I.

III.

General precepts of advice.

दण्डं दण्डीव भूतेषु धारयन्धरणीपतिः ।
प्रजाः समनुगृह्णीयात्प्रजापतिरिव स्वयम् ॥ १ ॥
वाक् सूनृता दया दानं दीनोपगतरक्षणम् ।
इति सङ्गः सतां साधु ह्येतत्सत्पुरुषव्रतम् ॥ २ ॥
आविष्ट इव दुःखेन हृद्गतेन गरीयसा ।
समन्वितः करुणया परया दीनमुद्धरेत् ॥ ३ ॥
न तेभ्योऽभ्यधिकाः सन्तः सन्ति सत्पुरुषव्रतैः ।
दुःखपङ्कार्णवे मग्नं दीनमभ्युद्धरन्ति ये ॥ ४ ॥
दयामास्थाय परमां धर्मादविचलन्नृपः ।
पीडितानामनाथानां कुर्यादश्रुप्रमार्जनम् ॥ ५ ॥
आनृशंस्यं परो धर्मः सर्वप्राणभृतां यतः ।
तस्माद्राजाऽनृशंस्येन पालयेत्कृपणं जनम् ॥ ६ ॥
न हि स्वसुखमन्विच्छन्पीडयेत्कृपणं नृपः ।
कृपणः पीड्यमानो हि मन्युना हन्ति पार्थिवम् ॥ ७ ॥

को हि नाम कुले जातः सुखलेशेन लोभितः ।
अल्पसाराणि भूतानि पीडयेदविचारयन् ॥ ८ ॥
आधिव्याधिपरीताय अद्य श्वो वा विनाशिने ।
को हि नाम शरीराय धर्मापेतं समाचरेत् ॥ ९ ॥
महावाताहतभ्रान्तिमेघमालातिपेलवैः ।
कथं नाम महात्मानो ह्रियन्ते विषयारिभिः ॥ १० ॥
जलान्तश्चन्द्रचपलं जीवनं खलु देहिनाम् ।
तथाविधमिति ज्ञात्वा शश्वत्कल्याणमाचरेत् ॥ ११ ॥
जगन्मृगतृषातुल्यं वीक्ष्येदं क्षणभङ्गुरम् ।
सज्जनैः संगतं कुर्याद्धर्माय च सुखाय च ॥ १२ ॥
हिमांशुमाली न तथा न चोत्फुल्लोत्पलं सरः ।
आनन्दयति चेतांसि यथा सज्जनचेष्टितम् ॥ १३ ॥
सतः शीलोपसंपन्नानकस्मादेव दुर्जनः ।
अन्तः प्रविश्य दहति शुष्कवृक्षानिवानलः ॥ १४ ॥
निःश्वासोद्गीर्णहुतभुग्धूमधूम्रीकृताननैः ।
वरमाशीविषैः सङ्गं कुर्यान्न त्वेव दुर्जनैः ॥ १५ ॥
असाध्यं साधुमन्त्राणां तीव्रं वाग्विषमुत्सृजन् ।
द्विजिह्ववदनं धत्ते दुष्टो दुर्जनपन्नगः ॥ १६ ॥
हृदि विद्ध इवात्यर्थं यया संतप्यते जनः ।
पीडितोऽपि हि मेधावी न तां वाचमुदीरयेत् ॥ १७ ॥

प्रियमेवाभिधातव्यं नित्यं सत्सु द्विषत्सु च ।
शिखीव केकामधुरः प्रियवाक्कस्य न प्रियः ॥ १८ ॥

अलंक्रियन्ते शिखिनः केकया मदरक्तया ।
वाचा विपश्चितोऽप्यर्थं माधुर्यगुणयुक्तया ॥ १९ ॥

गुणानुरागी स्थितिमान् श्रद्दधानो दयान्वितः ।
धनं धर्माय विसृजेत् प्रियां वाचमुदीरयेत् ॥ २० ॥

ये प्रियाणि प्रभाषन्ते प्रयच्छन्ति च सत्कृतिम् ।
श्रीमन्तोऽनिन्द्यचरिता देवास्ते नरविग्रहाः ॥ २१ ॥

शुचिरास्तिक्यपूतात्मा पूजयेद्देवताः सदा ।
देवतावद्गुरुजनमात्मवच्च सुहृज्जनम् ॥ २२ ॥

प्रणिपातेन हि गुरून् सतोऽनूचानचेष्टितैः ।
कुर्वीताभिमुखान्भूत्यै देवान् सुकृतकर्मणा ॥ २३ ॥

स्वभावेन हरेन्मित्रं सद्भावेन च बान्धवान् ।
स्त्रीभृत्यान् प्रेमदानाभ्यां दाक्षिण्येनेतरं जनम् ॥ २४ ॥

अनिन्दा परकृत्येषु स्वधर्मपरिपालनम् ।
कृपणेषु दयालुत्वं सर्वत्र मधुरा गिरः ॥ २५ ॥

प्राणैरप्युपकारित्वं मित्रायाव्यभिचारिणे ।
गृहागते परिष्वङ्गः शक्त्या दानं सहिष्णुता ॥ २६ ॥

बन्धुभिर्बन्धुसंयोगः स्वजने चरितानि च ।
तच्चित्तानुविधायित्वमिति वृत्तं महात्मनाम् ॥ २७ ॥

सनातने वर्त्मनि साधु तिष्ठतामयं हि पन्था गृहमेधिनां मतः ।
अनेन गच्छन्नियतं महात्मनामिमं च लोकं परमं च विन्दति ॥२८॥

Kâmandaki Nîtisâra.

IV.

Chârudatta on poverty.

चारुदत्तः–(ऊर्ध्वमवलोक्य सनिर्वेदं निःश्वस्य)

यासां बलिः सपदि मद्गृहदेहलीनां
हंसैश्च सारसगणैश्च विलुप्तपूर्वः ।
तास्वेव संप्रति विरूढतृणाङ्कुरासु
बीजाञ्जलिः पतति कीटमुखावलीढः ॥ १ ॥

(इति मन्दं मन्दं परिक्रम्योपविष्टः) ।

विदूषकः– एष आर्य चारुदत्तः । तद् यावत्सांप्रतमुपसर्पामि । (उपसृत्य) स्वस्ति भवते । वर्द्धतां भवान् ।

चारु.– अये सर्वकालमित्रं मैत्रेयः प्राप्तः । सखे स्वागतम् । आस्यताम् ।

विदू.– यद्भवानाज्ञापयति । भो वयस्य एष ते प्रियवयस्येन चूर्णवृद्धेन जातिकुसुमवासितः प्रावारकोऽनुप्रेषितः सिद्धीकृतदेवकार्यस्य आर्यचारुदत्तस्य त्वया उपनेतव्य इति । (समर्पयति)

चारु.–(गृहीत्वा सचिन्तः स्थितः) ।

विदू.– भो इदं किं चिन्त्यते ।

चारु.— वयस्य

सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति ॥२॥

विदू.— भो वयस्य मरणाद्दारिद्र्याद्वा कतरत्ते रोचते ।

चारु.— वयस्य

दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम् ।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥ ३ ॥

विदू.— भो वयस्य अलं संतापितेन । प्रणयिजनसंक्रामितविभवस्य सुरजनपीतशेषस्य प्रतिपच्चन्द्रस्येव परिक्षयोऽपि तेऽधिकतरं रमणीयः ।

चारु.— वयस्य न ममार्थान्प्रति दैन्यम् । पश्य

एतत्तु मां दहति यद्गृहमस्मदीयं
क्षीणार्थमित्यतिथयः परिवर्जयन्ति ।
संशुष्कसान्द्रमदलेखमिव भ्रमन्तः
कालात्यये मधुकराः करिणः कपोलम् ॥ ४ ॥

विदू.— भो वयस्य एते खलु दास्याःपुत्रा अर्थकल्यवर्ता वरटाभीता इव गोपालदारका अरण्ये यत्र यत्र न खाद्यन्ते तत्र तत्र गच्छन्ति ।

चारु.— वयस्य

सत्यं न मे विभवनाशकृतास्ति चिन्ता
भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।
एतत्तु मां दहति नष्टधनाश्रयस्य
यत्सौहृदादपि जनाः शिथिलीभवन्ति ॥ ५ ॥

अपि च

दारिद्र्याद् ह्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो
निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥ ६ ॥

विदू.– भो वयस्य तमेव अर्थकल्पवर्तं स्मृत्वा अलं संतापितेन ।

चारु.–वयस्य दारिद्र्यं हि पुरुषस्य

निवासश्चिन्तायाः परपरिभवो वैरमपरं
जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम् ।
वनं गन्तुं बुद्धिर्भवति च कलत्रात्परिभवो
हृदिस्थः शोकाग्निर्न च दहति संतापयति च ॥ ७ ॥

तद्वयस्य कृतो मया गृहदेवताभ्यो बलिः । गच्छ त्वमपि चतुष्पथे मातृभ्यो बलिमुपहर ।

विदू.– न गमिष्यामि ।

चारु.– किमर्थम् ।

विदू.– यत एवं पूज्यमाना अपि देवता न ते प्रसीदन्ति । तत्को गुणो देवेष्वार्चितेषु ।

चारु.– वयस्य मा मैवम् । गृहस्थस्य नित्योऽयं विधिः

तपसा मनसा वाग्भिः पूजिता बलिकर्मभिः ।
तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः ॥ ८ ॥

तद्गच्छ मातृभ्यो बलिमुपहर ।

विदू.–भो न गमिष्यामि । अन्यः कोऽपि प्रयुज्यताम् । मम पुनर्ब्राह्मणस्य सर्वमेव विपरीतं परिणमति । आदर्शगता इव छाया वामतो दक्षिणा दक्षिणतो वामा । अन्यच्च एतस्यां प्रदोषवेलायामिह राजमार्गे गणिका विटाश्चेटाश्च राजवल्लभाः संचरन्ति । तस्मात् मण्डूक-लुब्धस्येव कालसर्पस्य मूषिक इव अभिमुखापतितो वध्य इदानीं भविष्यामि । त्वमिह उपविष्टः किं करिष्यसि ।

चारु.– भवतु तिष्ठ तावदहं समाधिं निर्वर्तयामि ।

Mrichchhakatika I.

V.

The Summer.

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सदावगाहक्षमवारिसंचयः
नितान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालः समुपागतः प्रिये ॥ १ ॥
निशाः शशाङ्कक्षतनीलराजयः क्वचिद्विचित्रं जलयन्त्रमन्दिरम् ।
मणिप्रकाराः सरसं च चन्दनं शुचौ प्रिये यान्ति जनस्य सेव्यताम् ॥२॥
असह्यवातोद्धतरेणुमण्डला प्रचण्डसूर्यातपतापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः प्रियावियोगानलदग्धमानसैः ॥ ३ ॥
मृगाः प्रचण्डातपतापिता भृशं तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविता निरीक्ष्य भिन्नाञ्जनसन्निभं नभः ॥ ४ ॥
रवेर्मयूखैरभितापितो भृशं विदह्यमानः पथि तप्तपांशुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः फणी मयूरस्य तले निषीदति ॥५॥

तृषा महत्या हतविक्रमोद्यमः श्वसन्मुहुर्भूरि विदारिताननः ।
न हन्त्यदूरेऽपि गजान्मृगाधिपो विलोलजिह्वश्चलिताग्रकेसरः ॥ ६ ॥
विशुष्ककण्ठोद्गतशीकराम्भसो गभस्तिभिर्भानुमतोऽभितापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो न दन्तिनः केसरिणोऽपि बिभ्यति ॥७॥
हुताग्निकल्पैः सवितुर्मरीचिभिः कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्तिनं कलापचक्रेषु निवेशिताननम् ॥ ८ ॥
बिवस्वता तीव्रतरांशुमालिना सपङ्कतोयात्सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः फणातपत्रस्य तले निषीदति ॥ ९ ॥
रविप्रभाभिन्नशिरोमणिप्रभो विलोलजिह्वाद्वयलीढमारुतः ।
बिषाग्निसूर्यातपतापितः फणी न हन्ति मण्डूककुलं तृषाकुलः ॥१०॥

पटुतरवनदाहात्प्लुष्टशस्यप्ररोहाः
परुषपवनवेगात्क्षिप्तसंशुष्कपर्णाः ।
दिनकरपरितापात्क्षीणतोयाः समन्ताद्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥ ११ ॥

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जम् ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥ १२ ॥

विकचनवकुसुम्भस्वच्छसिन्दूरभासाः
परुषपवनवेगोद्धूतवेगेन तूर्णम् ।
तरुविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥ १३ ॥

ध्वनति पवनविद्धः पर्वतानां दरीषु
  स्फुरति पटुनिनादः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
  क्षपयति मृगयूथं प्रान्तलग्नो दवाग्निः ॥ १४ ॥
बहुतर इव जातः शाल्मलीनां वनेषु
  स्फुरति कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखादुत्पतत्याशु वृक्षाद्
  भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ॥ १५ ॥
गजगवयमृगेन्द्रा वह्निसंतप्तदेहाः
  सुहृद इव समेता द्वन्द्वभावं विहाय ।
हुतवहपरिखेदादाशु निर्गत्य कक्षाद्
  विपुलपुलिनदेशान्निम्नगामाश्रयन्ते ॥ १६ ॥

Ritusamhâra I.

VI.

An old woman's tale.

एषोऽस्मि पर्यटन्नेकदा गतो विदेहेषु । मिथिलामप्रविश्यैव बहिः क्वचिन्मठिकायां विश्रमितुमेत्य कयापि वृद्धतापस्या दत्तपाद्यः क्षणमलिन्दभूमाववास्थिषि । तस्यास्तु मद्दर्शनादेव किमप्याबद्धधारमश्रु प्रावर्तत । किमेतदम्ब कथय कारणमिति पृष्टा सकरुणमाचष्ट । जैवातृक

ननु श्रूयते पतिरस्या मिथिलायाः प्रहारवर्मा नामासीत् । तस्य खलु मगधराजो राजहंसः परं मित्रमासीत् । तयोश्च वल्लभे बलशंबलयोरिव वसुमतीप्रियंवदे सख्यमप्रातिममधत्ताम् । अथ प्रथमगर्भाभिनन्दितां तां च प्रियसखीं वसुमतीं दिदृक्षुः प्रियंवदा सह भर्त्रा पुष्पपुरमगमत् । तस्मिन्नेव च समये मालवेन मगधराजस्य महज्जन्यमजनि । तत्र लेशतोऽपि दुर्लक्षां गतिमगमन्मगधराजः । मैथिलेन्द्रस्तु मालवेन्द्रप्रयत्नप्राणितः स्वविषयं प्रतिनिवृत्तो ज्येष्ठस्य संहारवर्मणः सुतैर्विकटवर्मप्रभृतिभिर्व्याप्तं राज्यमाकर्ण्य स्वस्त्रीयात्सुह्मपतेर्दण्डावयवमादित्सुरटवीपथमवगाह्य लुब्धकलुप्तसर्वस्वोऽभूत् । तत्सुतेन च कनीयसा हस्तवर्तिना सहैकाकिनी वनचरशरवर्षभयपलायिता वनमगाहिषि । तत्र च मे शार्दूलनखावलीढनिपतितायाः पाणिभ्रष्टः स बालकः कस्यापि कपिलाशवस्य क्रोडमभ्यलीयत । तच्छवाकर्षिणश्च व्याघ्रस्यासूनिषुरिष्वसनयन्त्रमुक्तः क्षणादलिक्षत् । भिल्लदारकैः स बालोऽपाहारि । सा त्वहं मोहसुप्ता केनापि वृष्णिपालेनोपनीय स्वं कुटीमावेश्य कृपयोपक्रान्तव्रणा स्वस्थीभूय स्वभर्तुरन्तिकमुपतिष्ठासुरसहायतया यावद्व्याकुलीभयामि तावन्ममैव दुहिता सह यूना केनापि तमेवोद्देशमागमत् । सा भृशं रुरोद । रुदितान्ते च सा सार्थघाते स्वहस्तगतस्य राजपुत्रस्य किरातभर्तृहस्तगमनमात्मनश्च केनापि वनचरेण व्रणविरोपणं स्वस्थायाश्च पुनस्तेनोपयन्तुं चिन्तितायां निकृष्टजातिसंसर्गवैक्लव्यात्प्रत्याख्यानपारुष्यं तदक्षमेण चामुना विविक्ते विपिने स्वशिरःकर्तनोद्यममनेन यूना यदृच्छया दृष्टेन तस्य दुरात्मनो हननमात्मनश्चोपयमनमित्यकथयत् । स तु पृष्टो मैथिलेन्द्रस्यैव कोऽपि सेवकः कारणविलम्बी तन्मा-

र्गानुसारी जातः । सह तेन भर्तुरन्तिकमुपसृत्य पुत्रवृत्तान्तेन श्रोत्रमस्य देव्याः प्रियंवदाथाश्वादहाव । स च राजा दिष्टदोषाज्ज्येष्ठपुत्रैश्चिरं विगृह्य पुनरसहिष्णुतयातिमात्रं चिरं प्रयुध्य बद्धः । देवी च बन्धनं गमिता । दग्धा पुनरहमस्मिन्नपि वार्द्धके हतजीवितमपारयन्ती हातुं प्रव्रज्यां किलाग्रहीम् । दुहिता तु मम हतजीविताकृष्टा विकटवर्म-महादेवीं कल्पसुन्दरीं किलाशिश्रियत् । तौ चेद्राजपुत्रौ निरुपद्रवावे-वावर्धिष्येतामियता कालेन तवेमां वयोवस्थामस्प्रक्ष्येताम् । तयोश्च सतोर्न दायादा नरेन्द्रस्य प्रसह्यकारिणो भवेयुरिति प्रमन्युरभिरुरोद ।

Dasakumâracharita.

— —

VII.

Krishna on the immortality of the soul.

संजय उवाच.

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥

श्रीभगवानुवाच ।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥
क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥ ३ ॥

अर्जुन उवाच ।

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्
॥ ५ ॥

संजय उवाच ।

एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः ।
न योत्स इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ६ ॥
तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ ७ ॥
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ८ ॥
देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ ९ ॥
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १० ॥

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ ११ ॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ १२ ॥

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥१३ ॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ १४ ॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ १५ ॥

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ १६ ॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥ १७ ॥

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ १८ ॥

स्वधर्ममपिचावेक्ष्य न विकाम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते ॥ १९ ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ २० ॥

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ २१ ॥

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ २२ ॥

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ २३ ॥

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ २४ ॥
हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ २५ ॥
सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ २६ ॥

Bhagavadgîtâ II.

VIII

The tale of Mahâsvetâ

Part I.

एतत्प्रायेण भवतः श्रुतिविषयमापतितमेव यथा विबुधसद्मन्यप्सरसो नाम कन्यकाः सन्तीति । तासां चतुर्दश कुलानि । गन्धर्वाणां तु दक्षात्मजाद्वितयसंभवं तदेव कुलद्वयं जातम् । तत्र मुनेस्तनयश्चित्रसेनादीनां पञ्चदशानां भ्रातृणामधिको गुणैः षोडशश्चित्ररथो नाम समुत्पन्नः । इतश्च नातिदूरे तस्यास्माद्भारतवर्षादुत्तरेणानन्तरे किंपुरुषनाम्नि वर्षे वर्षपर्वतो हेमकूटो नाम निवासः । अरिष्टायास्तु पुत्रस्तुम्बुरुप्रभृतीनां सोदर्याणां षण्णां ज्येष्ठो हंसो नाम जगाद्विदितो गन्धर्वस्तास्मिन्द्वितीये गन्धर्वकुले गन्धर्वराजेन चित्ररथेनैवाभिषिक्तो बाल एव राज्यपदमासादितवान् । अपरिमितगन्धर्वबलपरिवारस्य तस्यापि स एव गिरिरधिवासः । यत्तु तत्सोमयुखसंभवमप्सरसां कुलं तस्मात् त्रिभुवननयनाभिरामा भगवती द्वितीयेव गौरी गौरीति नाम्ना हिमकरकिरणावदात-

वर्णा कन्यका प्रसूता। सा तु भगवता मकरकेतनेनेव रतिः शरत्समये-नेव कमलिनी हंसेन संयोजिता सदृशसमागमोपजनितामतिमहतीं मुदमुपगतवती निखिलान्तःपुरस्वामिनी च तस्याभवत्।

तयोश्च तादृशयोर्महात्मनोरहमीदृशी विगतलक्षणा शोकाय केवलमनेकदुःखसहस्रभाजनमेकैवात्मजा समुत्पन्ना। तातस्त्वनपत्यतया सुतजन्मातिरिक्तेन महोत्सवेन मम जन्माभिनन्दितवान्। अवाप्ते च दशमेऽहनि कृतयथोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान्। साहं पितृभवने बालतया कलमधुरप्रलापिनी वीणेव गन्धर्वाणामङ्कादङ्कं संचरन्त्यविदितशोकायासमनोहरं शैशवमतीतवती। क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन मधुमास इव नवपल्लवेन नवपल्लव इव कुसुमेन कुसुम इव मधुकरेण मधुकर इव मदनेन नवयौवनेन पदम्।

अथ सकलजीवलोकहृदयानन्दकेषु मधुमासदिवसेष्वेकदाहमम्बया सह मधुमासविस्तारितशोभमिदमच्छोदं सरः स्नातुमभ्यागमम्। अत्र च त्र्यम्बकप्रतिबिम्बकानि वन्दमाना स्निग्धमनोहरतरोद्देशदर्शनलोभाक्षिप्तहृदया सह सखीजनेन व्यचरम्। अथैकस्मिंश्च प्रदेशे झटिति वनानिलेनोपनीतमनाघ्रातपूर्वममानुषलोकोचितं कुसुमगन्धमभ्याजिघ्रम्। कुतोऽयमित्युपारूढकुतूहला चाहं मुकुलितलोचना तेन कुसुमगन्धेन मधुकरीवाकृष्यमाणा कानिचित्पदानि गत्वा विलासमिव सरस्वत्याः स्वयंवरपतिमिव सर्वविद्यानां संकेतस्थानमिव सर्वश्रुतीनामात्मानुरूपेण सवयसाऽपरेण देवतार्चनकुसुमान्युच्चिन्वता तापसकुमारेणानुगतमतिमनोहरं स्नानार्थमागतं मुनिकुमारकमपश्यम्।

तेन च कर्णावतंसीकृतां वसन्तदर्शनानन्दितायाः स्मितप्रभामिव वनश्रियः कृत्तिकातारास्तबकानुकारिणीममृतबिन्दुनिस्यन्दिनीमदृष्टपूर्वां कुसुममञ्जरीमद्राक्षम्। अस्याः परिभूतान्यकुसुमामोदो नन्वयं परिमल इति मनसा निश्चित्य तं तपोधनयुवानमीक्षमाणाऽहमचिन्तयम्। अहो रूपातिशयनिष्पादनोपकरणकौशलस्याक्षीणता विधातुर्यत्त्रिभुवनाद्भुत-रूपसंभारं भगवन्तं कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपराशिरय-मपरो मुनिमायामयो मकरकेतुरुत्पादितः। मन्ये च सकलजगन्नयना-नन्दकरं शशिबिम्बं विरचयता प्रजापतिना प्रथममेतदाकारकरणकौश-लाभ्यास एव कृतोऽन्यथा किमिव हि सदृशवस्तुविरचनायाः कारणम्। इति विचिन्तयन्तीमेव मामविचारितगुणदोषविशेषो रूपैकपक्षपाती नव-यौवनसुलभः कुसुमायुधः कुसुमासवमद इव मधुकरीं परवशामकरोत्।

आसीच्च मम मनसि। शान्तात्मनि दूरीकृतमदनव्यतिकरेऽस्मिञ्जने मां निक्षिपता किमिदमनार्येणासदृशमारब्धं मनसिजेन। एवं च ना-मातिमूढं हृदयमङ्गनाजनस्य यदनुरागविषययोग्यतामपि विचारयितुं नालम्। क्वेदमतिभास्वरं धाम तेजसां तपसां च। क्व च प्राकृतजना-भिनन्दितानि मन्मथपरिस्पन्दितानि। सर्वथा यावदेव सचेतनास्मि याव-देव च न परिस्फुटमनेन विभाव्यते मे मदनदुश्चेष्टितलाघवमेतत्तावदे-वास्मात्प्रदेशादपसरणं श्रेयः। अशेषजनपूजनीया चेयं जातिरिति कृत्वा तस्मै प्रणाममकरवम्।

IX.

The tale of Mahâśvetâ

Part II

अथ कृतप्रणामायां मयि दुर्लङ्घ्यशासनतया भगवतो मनोभुवो मदजननतया च मधुमासस्यातिरमणीयतया च तस्य प्रदेशस्याविनयबहुलतया चाभिनवयौवनस्य चञ्चलप्रकृतितया चेन्द्रियाणां दुर्निवारतया च विषयाभिलाषाणां चपलतया च मनोवृत्तेस्तथा भवितव्यतया च तस्य तस्य वस्तुनः किं बहुना मम भाग्यदौरात्म्यादस्य चेदृशस्य क्लेशस्य विहितत्वात्तमपि मद्विकारदर्शनाहृतधैर्यं प्रदीपमिव पवनस्तरलतामनयदनङ्गः । तया तु तस्यातिप्रकटया विकृत्या द्विगुणीकृतमदनावेशा तत्क्षणमहमवर्णनयोग्यां कामप्यवस्थामन्वभवम् ।

प्राप्तप्रसरा चोपसृत्य तं द्वितीयमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छम् । भगवन्किमभिधानः कस्य वाऽयं तपोधनस्य युवा किंनाम्नश्च तरोरियमनेनावतंसीकृता कुसुममञ्जरी । जनयति हि मे मनसि महत्कौतुकमस्याः समुत्सर्पन्नसाधारणसौरभोऽयमनाघ्रातपूर्वो गन्ध इति। सोऽब्रवीत् । अयं श्वेतकेतोर्नामात्युदारतपसो मुनेरात्मजः पुण्डरीको नाम । इयं च पारिजातनाम्नः पादपस्य मञ्जरी नन्दनवनदेवतयाऽस्योपहारीकृतानेन कर्णपूरीकृता ।

इत्युक्तवति तस्मिन्स तपोधनयुवा किंचिदुपदर्शितस्मितो मामवादीत् । अयि कुतूहलिनि किमनेन प्रश्नायासेन । यदि रुचितसुरभिपरिमला गृह्यतामियमित्युक्त्वा समुपसृत्यात्मीयाच्छ्रवणादपनीय मदीये

श्रवणपुटे तामकरोत् । स मत्कपोलतलस्पर्शसुखेन तरलीकृताङ्गुलिजालकात्करतलादक्षमालां लज्जया सह गलितामपि नाज्ञासीत् । अथाहं तामसंप्राप्तामेव भूतलमक्षमालां गृहीत्वा सलीलं कण्ठाभरणतामनयम् ।

इत्थंभूते च व्यतिकरे छत्रग्राहिणी मामवोचद्भर्तृदारिके स्नाता देवी प्रत्यासीदति गृहगमनकालस्तत्क्रियतां मज्जनविधिरिति । अहं तु तेन तस्या वचनेन नवग्रहा करिणीव प्रथमाङ्कुशपातेनानिच्छयापि कथं कथमपि समाकृष्यमाणा तन्मुखाल्लावण्यामृतपङ्कमग्नामिव अतिकृच्छ्रेण दृष्टिमाकृष्य स्नातुमुदचलम् । उच्चलितायां च मयि द्वितीयो मुनिदारकस्तथाविधं तस्य धैर्यस्खलितमालोक्य किंचित्प्रकटितप्रणयकोप इवावादीत् ।

सखे पुण्डरीक नैतदनुरूपं भवतः । क्षुद्रजनक्षुण्ण एष मार्गः । धैर्यधना हि साधवः । किं यःकश्चित्प्राकृत इव विक्लवीभवन्तमात्मानं न रुणत्सि । कुतस्तवापूर्वोऽयमद्येन्द्रियोपप्लवो येनास्येवं कृतः । क्व ते तद्धैर्यम् । क्वासाविन्द्रियजयः । क्व तद्वशित्वं चेतसः । क्व सा प्रशान्तिः । क्व तत्कुलक्रमागतं ब्रह्मचर्यम् । क्व सा सर्वविषयनिरुत्सुकता । क्व ते गुरूपदेशाः । क्व तानि श्रुतानि । क्व ता वैराग्यबुद्धयः । क्व तद्रूपभोगविद्वेषित्वं । क्व सा सुखपराङ्मुखता । क्वासौ तपस्याभिनिवेशः । क्व सा संयमिता । क्व सा भोगानामुपर्यरुचिः । क्व तद्यौवनानुशासनम् । सर्वथा निष्फला प्रज्ञा निर्गुणो धर्मशास्त्राभ्यासो निरर्थकः संस्कारो निरुपकारको गुरुपदेशविवेको निष्प्रयोजना प्रबुद्धता निष्कारणं ज्ञानं यदत्र भवादृशा अपि रागाभिषङ्गैः कलुषीक्रियन्ते

प्रमादैश्चाभिभूयन्ते । कथं करतलाद्गलितामपहृतामक्षमालामपि न लक्षयसि । अहो विगतचेतनत्वम् । अपहृता नामेयम् । इदमपि तावदपह्रियमाणमनयाऽनार्यया निवार्यतां हृदयमिति ।

एवमभिधीयमानश्च तेन किंचिदुपजातलज्ज इव स प्रत्यवादीत् । सखे कपिञ्जल किं मामन्यथा संभावयसि । नाहमेवमस्या दुर्विनीतकन्यकाया मर्षयाम्यक्षमालाग्रहणापराधमिमम् । इत्यभिधायालीककोपकान्तेन प्रयत्नविरचितभीषणभ्रुकुटिभूषणेन मुखेन्दुना मामवदत् । चपले प्रदेशादस्मादिमामक्षमालामदत्त्वा पदात्पदमपि न गन्तव्यमिति । तच्च श्रुत्वाहमात्मकण्ठादुन्मुच्यैकावलीं भगवन्गृह्यतामक्षमालेति मन्मुखासक्तदृष्टेः शून्यहृदयस्यास्य प्रसारितपाणौ निधाय स्वेदसलिलस्नातापि पुनः स्नातुमवातरम् । उत्थाय च कथमपि प्रयत्नेन निम्नगेव प्रतीपं नीयमाना सखीजनेन बलादम्बया सह तमेव चिन्तयन्ती स्वभवनमयासिषम् । गत्वा च प्रविश्य कन्यान्तःपुरं ततः प्रभृति तद्विरहविधुरा किमागतास्मि किं तत्रैव स्थितास्मि किं परिवृतास्मि किमेकाकिन्यस्मि किं तूष्णीमास्मि किं प्रस्तुतालापास्मि किं जागर्मि किं सुप्तास्मि किं रोदिमि किं न रोदिमि किं दुःखमिदं किमुत्कण्ठेयं किं व्याधिरयं किं व्यसनमिदं किमुत्सवोऽयं किं दिवस एष किं निशेयं कानि रम्याणि कान्यरम्याणीति सर्वं नावागच्छम् । केवलमारुह्य कुमारीपुरप्रासादं विसर्ज्य च सखीजनं द्वारि निवारिताशेषपरिजनप्रवेशा सर्वव्यापारानुत्सृज्यैकाकिनी मणिजालगवाक्षनिक्षिप्तमुखी निष्पन्दमतिष्ठम् ।

Kâdambarî.

X.

Characteristics of strong-minded and spirited persons.

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ १ ॥

स्वल्पं स्नायुवसावशेषमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ती द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्वानुरूपं फलम् ॥ २ ॥

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुंगवस्तु
धीरं विलोकयति चाटुशतश्च भुङ्क्ते ॥ ३ ॥

कुसुमस्तबकस्येव द्वे गती स्तो मनस्विनाम् ।
मूर्ध्नि वा सर्वलोकस्य विशीर्येत वनेऽथवा ॥ ४ ॥

सन्त्यन्येपि बृहस्पतिप्रभृतयः संभाविताः पञ्चषा-
स्तानप्रत्येष विशेषविक्रमरुची राहुर्न वैरायते ।
द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भासुरौ
भ्रातः पर्वणि पश्य दानवपतिः शीर्षवशेषीकृतः ॥ ५ ॥

वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स विधार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह महतां निःसीमानश्चरित्रविभूतयः ॥ ६ ॥

वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चासौ संपातः पयसि पयसां पत्युरुचितः ॥ ७ ॥

यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः।
तत्तेजस्वी पुरुषः परकृतविकृतिं कथं सहते ॥ ८ ॥

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥ ९ ॥

Bhartrihari II.

XI.

A feigned quarrel between Chânakya and Chandragupta

Part I.

राजा– (स्वगतम्) राज्यं हि नाम राजधर्मानुवृत्तिपरस्य नृपतेर्महदप्रीतिस्थानम्। कुतः

परार्थानुष्ठाने रहयति नृपं स्वार्थपरता

परित्यक्तस्वार्थो नियतमयथार्थः क्षितिपतिः

परार्थश्चेत्स्वार्थादभिमततरो हन्त परवान्

परायत्तः प्रीतेः कथमिव रसं वेत्ति पुरुषः ॥ १ ॥

अन्यच्च । कृतककलहं कृत्वा स्वतन्त्रेण किंचित्कालान्तरं व्यवहर्त्तव्यमित्यार्यादेशः । स च कथमपि मया पातकमिवाभ्युपगतः । (प्रकाशम्) आर्य वैहीनरे सुगाङ्गमार्गमादेशय ।

कञ्चुकी– इत इतो देवः । (नाट्येन परिक्रम्य) अयं सुगाप्रासादः । शनैरारोहतु देवः ।

राजा– (नाट्येनारुह्य दिशोवलोक्य च) अहो शरत्समयसंभृतशोभानां दिशामतिरमणीयता । (समन्तान्नाट्येनावलोक्य) अये कथमप्रवृत्तकौमुदीमहोत्सवं कुसुमपुरम् । आर्य वैहीनरे । अथास्मद्वचनादाघोषितः कुसुमपुरकौमुदीमहोत्सवः ।

कञ्चु.– अथ किम् ।

राजा– तत्किं न गृहीतमस्मद्वचनं पौरैः ।

कञ्चु.– (कर्णौ पिधाय) शान्तं पापं शान्तं पापम् । पृथिव्यामस्खलितपूर्वं देवस्य शासनं कथं पौरेषु स्खलिष्यति ।

राजा – तत्कथमप्रवृत्तकौमुदीमहोत्सवमद्यापि कुसुमपुरम् ।

कञ्चु.– एवमेवैतत् ।

राजा– किमेतत् ।

कञ्चु.– देव इदम् ।

राजा– स्फुटं कथय ।

कञ्चु.– प्रतिषिद्धः कौमुदीमहोत्सवः ।

राजा– (सक्रोधम्) आः केन ।

कञ्चु.– देव नातःपरं विज्ञापयितुं शक्यम् ।

राजा– न खलु आर्यचाणक्येनापहृतः प्रेक्षकाणामतिशयरमणीयश्चक्षुषो विषयः ।

कञ्चु.– देव कोऽन्यो जीवितुकामो देवस्य शासनमतिवर्तेत ।

राजा– शोणोत्तरे उपवेष्टुमिच्छामि ।

प्रतीहारी– देव इदं सिंहासनम् ।

राजा– (नाट्येनोपविश्य) आर्य वैहीनरे आर्यचाणक्यं द्रष्टुमिच्छामि ।

कञ्चु.– यदाज्ञापयति देवः (इति चाणक्यमुपगम्य जानुभ्यां भूमौ निपत्य) जयत्वार्यः ।

चाण.– वैहीनरे किमागमनप्रयोजनम् ।

कञ्चु.– सुगृहीतनामधेयो देवश्चन्द्रगुप्त आर्यं शिरसा प्रणम्य विज्ञापयति । अकृतक्रियान्तरायमार्यं द्रष्टुमिच्छामीति ।

चाण.– वृषलो मां द्रष्टुमिच्छति । वैहीनरे न खलु वृषलश्रवणपथं गतोऽयं मत्कृतः कौमुदीमहोत्सवप्रतिषेधः ।

कञ्चु.– आर्य अथ किम् ।

चाण.– (सक्रोधम्) आः केन कथितम् ।

कञ्चु.– (सभयम्) प्रसीदत्वार्यः । स्वयमेव सुगाङ्गप्रासादगतेन देवेनावलोकितमप्रवृत्तकौमुदीमहोत्सवे पुरम् ।

चाण.– आः ज्ञातम् । ततो भवद्भिरन्तरा प्रोत्साह्य कोपितो वृषलः । किमन्यत् ।

कञ्चु.– (भयं नाटयंस्तूष्णीमधोमुखास्तिष्ठति) ।

चाण.– अहो राजपरिजनस्य चाणक्योपरि प्रद्वेषपक्षपातः । अथ क्व वृषलः ।

कञ्चु.– (भयं नाटयन्) आर्य सुगाङ्गगतेन देवेनाहमार्यपादमूलं प्रेषितः ।

चाण.–(उत्थाय) सुगाङ्गमार्गमादेशय ।

कञ्चु.– इत इत आर्यः । (उभौ परिक्रामतः) ।

कञ्चु.– एष सुगाङ्गप्रासादः । शनैरारोहत्वार्यः ।

चाण.– (नाट्येनारुह्यावलोक्य च) अये सिंहासनमध्यास्ते वृषलः । साधु साधु ।

नन्दैर्वियुक्तमनपेक्षितराजराजैरध्यासितं च वृषलेन वृषेण राज्ञाम् ।
सिंहासनं सदृशपार्थिवसंगतं च प्रीतिं परां प्रगुणयन्ति गुणा ममैते॥२॥

(उपसृत्य) विजयतां वृषलः ।

राजा– (आसनादुत्थाय) आर्य चन्द्रगुप्तः प्रणमति । (इति पादयोः पतति) ।

चाण.– (पाणौ गृहीत्वा) उत्तिष्ठोत्तिष्ठ वत्स ।

राजा (उत्थाय) तदुपविशत्वार्यः । (उभौ यथोचितमुपविष्टौ) ।

चाण.– वृषल किमर्थं वयमाहूताः ।

राजा– आर्यस्य दर्शनेनात्मानमनुग्राहयितुम् ।

चाण.– (सस्मितम्) अलमनेन प्रश्नयेण । न निष्प्रयोजनमधिकारवन्तः प्रभुभिराहूयन्ते ।

राजा – आर्य कौमुदीमहोत्सवप्रतिषेधस्य किं फलमार्यः पश्यति ।

चाण.– (स्मितं कृत्वा) उपालब्धुं तर्हि वयमाहूताः ।

राजा.– शान्तं पापं शान्तं पापम् । नहि नहि । विज्ञापयितुम् ।

चाण.– यद्येवं तर्हि विज्ञापनीयानामवश्यं शिष्येण स्वैररुचयो न निरोद्धव्याः ।

राजा– एवमेतत्कः संदेहः । किं तु न कदाचिदार्यस्य निष्प्रयोजना प्रवृत्तिरित्यस्ति नः प्रश्नावकाशः ।

चाण.– वृषल सम्यग्गृहीतवानसि न प्रयोजनमन्तरा चाणक्यः स्वप्नेऽपि चेष्टत इति ।

राजा– आर्य अत एव शुश्रुषा मां मुखरयति ।

चाण.- वृषल श्रूयताम् । इह खल्वर्थशास्त्रकारास्त्रिविधां सिद्धिमुपवर्णयन्ति राजायत्तां साचिवायत्तमुभयायत्तां चेति । ततः सचिवायत्तसिद्धेस्तव किं प्रयोजनान्वेषणेन । यतो वयमेवात्र नियुक्ता वेत्स्यामः ।

राजा– (सकोपं मुखं परावर्तयति) ।

(नेपथ्ये क्रोधोत्तेजनसमर्थौ श्लोकौ वैतालिकौ पठतः)

Mudrârâkshasa III.

XII.

A feigned quarrel between Chânakya and Chandragupta.

Part II.

राजा– आर्य वैहीनरे आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रं दापय ।

कञ्चु.– यदाज्ञापयति देवः । (इति उत्थाय परिक्रामति) ।

चाण.– (सक्रोधम्) वैहीनरे तिष्ठ न गन्तव्यम् । वृषल किमयमस्थाने महानर्थोत्सर्गः ।

राजा– (सकोपम्) आर्येणैवं सर्वत्र निरुद्धचेष्टाप्रसरस्य मे बन्धनमिव राज्यं न राज्यमिव ।

चाण.– वृषल स्वयमनभियुक्तानां राज्ञामेते दोषाः संभवन्ति । तद्यदि न सहसे ततः स्वयमभियुज्यस्व ।

राजा–एते स्वकर्मण्यभियुज्यामहे ।

चाण.– प्रियं नः । वयमपि स्वकर्मण्यभियुज्यामहे ।

राजा– यद्येवं तर्हि कौमुदीमहोत्सवप्रतिषेधस्य तावत्प्रयोजनं श्रोतुमिच्छामि ।

चाण.– वृषल कौमुदीमहोत्सवानुष्ठानस्य किं प्रयोजनमित्यहमपि श्रोतुमिच्छामि ।

राजा– प्रथमं तावन्ममाज्ञाव्याघातः ।

चाण.– वृषल ममापि तवाज्ञाव्याघात एव कौमुदीमहोत्सवप्रतिषे-

धस्य प्रथमं प्रयोजनम् । अथ त्वमपरमपि प्रयोजनं श्रोतुमिच्छसि तदपि कथयामि ।

राजा— कथ्यताम् ।

चाण.— शोणोत्तरे मद्वचनात्कायस्थमचलं ब्रूहि यत्तद्भद्रभटप्रभृतीनामितोपरागादपक्रम्य मलयकेतुमाश्रितानां लेखपत्रं दीयतामिति ।

प्रती.— यदार्य आज्ञापयति । (निष्क्रम्य पुनः प्रविश्य) आर्य इदं पत्रकम् ।

चाण — (गृहीत्वा) वृषल दृश्यतामिदम् ।

राजा— (आत्मगतं वाचयति) । (प्रकाशम्) आर्य एतावदेतत्पत्रकम् । अथैतेषामपरागहेतून्विज्ञातुमिच्छामि ।

(चाणक्यस्तान्कथयति)

राजा— एवमेतेषु परिज्ञातापरागहेतुषु क्षिप्रमेव कस्मान्न प्रतिविहितमार्येण ।

चाण.— वृषल न पारितं प्रतिविधातुम् ।

राजा— किमकौशलादुत प्रयोजनापेक्षया ।

चाण — कथमकौशलं भविष्यति । प्रयोजनापेक्षयैव ।

राजा— प्रयोजनमिदानीं श्रोतुमिच्छामि । (चाणक्यस्तदपि कथयति) ।

चाण.— तदेवमनुगृहीतास्मत्पक्षो राक्षसोपदेशप्रवणो महीयसा म्लेच्छबलेन परिवृतः पितृवधामर्षी पर्वतकपुत्रो मलयकेतुरस्मानभियोक्तुमुद्यतः । सोऽयं व्यायामकालो नोत्सवकाल इति दुर्गसंस्कारे प्रारब्धव्ये किं कौमुदीमहोत्सवेनेति प्रतिषिद्धः ।

राजा— आर्य बहु प्रष्टव्यमत्र ।

चाण.-- वृषल विश्रब्धं पृच्छ । ममापि बह्वाख्येयमत्र ।

राजा-- सोऽप्यस्य सर्वस्यानर्थस्य हेतुर्मलयकेतुः कस्मादपक्रामन्नुपेक्षितः ।

चाण. — वृषल अनुपेक्षणे द्वयी गतिः । निगृह्येत वा प्रतिश्रुतं राज्यार्द्धं प्रतिपाद्येत वा । निग्रहे तावत्पर्वतकोऽस्माभिरेव व्यापादित इति कृतघ्नतायाः स्वहस्तो दत्तः स्यात् । प्रतिश्रुतराज्यार्द्धप्रतिपादनेऽपि पर्वतकविनाशः केवलं कृतघ्नतामात्रफलः स्यादिति मलयकेतुरपक्रामन्नुपेक्षितः ।

राजा— अत्र तावदेवम् । राक्षसः पुनरिहैव वर्तमान आर्येणोपेक्षित इत्यत्र किमुत्तरमार्यस्य ।

चाण.-- राक्षसोऽपि स्वामिनि स्थिरानुरागित्वात्सुचिरमेकत्र वासाच्च शीलज्ञानां नन्दानुरक्तानां प्रकृतीनामत्यन्तविश्वास्यः प्रज्ञापुरुषकाराभ्यामुपेत इहैवान्तर्नगरे वर्तमानः खलु महान्तमन्तःकोपमुत्पादयेत् दूरीकृतस्तु बाह्यकोपमुत्पादयन्नपि कथमप्युपायैर्वशयितुं शक्य इत्ययमत्रस्थ एव हृदयेशयः शङ्कुरिवोद्धृत्य दूरीकृतः ।

राजा-- आर्य कस्माद्विक्रम्य न गृहीतः ।

चाण.-- राक्षसः खल्वसौ । विक्रम्य गृह्यमाणो युष्मद्बलानि बहूनि नाशयेत्स्वयं वा विनश्येत् । एवं सत्युभयथापि दोषः ।

राजा-- न शक्नुमो वयमार्यस्य मतिमतिशयितुम् । सर्वथा अमात्यराक्षस एवात्र प्रशस्यतरः ।

चाण.– (सक्रोधम्) न भवानिति वाक्यशेषः । भो वृषल तेन किं कृतम् ।

राजा-- श्रूयताम् । तेन खलु महात्मना--

लब्धायां पुरि यावदिच्छमुषितं कृत्वा पदं नो गले
व्याघातो जयघोषणादिषु बलादस्मद्बलानां कृतः ।
अत्यर्थं विपुलैः स्वनीतिविभवैः संमोहमापादिता
विश्वास्येष्वपि विश्वसन्ति मतयो न स्वेषु वर्गेषु नः ॥१॥

चाण.-- (विहस्य) एतत्कृतं राक्षसेन । वृषल मया पुनर्ज्ञातं नन्दमिव भवन्तमुद्धृत्य भवानिव भूतले मलयकेतू राजाधिराजपदे नियोजित इति ।

राजा– अन्येनैवेदमनुष्ठितं किमत्रार्यस्य ।

चाण.-- हे मत्सरिन् सकलरिपुकुलोत्सादर्दीर्घां प्रतिज्ञामारुह्य केनान्येनावलिप्ता नवनवतिशतद्रव्यकोटीश्वरास्ते नन्दाः पश्यतो राक्षसस्य पर्यायभूताः पशव इव हताः ।

राजा– अन्येनैवेदमनुष्ठितम् ।

चाण.-- आः केन ।

राजा– नन्दकुलविद्वेषिणा दैवेन ।

चाण.-- दैवमविद्वांसः प्रमाणयन्ति ।

राजा– विद्वांसोऽप्यविकत्थना भवन्ति ।

चाण.-- (सकोपम्) वृषल भृत्यमिव मामारोढुमिच्छसि ।

शिखां मोक्तुं बद्धामपि पुनरयं धावति करः

(भूमौ पादं प्रहृत्य)

प्रतिज्ञामारोढुं पुनरपि चलत्येष चरणः ।
प्रणाशान्नन्दानां प्रशममुपयातं त्वमधुना
परीतः कालेन ज्वलयसि मम क्रोधदहनम् ॥ २ ॥

राजा– (सावेगमात्मगतम्) अये अयं सत्यमेवार्यः कुपितः ।

चाण.– (कृतककोपं संहृत्य) वृषल वृषल अलमुत्तरोत्तरेण । यद्यस्मत्तो गरीयान्राक्षसोऽत्रगम्यते तदिदं शस्त्रं तस्मै दीयताम् । (इति शस्त्रमुत्सृज्योत्थाय चाकाशे लक्ष्यं बद्ध्वा स्वगतम्) । राक्षस राक्षस एष भवतः कौटिल्यबुद्धिविजिगीषोर्बुद्धेः प्रकर्षः ।

चाणक्यतश्चलितभक्तिमहं सुखेन जेष्यामि मौर्यमिति संप्रति यः प्रयुक्तः ।
भेदः किलैष भवता सकलः स एव संपत्स्यते शठ तवैव हि दूषणाय॥३॥

(इति निष्क्रांतः) ।

राजा-- आर्य वैहीनरे अतः प्रभृत्यनादृत्य चाणक्यं चन्द्रगुप्तः स्वयमेव राज्यं करिष्यतीति गृहीतार्थाः क्रियन्तां प्रकृतयः ।

कञ्चु.– (आत्मगतम्) । कथं निरुपपदमेव चाणक्यमिति नार्यचाणक्यमिति । हन्त संगृहीतोऽधिकारः । अथवा न खल्वत्र वस्तुनि देवदोषः । कुतः

स दोषः सचिवस्यैव यदसत्कुरुते नृपः ।
याति यन्तुः प्रमादेन गजो व्यालत्वमाच्यताम् ॥ ४ ॥

राजा-- आर्य किं विचारयसि ।

कञ्चु.– देव न किंचित् । दिष्ट्या देव इदानीं देवः संवृत्तः ।

राजा.-- (आत्मगतम्) एवमस्मासु गृह्यमाणेषु स्वकार्यसिद्धिकामः सकामो भवत्वार्यः । (प्रकाशम्) शोणोत्तरे अनेन शुष्ककलहेन शिरोवेदना मां बाधते । शयनगृहमादेशय ।

प्रती.-- एतु एतु देवः ।

राजा-- (आत्मगतम्)

आर्याज्ञयैव मम लङ्घितगौरवस्य बुद्धिः प्रवेष्टुमिव भूविवरं प्रवृत्ता ।
ये सत्यमेव हि गुरूनतिपातयन्ति तेषां कथं नु हृदयं न भिनत्ति लज्जा ॥५॥

Mudrârâkshasa III.

XIII.

The tale of Mahâs'vetâ.

Part III.

अथ ताम्बूलकरङ्कवाहिनी मदीया तरलिका नाम मयैव सह गता स्नातुमासीत् । सा पश्चाच्चिरादिवागत्य तथावस्थितां शनैर्मामवादीत् । भर्तृदारिके यौ तौ तापसकुमारकौ दिव्याकारावस्माभिरच्छोदसरस्तीरे दृष्टौ तयोरेको येन भर्तृदुहितुरियमवतंसीकृता सुरतरुकुसुममञ्जरी स तस्माद् द्वितीयादात्मनो रक्षन्दर्शनमतिनिभृतपदः कुसुमितलतासंतानगहनान्तरेणोपसृत्य मामागच्छन्तीं पृष्ठतो भर्तृदारिकामुद्दिश्याप्राक्षीत् । बालिके केयं कन्यका कस्य वापत्यं किमभिधाना क वा गच्छतीति । मयोक्तमेषा खलु भगवतः श्वेतभानोरंशुसंभूतायामप्सरसि गौर्यां समुत्पन्ना देवस्य गन्धर्वाधिपतेर्हंसस्य दुहिता महाश्वेता नाम गन्धर्वाधिवासं

हेमकूटमचलवरमभिप्रस्थिता । इति कथिते च मया किमपि चिन्तयन्मुहूर्तमिव तूष्णीं स्थित्वा विगतनिमेषेण चक्षुषा चिरमभिवीक्षमाणो मां सानुनयमर्थितामिव दर्शयन्पुनराह । बालिके कल्याणिनी तवाविसंवादिन्यचपला बालभावेऽप्याकृतिरियं तत्करोषि मे वचनमेकमभ्यर्थ्यमानेति । ततो मया सविनयमुपरचिताञ्जलिपुटया स दर्शितादरमभिहितः । भगवन्कस्मादेवमभिधत्से काहं महात्मनः । सकलत्रिभुवनपूजनीयास्त्वादृशाः पुण्यैर्विना निखिलकल्मषापहारिणीमस्मद्विधेषु दृष्टिमपि न पातयन्ति किं पुनराज्ञाम् । तद्विस्रब्धमादिश्यतां कर्तव्यमनुगृह्यतामयं जन इति । एवमुक्तश्च मया सस्नेहया सखीमिवोपकारिणीमिव प्राणप्रदामिव दृष्टया मामभिनन्द्य निकटवर्तिनस्तमालपादपात्पल्लवमादाय निष्पीड्य तटशिलातले तेन गन्धगजमदसुरभिपरिमलेन रसेनोत्तरीयवल्कलैकदेशाद्विपाट्य पट्टिकां स्वहस्तकमलकनिष्ठिकानखशिखरेणाभिलिख्येयं पत्रिका त्वया तस्यै कन्यकायै प्रच्छन्नमेकाकिन्यै देयेत्यभिधायार्पितवान् । इत्युक्त्वा च सा तांबूलभाजनादाकृष्य तामदर्शयत् । अहं तु तस्याः करतलादादाय वल्कलपट्टिकां तस्यामिमामभिलिखितामार्यामपश्यम् ।

दूरं मुक्तालतया बिससितया विप्रलोभ्यमानो मे ।
हंस इव दर्शिताशो मानसजन्मा त्वया नीतः ॥

ततः सानन्दाहं तरलिके कथय कथं स त्वया दृष्टः किं किमभिहितासि तेन कियन्तं कालमवस्थितासि तत्र कियदनुसरन्नस्मानसावागत

इति पुनः पुनः पर्यपृच्छम् । अनयैव च कथया तया सह तस्मिन्नेव प्रासादे तथैव प्रतिषिद्धाऽशेषपरिजनप्रवेशा दिवसमत्यवाहयम् ।

अथास्तं गते भगवति रवौ सा छत्रग्राहिणी समागत्याकथयत् । भर्तृदारिके तयोर्मुनिकुमारयोरन्यतरो द्वारि तिष्ठति कथयति चाक्षमालामुपयाचितुमागमतोऽस्मीति । अहं तु मुनिकुमारनामग्रहणादेव स्थानस्थितापि गतेव द्वारदेशं समुपजाततदागमनाशङ्का समाहूयान्यतमं कञ्चुकिनं गच्छ प्रवेशयतामित्यादिश्य प्राहिणवम् । अथ मुहूर्तादिव तं तस्यानुरूपं सखायमृषिकुमारं कपिञ्जलनामानं जराधवलस्य कञ्चुकिनोऽनुमार्गेणागच्छन्तमपश्यम् । अन्तिकमुपगतस्य चास्य पर्याकुलमिव सविषादमिवाकारमलक्षयम् । उत्थाय च कृतप्रणामा सादरं स्वयमासनमुपाहरम् । उपविष्टस्य च बलादनिच्छतोऽपि प्रक्षाल्य चरणावपमृज्य चोत्तरीयांशुकपल्लवेनाव्यवधानायां भूमावेव तस्यान्तिके समुपाविशम् । अथ मुहूर्तमिव स्थित्वा किमपि विवक्षुरिव स तस्यां मत्समीपोपविष्टायां तरलिकायां चक्षुरपातयत् । अहं तु विदिताभिप्राया दृष्ट्वैव भगवन्नव्यतिरिक्तेयमस्मच्छरीरादशङ्कितमभिधीयतामित्यवोचम् ।

एवमुक्तस्तु मया कपिञ्जलः प्रत्यवादीत् । राजपुत्रि किं ब्रवीमि । वागेव मे नाभिधेयविषयमवतरति त्रपया । क्व कन्दमूलफलाशी शान्तो वनवासनिरतो मुनिजनः क्व वायमशान्तजनोचितो विषयोपभोगाभिलाषकलुषो मन्मथविविधविलाससंकटो रागप्रायः प्रपञ्चः । सर्वमेवानुपपन्नमालोकय किमारब्धं दैवेन । अयत्नेनैव खलूपहासास्पदतामीश्वरो

नयति जनम् । न जाने किमिदं वल्कलानां सदृशमुताहो जटानां समुचितं किं तपसोनुरूपमाहोस्विद्धर्मकर्मोपदेशाङ्गमिदम् । अपूर्वेयं विडम्बना । केवलमवश्यकथनीयमिदमपर उपायो न दृश्यतेऽन्या प्रतिक्रिया नोपलभ्यतेऽन्यच्छरणं नालोक्यतेऽन्या गतिर्नास्ति । अकथ्यमाने च महाननर्थोपनिपातो जायते प्राणपरित्यागेनापि रक्षणीयाः सुहृदसव इति कथयामि । अस्ति भवत्याः समक्षमेव स मया तथा प्रणयप्रदर्शितकोपेनाभिहितः । तथा चाभिधाय परित्यज्य तं तस्मात्प्रदेशादुपजातमन्युरुत्सृष्टकुसुमावचयोऽन्यं प्रदेशमगमम् । अपयातायां भवत्यां मुहूर्तमिव स्थित्वैकाकी किमयमिदानीमाचरतीति सञ्जातवितर्कः प्रतिनिवृत्य विटपान्तरितविग्रहस्तं प्रदेशं व्यलोकयम् । यावत्तत्र तं नाद्राक्षमासीच्च मे मनस्येवम् । किं नु मदनपरायत्तचित्तवृत्तिस्तामेवानुसरन् गतो भवेत् । गतायां च तस्यां लब्धचेतनो लज्जया न शक्नोति मे दर्शनपथमुपगन्तुम् । आहोस्वित्कुपितः परित्यज्य मां गतः । उतान्वेषमाणो मामेव प्रदेशमन्यमितः समाश्रितः स्यादित्येवं विकल्पयन् कंचित्कालमतिष्ठम् । तेन तु जन्मनः प्रभृत्यनभ्यस्तेन तस्य क्षणमप्यदर्शनेन दूयमानः पुनरचिन्तयम् । स कदाचिद्धैर्यस्खलनविलक्षः किंचिदनिष्टमपि समाचरेत् । न हि किंचिन्न क्रियते ह्रिया । तन्न युक्तमेनमेकाकिनं कर्तुमित्यवधार्यान्वेष्टुमादरमकरवम् । अन्वेषमाणश्च यथा यथा नापश्यं तं तथा तथा सुहृत्स्नेहकातरेण मनसा तत्तदशोभनमाशङ्कमानस्तरुलतागहनानि चन्दनवीथिका लतामण्डपान्सरःकूलानि च वीक्षमाणो निपुणमितस्ततो दत्तदृष्टिः सुचिरं व्यचरम् ।

अथैकस्मिँल्लतागहने कृतावस्थानमुत्सृष्टसकलव्यापारतया लिखितमिवोत्कीर्णमिव स्तम्भितमिवोपरतमिव प्रसुप्तमिव योगसमाधिस्थमिव मदनमयमिव परायत्तचित्तवृत्तिं परां कोटिमधिरूढं मन्मथावेशस्यानभिज्ञेयपूर्वाकारं तमहमद्राक्षम् ।

अपगतनिमेषेण चक्षुषा तदवस्थं चिरमुद्वीक्ष्य समुपजातविषादो वेपमानेन हृदयेनाचिन्तयम् । एवं नामायमतिदुर्विषहवेगो मकरकेतुर्येनानेन क्षणेनायमीदृशमवस्थान्तरमप्रतीकारमुपनीतः । कथमेवमेकपदे व्यर्थीभवेदेवंविधो ज्ञानराशिः । अहो बत महच्चित्रं तथा नामायमाशैशवाद्धीरप्रकृतिरस्खलितवृत्तिर्मम चान्येषां च मुनिकुमारकाणां स्पृहणीयचरित आसीत् । अद्य त्वितर इव परिभूय ज्ञानमविगणय्य तपःप्रभावमुन्मूल्य गाम्भीर्यं मन्मथेन जडीकृतः । सर्वथा दुर्लभं यौवनमस्खलितमित्युपसृत्य च तस्मिन्नेव शिलातलैकपार्श्वे समुपविश्यांसदेशावसक्तपाणिस्तमनुन्मीलितलोचनमेव सखे पुण्डरीक कथय किमिदमित्यपृच्छम् । अथ प्रयत्नेन चक्षुरुन्मील्य मन्थरया दृष्ट्या सुचिरं विलोक्य मामायततरं निःश्वस्य लज्जाविशीर्यमाणविरलाक्षरं सखे कपिञ्जल विदितवृत्तान्तोऽपि किं मां पृच्छसीति कृच्छ्रेण शनैरवदत् । अहं तु तदाकर्ण्य तदवस्थस्यैवाप्रतीकारविकारोऽयं तथापि सुहृदा सुहृदसन्मार्गप्रवृत्तो यावच्छक्तितः सर्वात्मना निवारणीय इति मनसावधार्याब्रवम् ।

XIV.

The tale of Mahâs'vetâ.

Part IV.

सखे पुण्डरीक सुविदितमेतन्मम । केवलमिदमेव पृच्छामि यदेतदारब्धं भवता किमिदं गुरुभिरूपदिष्टमुत धर्मशास्त्रेषु पठितमुत धर्मार्जनोपायोयमुतापरस्तपसां प्रकार उत स्वर्गगमनमार्गोऽयमुत व्रतरहस्यमिदमुत मोक्षप्राप्तियुक्तिराहोस्विदन्यो नियमप्रकारः । कथमेतद्युक्तं भवतो मनसापि चिन्तयितुं किं पुनराख्यातुमीक्षितुं वा कथय किमप्रबुद्ध इवानेन मन्मथहतकेनोपहासास्पदतां नीयमानमात्मानं नावबुध्यसे । मूढो हि मदनेनायास्यते । का वा सुखाशा साधुजननिन्दितेष्वेतेष्वंविधेषु विषयेषु भवतः । स खलु धर्मबुद्ध्या विपलतावनं सिञ्चति कुवलयमालेति निस्त्रिंशलतामालिङ्गति कृष्णागुरुधूमलेखेति कृष्णसर्पमवगूहते महारत्नमिति ज्वलन्तमङ्गारमभिस्पृशति मूढो विषयोपभोगेष्वनिष्टानुबन्धिषु यः परिणतिविरसेषु सुखबुद्धिमारोपयति । अधिगतविषयतत्त्वोऽपि कस्मात्खद्योत इव ज्योतिर्निर्वीर्यमिदं ज्ञानमुद्वहसि यतो न निवारयसि प्रबलरजःप्रसरकलुषितानि स्रोतांसीवोन्मार्गप्रस्थितानीन्द्रियाणि न नियमयसि वा क्षुभितं मनः । कोऽयमनङ्गो नाम । धैर्यमवलम्ब्य निर्भर्त्स्यतामयं दुराचारः । इत्येवं वदत एव मे वचनमाक्षिप्य प्रतिपक्ष्मान्तरालप्रवृत्तबाष्पवेणिकं प्रमृज्य चक्षुः करतलेन पाणौ मामवलम्ब्यावोचत् । सखे किं बहुनोक्तेन । सर्वथा सुस्थोस्याशीविषवेगविषमाणामेतेषां कुसुमचापसायकानां पतितोसि न गोचरे । सुखमु-

पदिश्यते परस्य । यस्य चेन्द्रियाणि सन्ति मनो वा विद्यते यः पश्यति वा शृणोति वा श्रुतमवधारयति वा यो वा शुभमिदमशुभमिदमिति विवेक्तुमलं स खलूपदेशमर्हति । मम तु सर्वमेवेदमतिदूरापेतम् । अवष्टम्भो ज्ञानं धैर्यं प्रतिसंख्यानमित्यस्तमितैषा कथा । कथमप्येवमेवायत्नाविधृतास्तिष्ठन्त्यत्यसवः । दूरातीतः खलूपदेशकालः समतिक्रान्तो धैर्यावसरः । गता प्रतिसंख्यानवेला । अतीतो ज्ञानावष्टम्भसमयः । केन वान्येनास्मिन्समये भवन्तमपहायोपदेष्टव्यमुन्मार्गप्रवृत्तिनिवारणं वा करणीयं कस्यान्यस्य वा वचसि मया स्थातव्यं को वाऽपरस्त्वत्समो मे जगति बन्धुः । किं करोमि यन्न शक्नोमि निवारयितुमात्मानम् । इयमनेनैव क्षणेन भवता दृष्टावस्था । तद्गत इदानीमुपदेशकालः । यावत्प्राणिमि तावदस्य कल्पान्तोदितद्वादशदिनकरकिरणातपतीव्रस्य मदनसंतापस्य प्रतिक्रियां क्रियमाणामिच्छामि । पच्यन्त इव मेऽङ्गान्युत्क्वथ्यत इव हृदयं प्लुष्यत इव दृष्टिर्ज्वलतीव शरीरम् । अत्र यत्प्राप्तकालं तत्करोतु भवानित्यभिधाय तूष्णीमभवत् ।

एवमुक्तोऽप्यहमेनं प्राबोधयं पुनः । यदा सानुनयं सोपग्रहं चाभिधीयमानोऽपि नाकरोत्कर्णे तदाहमचिन्तयम् । अतिभूमिमयं गतो न शक्यते निवर्तयितुमितीदानीं निरर्थकाः खलूपदेशाः । तत्प्राणपरिरक्षणेऽपि तावदस्य यत्नमाचरामीति कृतमतिरुत्थाय गत्वा तस्मात्सरसः सरसा मृणालिकाः समुद्धृत्य कमलिनीपलाशानि जललवलाञ्छितानि चादाय कुमुदकुवलयकमलानि गृहीत्वागत्य तास्मिन्नेव लता गृहशिलातले शयनमस्याकल्पयम् । तत्र च सुखनिषण्णस्य प्रत्यासन्नवर्तिनां चन्दन-

विटपिनां मृदूनि किसलयानि निष्पीड्य तेन स्वभावसुरभिणा तुषाराशिशिरेण रसेन ललाटिकामकल्पयमाचरणतलादङ्गचर्चां चारचयम् । कदलीदलेन च व्यजनक्रियामन्वतिष्ठम् । आसीच्च मे मनसि चिन्ता नास्ति खल्वसाध्यं नाम भगवतो मनोभुवः । क्वायं हरिण इव वनवासनिरतः स्वभावमुग्धो जनः क्व च विविधविलासरसराशिर्गन्धर्वराजपुत्री महाश्वेता । सर्वथा न हि किंचिदस्य दुर्घटं दुष्करमनायत्तमकर्तव्यं वा जगति । न चायं केनापि प्रतिकूलयितु शक्यते । का वा गणना सचेतनेष्वपगतचेतनान्यपि संघट्टयितुमलं यद्यस्मै रोचते । किं वा तस्य दुःसाध्यमपरमेवंविधो येनायमगाधगाम्भीर्यसागरस्तृणलवलघुतामुपनीतः । क्व तत्तपः क्वेयमवस्था । सर्वथा निष्प्रतीकारेयमापदुपस्थिता । किमिदानीं कर्तव्यं किमाचेष्टितव्यं कां दिशं गन्तव्यं किं शरणं कश्चोपायः कः सहायः कः प्रकारः का युक्तिः कः समाश्रयो येनास्यासवः संधार्यन्ते । इत्येते च चाऽन्ये च मे विषण्णहृदयस्य संकल्पाः प्रादुरासन् । पुनश्चाचिन्तयम् । किमनया निष्प्रयोजनया चिन्तया । प्राणास्तावदस्य येन केनाचिदुपायेन शुभेनाशुभेन वा रक्षणीयाः । तेषां च त्वत्समागममेकमपहाय नास्त्यपरः संरक्षणोपायः । अकालान्तरक्षमश्चायमस्य मदनविकारः । सततमतिगर्हितेनाकृत्येनापि परिरक्षणीयान् मन्यन्ते सुहृदसून्साधवः । तदतिह्रेपणमकर्तव्यमप्येतदस्माकमवश्यकर्तव्यतामापतितम् । किं चान्यत्क्रियते कान्या वा गतिः । सर्वथा प्रयामि तस्याः सकाशमावेदयाम्येतामवस्थामिति चिन्तयित्वा च कदाचिदनुचितव्यापारप्रवृत्तं मां विज्ञाय संजातलज्जो निवारयेदि-

त्यनिवेद्यैव तस्मै तत्प्रदेशात्सव्याजमुत्थायागतोऽहम् । तदेवमवस्थिते यदत्रावसरप्राप्तमीदृशस्य चानुरागस्य सदृशमस्मदागमनस्य चानुरूपमात्मनो वा समुचितं तत्र प्रभवति भवतीत्यभिधाय किमियं वक्ष्यतीति मन्मुखासक्तदृष्टिस्तूष्णीमासीत् ।

अहं तु तदाकर्ण्य सुखामृतमये ह्रद इव निमग्ना सर्वानन्दानामुपरि वर्तमाना सर्वमनोरथानामप्रमितावधिरूढा अमलैरानन्दबाष्पजलबिन्दुभिः स्रवद्भिरावेद्यमानप्रहर्षप्रसरा तत्क्षणमचिन्तयम् । दिष्ट्या तावदयमनङ्गो मामिव तमप्यनुबध्नाति यत्सत्यमनेन मे संतापयतापि कियताप्यंशेन दर्शितानुकूलता । यदि च सत्यमेव तस्येदृशी दशा ततः किमिव नोपकृतमनेन किं वा नोपपादितं को वाऽनेनापरः समानो बन्धुः । कथं वा कपिञ्जलस्य स्वप्नेऽपि वितथा भारती प्रशान्ताकृतेरस्माद्वदनान्निष्क्रामति । इत्थंभूते किं मयापि प्रतिपत्तव्यं तस्य वा पुरः किमभिधातव्यमित्येवं विचारयन्त्या एव प्रविश्य ससंभ्रमा प्रतीहार्यवोचत् । भर्तृदारिके त्वमस्वस्थशरीरेति परिजनादुपलभ्य महादेवी प्राप्तेति । तच्च श्रुत्वा कपिञ्जलो महाजनसंमर्दभीरुः सत्वरमुत्थाय राजपुत्रि महानयमुपस्थितः कालातिपातो भगवांश्च भुवनत्रयचूडामणिरस्तमुपगच्छति दिवसकरस्तद्गच्छामि । सर्वथाभिमतसुहृत्प्राणरक्षादक्षिणार्थमयमुपरचितोऽञ्जलिरेष मे परमो विभव इत्यभिधाय प्रतिवचनकालमप्रतीक्ष्यैव सर्वतः संरुद्धे द्वारदेशे कथमप्यवाप्तनिर्गमः प्रययौ । अम्बा तु मत्समीपमागत्य सुचिरं स्थित्वा स्वभवनमयासीत् । तया तु तत्रागत्य किं कृतं किमभिहितं किमाचेष्टितमिति शून्यहृदया सर्वं नालक्षयम् ।

XV.

The tale of Mahâsvetâ.

Part V.

गतायां च तस्यां रजनिकरमुदितं दृष्ट्वा हृदयेशं संभावयितुं तरलिकया सहोदतिष्ठम्। उच्चलितायां तु मे दुर्निमित्तनिवेदकमस्पन्दत दाक्षिणं लोचनम्। उपजातशङ्का चाचिन्तयमिदमपरं किमुपक्षिप्तं दैवेनेति। अथ नातिदूरोदितेन चन्द्रमण्डलेनाप्लाव्यमाने ज्योत्स्नया भुवनान्तराले तथैव च तया कण्ठस्थिताक्षमालया श्रवणशिखरचुम्बिन्या च पारिजातमञ्जर्या पद्मरागरत्नरश्मिनिर्मितेनेव रक्तांशुकेन कृतशिरोवगुण्ठना केनचिदात्मीयेनापि परिजनेनानुपलक्ष्यमाणा तस्मात्प्रासादशिखरादवातरम्।

अवतीर्य च प्रमदवनपक्षद्वारेण निर्गत्य तत्समीपमुदचलम्। तत्र च मार्गलताकुसुमरजोधूसरं चरणयुगलं कैलासतटाचन्द्रोदयस्रुतचन्द्रकान्तमणिप्रस्रवेण प्रक्षालयन्ती यस्मिन्प्रदेशे स आस्ते तस्मिन्नेव चास्य सरसः पश्चिमे तटे पुरुषस्येव रुदितध्वनिं विप्रकर्षान्नातिव्यक्तमुपालक्षयम्। दाक्षिणेक्षणस्फुरणेन च प्रथममेव मनस्याहितशङ्का तेन सुतरामवदीर्णहृदयेव किमप्यनिष्टमन्तः कथयतेव विषण्णेनान्तरात्मना तरलिके किमिदमिति सभयमभिदधाना वेपमानगात्रयष्टिस्तदभिमुखमतित्वरितमगच्छम्।

अतिनिशीथप्रभावाद्दूरादेव विभाव्यमानस्वरमुन्मुक्तार्त्तनादं विलपन्तं कपिञ्जलमश्रौषम्। हा हतोऽस्मि हा दग्धोऽस्मि हा वञ्चितोऽस्मि हा

किमिदमापतितं किं वृत्तम् । उत्सन्नोऽस्मि । दुरात्मन्मदनपिशाच पाप निर्घृण किमिदमकृत्यमनुष्ठितम् । आः पापे दुष्कृतकारिणि महाश्वेते दुर्विनीते किमनेन तेऽपकृतम् । आः पाप दुश्चरित चन्द्रचण्डाल कृतार्थोऽसीदानीम् । अपगतदाक्षिण्य दक्षिणानिलहतक पूर्णास्ते मनोरथाः कृतं कर्तव्यं वहेदानीं यथेष्टम् । हा भगवन् श्वेतकेतो पुत्रवत्सल न वेत्सि मुषितमात्मानम । हा धर्म निष्परिग्रहोऽसि । हा तपो निराश्रयमासि हा सरस्वति विधवासि । हा सत्यानाथमसि । हा सुरलोक शून्योऽसि । सखे प्रतिपालय माम् । अहमपि भवन्तमनुयास्यामि । न शक्नोमि भवता विना क्षणमप्यवस्थातुमेकाकी । कथमपरिचित इवादृष्टपूर्व इवाद्य मामेकपद उत्सृज्य प्रयासि । कुतस्तवेयमतिनिष्ठुरता । कथय त्वद्दते क्व गच्छामि । शून्या मे दिशो जाताः । तदुत्तिष्ठ देहि मे विलपतः प्रतिवचनं । क्व तन्ममोपरि सुहृत्प्रेम । क्व सा स्मितपूर्वाभिभाषिता ।

एवंविधं विलपन्तं तं श्रुत्वा दूरादेव मुक्तैकताराक्रन्दा सरस्तीरलतासक्तित्रुट्यमानांशुकोत्तरीया यथाशक्ति त्वरितैरज्ञातसमविषमभूमिभागविन्यस्तैः पादप्रक्षेपैः प्रस्खलन्ती पदे पदे केनाप्युत्क्षिप्य नीयमानेव तं प्रदेशं गत्वा शशिमणिशिलातले विरचितं शयनमधिशयानं कपिञ्जलेन मद्दर्शनादब्रह्मण्यमित्यूर्ध्वहस्तेन द्विगुणीभूतबाष्पोद्गमेनाक्रोशता कण्ठे परिष्वक्तं तत्क्षणविगतजीवितं तमहं पापकारिणी मन्दभाग्या महाभागमद्राक्षम् ।

उद्भूतमुर्च्छान्धकारा च पातालतलमिवावतीर्णा तदा क्वाहमगमं

किमकरवं । किं व्यलपमिति सर्वमेव नाज्ञासिषम् । असवश्च मे तस्मिन्क्षणे किमतिकठिनतयास्य मूढहृदयस्य किमनेकदुःखसहस्रसहिष्णुतया हतशरीरस्य । किं विहिततया दीर्घशोकस्य किं भाजनतया जन्मान्तरोपात्तस्य दुष्कृतस्य । किं दुःखदाननिपुणतया दग्धदेवस्य किमेकान्तवामतया दुरात्मनो मन्मथहतकस्य केन हेतुना नोद्गच्छन्ति स्म तदपि न ज्ञातवती । केवलमतिचिराल्लब्धचेतना दुःखभागिनी वह्नाविव पतितमसह्यशोकदह्यमानमात्मानमवनौ विचेष्टमानमपश्यम् । अश्रद्दधाना चासंभावनीयं तत्तस्य मरणमात्मनश्च जीवितमुत्थाय हा हा किमिदमुपनतमिति मुक्तार्तनादा हा अम्ब हा तात हा सख्य इति व्याहरन्ती विलपितुमारब्धा । हा नाथ जीवितनिबन्धनाचक्ष्व क्व मामेकाकिनीमशरणामकरुण विमुच्य यासि । पृच्छ तरलिकां त्वत्कृते मया यानुभूतावस्था । युगसहस्रायमाणः कृच्छ्रेण नीतो दिवसः । प्रसीद सकृदप्यालप दर्शय भक्तवत्सलतामीषदपि विलोकय पूरय मे मनोरथम् । आर्तास्मि भक्तास्म्यनुरक्तास्म्यनाथास्मि बालास्म्यगतिकास्मि दुःखितास्म्यनन्यशरणास्मि मदनपरिभूतास्मि । किमिति न करोषि दयां कथय किमपराद्धं किं वा नानुष्ठितं मया कस्यां वा नाज्ञायामादृतं कस्मिन्वा त्वदनुकूले नाभिरतं येन कुपितोऽसि । दासीजनमकारणात्परित्यज्य व्रजन्न बिभेषि कौलीनात् । अलीकानुरागप्रतारणकुशलया किं वा मया वामया पापया । आः अहमद्यापि प्राणिमि । हा हतास्मि मन्दभागिनी । धिङ्मां दुष्कृतकारिणीं यस्याः कृते तवेयमीदृशी दशा वर्तते । नास्ति मत्सदृशी नृशंसहृदया याह-

मेवंविधं भवन्तमुत्सृज्य गृहं गतवती। किं मे गृहेण किमम्बया किं वा तातेन किं बन्धुभिः किं परिजनेन। हा कमुपयामि शरणम्। अयि दैव निर्घृण दर्शय दर्शय दयां विज्ञापयामि त्वां देहि दयितदक्षिणाम्। भगवति भवितव्यते कुरु कृपां पाहि वनितामनाथाम्। भगवत्यो वनदेवताः प्रसीदत प्रयच्छतास्य प्राणान्। अम्ब वसुंधरे सकललोकानुग्रहजननि किमर्थं नानुकम्पसे। तात कैलासेश शरणं गतास्मि ते दर्शय दयालुताम्। इत्येतानि चान्यानि च व्याक्रोशन्ती कियद्वा स्मरामि ग्रहगृहीतेवाविष्टेवोन्मत्तेव भूतोपहतेव व्यलपम्। ततश्च तथाभूते तस्मिन्नवस्थान्तरे मरणैकनिश्चया तत्तद्बहु विलप्य तरलिकामब्रवम्। अय्युत्तिष्ठ निष्ठुरहृदये क्रियद्रोदिमि। काष्ठान्याहृत्य विरचय चितामनुसरामि जीवितेश्वरमिति। अत्रान्तरे झटिति चन्द्रमण्डलविनिर्गतो गगनादवतीर्य महाप्रमाणः पुरुषो महापुरुषलक्षणोपेतो दिव्याकृतिः पीवराभ्यां बाहुभ्यां तमुपरतमुत्क्षिप्य दुन्दुभिनादगम्भीरेण स्वरेण वत्से महाश्वेते न परित्याज्यास्त्वया प्राणाः पुनरपि तवानेन सह भविष्यति समागम इत्येवमादतः पितेवाभिधाय सहैवानेन गगनतलमुदपतत्। अहं तु तेन व्यतिकरेण सभया सविस्मया सकौतुका चोन्मुखी किमिदमिति कपिञ्जलमपृच्छम्। असौ तु ससंभ्रममदत्त्वैवोत्तरमुदैतिष्ठत्। दुरात्मन्नन्तक क्व मे वयस्यमपहृत्य गच्छसीत्यभिधायोन्मुखः संजातकोपो बध्नन्सावेगमुत्तरीयवल्कलेन परिकरमुत्पतन्तं तमेवानुसरन्तमन्तरिक्षमुदगात्। पश्यन्त्या एव च मे सर्व एव ते तारागणमध्यमविशन्।

मम तु तेन द्वितीयेनेव प्रियतममरणेन कपिञ्जलगमनेन द्विगुणीकृतशोकायाः सुतरामदीर्यत हृदयम्। किंकर्तव्यतामूढा च तरलिकामब्रवम्। अयि जानासि कथय किमेतदिति। सा तु तदवलोक्य स्त्रीस्वभावकातरतया तस्मिन्क्षणे शोकाभिभाविना भयेनाभिभूता वेपमानाङ्गयष्टिर्मम मरणशङ्कया च वराकी विषण्णहृदया सकरुणमवादीत्। भर्तृदारिके न जानामि पापकारिणी। किं तु महदिदमाश्चर्यममानुषाकृतिरेष पुरुषः। समाश्वासिता चानेन गच्छता सानुकम्पं पित्रेव भर्तृदारिका। प्रायेण चैवंविधा दिव्याः स्वप्नेष्वविसंवादिन्यो भवन्त्याकृतयः किमुत साक्षात्। न चाल्पमपि विचारयन्ती कारणमस्य मिथ्याभिधाने पश्यामि। अतो युक्तं विचार्यात्मानमस्मात्प्राणपरित्यागव्यवसायान्निवर्तयितुम्। अतिमहत्खल्विदमाश्वासनस्थानमस्यामवस्थायाम्। अपि च तमनुसरन् गत एव कपिञ्जलस्तस्माच्च कुतोऽयं कोवायं किमर्थं चानेनायमपगतासुरुत्क्षिप्य नीतः क्व वा नीतः कस्माच्चासंभावनीयेनामुना पुनःसमागमाशाप्रदानेन भर्तृदारिका समाश्वासितेति सर्वमिदमुपलभ्य जीवितं वा मरणं वा समाचरिष्यसि। अदुर्लभं हि मरणमध्यवसितं पश्चादप्येतद्भविष्यति न च जीवन्कपिञ्जलो भर्तृदारिकामदृष्ट्वा स्थास्यति। तेन तत्प्रत्यागमनकालावधयोऽपि तावद्ध्रियन्ताममी प्राणाः। इत्यभिदधाना पादयोर्मे न्यपतत्। अहं तु सकललोकदुर्लङ्घ्यतया जीविततृष्णायाः क्षुद्रतया च स्त्रीस्वभावस्य तया च तद्वचनोपनीतया दुराशामृगतृष्णिकया कपिञ्जलप्रत्यागमनकाङ्क्षया च तस्मिन्काले तदेव युक्तं मन्यमाना नोत्सृष्टवती जीवितम्। आश-

या हि किमिव न क्रियते। तां च पापकारिणीं कालरात्रिप्रतीमां वर्षसहस्रायमाणां यातनामयीमिव दुःखमयीमिव नरकमयीमिवाग्निमयीमिवोत्सन्ननिद्रा तथैव क्षितितले विचेष्टमाना रेणुकणधूसरैः शिरोरुहैरुपरुद्धमुखी निर्दयाक्रन्दजर्जरस्वरक्षयक्षामेण कण्ठेन तस्मिन्नेव सरस्तीरे तरलिकाद्वितीया क्षपां क्षपितवती।

प्रत्यूषसि तूत्थाय तस्मिन्नेव सरसि स्नात्वा कृतनिश्चया तत्प्रीत्या तमेव कमण्डलुमादाय तान्येव च वल्कलानि तामेवाक्षमालां गृहीत्वा बुद्ध्वा निःसारतां संसारस्य ज्ञात्वा च मन्दपुण्यतामात्मनो निरूप्य चाप्रतीकारदारुणतां व्यसनोपनिपातानामाकलय्य दुर्निवारतां शोकस्य दृष्ट्वा च निष्ठुरतां दैवस्य चिन्तयित्वा चातिबहुलदुःखतां स्नेहस्य भावयित्वा चानित्यतां सर्वभावानामवधार्य चाकाण्डभङ्गुरतां सर्वसुखानामविगणय्य तातमम्बां च परित्यज्य सह परिजनेन मनसा सकलबन्धुवर्गं निर्वर्त्य सकलविषयसुखेभ्यो मनः संयम्येन्द्रियाणि गृहीतब्रह्मचर्या देवं त्रैलोक्यनाथमनाथशरणमिमं शरणार्थिनी स्थाणुमाश्रितवत्यस्मि। अपरेद्युश्च कुतोऽपि समुपलब्धवृत्तान्तस्तातः सहाम्बया सह बन्धुवर्गेणागत्य सुचिरं कृताक्रन्दस्तैस्तैरुपायैरभ्यर्थनाभिश्च बहुभिरुपदेशैश्चानेकप्रकारैः परिसान्त्वनैश्च नानाविधगृहगमनाय मे महान्तं यत्नमकरोत्। यदा च नेयमस्माद्व्यवसायात्कथंचिदपि शक्यते व्यावर्तयितुमिति निश्चयमधिगतवांस्तदा निराशोऽपि दुस्त्यजतया दुहितृस्नेहस्य पुनः पुनर्मया विसृज्यमानोऽपि बहून्दिवसान्स्थित्वा सशोक एवान्तर्दह्यमानहृदयो गृहानयासीत्। गते च ताते ततः प्रभृति देवस्य कृतेऽश्रुमो-

क्षमात्रकेण कृतज्ञतां दर्शयन्ती तदनुरागकृशमिदमपुण्यबहुलमस्तमितलज्जममङ्गलभूतमनेकक्लेशायासहस्रानिवासं दग्धशरीरकं बहुविधैर्नियमशतैः शोषयन्ती वन्यैश्च फलमूलवारिभिर्वर्तमाना जपव्याजेन तद्गुणगणानिव गणयन्ती त्रिसंध्यमत्र सरसि स्नानमुपस्पृशन्ती प्रतिदिनमर्चयन्ती देवं त्र्यम्बकमस्यामेव गुहायां तरलिकया सह दीर्घं शोकमनुभवन्ती सुचिरं न्यवसम्। साहमेवंविधा पापकारिणी निर्लक्षणा निर्लज्जा क्रूरा च गर्हणीया निष्प्रयोजनोत्पन्ना निष्फलजीविता निर्नाथा निरवलम्बना निःसुखा च। किं मया दृष्टया पृष्टया वा कृतब्राह्मणवधमहापातकया करोति महाभाग इत्युक्त्वा पाण्डुना वल्कलोपान्तेन शशिनमिव शरन्मेघशकलेनाच्छाद्य वदनं दुर्निवारबाष्पवेगमपारयन्ती निवारयितुमुन्मुक्तकण्ठमुच्चैः प्रारोदीत्।

Kâdambarî

— —

XVI.

Characteristics of good servants.

एवमादिष्टस्तु मेघनादो ऽव्यजिज्ञपत्। देवि राजलोके तु का कथा भृत्यवर्गोऽपि सकल एवायं कन्दमूलफलाशी निश्चयं कृत्वा स्थितो यथास्माकं मध्यादेकेनापि देवपादाद्विना न प्रतीपं गन्तव्यम्। भृत्या अपि त एव ये संपत्तेर्विपत्तौ सविशेषं सेवन्ते समुन्नम्यमानाः सुतरामवनमन्त्यालप्यमाना न समानालापा जायन्ते स्तूयमाना नोत्सिच्यन्ते

क्षिप्यमाणा नापराधं गृह्णन्त्युच्यमाना न प्रतीपं भाषन्ते पृष्टाः प्रियहितं विज्ञापयन्त्यनादिष्टाः कुर्वन्ति कृत्वा न जल्पन्ति पराक्रम्य विकत्थन्ते कथ्यमाना अपि लज्जामुद्वहन्ति महाहवेष्वग्रतो ध्वजभूता लक्ष्यन्ते दानकाले पलायमानाः पृष्ठतो निलीयन्ते नापि स्नेहं बहु मन्यन्ते जीवितात्पुरो मरणमभिवाञ्छन्ति गृहादपि स्वामिपादमूले सुखं तिष्ठन्ति । येषां च तृष्णा चरणपरिचर्यायामसंतोषो हृदयाराधने व्यसनमाननावलोकने वाचालता गुणग्रहणे कार्पण्यमपरित्यागे भर्तुः । ये च विद्यमानेष्यात्मनि न स्वाधीनसकलेन्द्रियवृत्तयः पश्यन्तोऽप्यन्धा इव शृण्वन्तोऽपि बधिरा इव वाग्मिनोऽपि मूका इव जानन्तोऽपि जडा इवानुपहतकरचरणा अपि कुणय इव पङ्गव इव क्लीबा इवाकिंचित्कराः स्वात्मना स्वामिचित्तादर्शे प्रतिबिम्बवद्वर्तन्ते ।

Kâdambarî

XVII.

Characteristics of wise and foolish persons.

Part I.

निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अनास्तिकः श्रद्दधान एतत्पण्डितलक्षणम् ॥ १ ॥
क्रोधो हर्षश्च दर्पश्च ह्रीस्तम्भो मान्यमानिता ।
यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ॥ २ ॥

यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे ।
कृतमेवास्य जानन्ति स वै पण्डित उच्यते ॥ ३ ॥

यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रतिः ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥ ४ ॥

यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते ।
कामादर्थं वृणीते यः स वै पण्डित उच्यते ॥ ५ ॥

यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्वते ।
न किंचिदवमन्यन्ते नराः पण्डितबुद्धयः ॥ ६ ॥

क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते न कामात् ।
नासंपृष्टो व्युपयुङ्क्ते परार्थे तत्प्रज्ञानं प्रथमं पण्डितस्य ॥ ७ ॥

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ॥ ८ ॥

निश्चित्य यः प्रक्रमते नान्तर्वसति कर्मणः ।
अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते ॥ ९ ॥

आर्यकर्मणि रज्यन्ते भूतिकर्माणि कुर्वते ।
हितं च नाभ्यसूयन्ति पण्डिता भरतर्षभ ॥ १० ॥

न हृष्यत्यात्मसंमाने तप्यते नावमानने ।
गङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते ॥ ११ ॥

तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां नरः पण्डित उच्यते ॥ १२ ॥

श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा ।
असंभिन्नार्यमर्यादः पण्डिताख्यां लभेत सः ॥ १३ ॥
स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।
मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते ॥ १४ ॥
अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥ १५ ॥
अनाहूतः प्रविशति अपृष्टो बहु भाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ १६ ॥
परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च क्रुध्यत्यनीशानः स च मूढतमो नरः ॥ १७ ॥
आत्मनो बलमज्ञाय धर्मार्थपरिवार्जितम् ।
अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते ॥ १८ ॥
अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा ।
विचरत्यसमुन्नद्धो यः स पण्डित उच्यते ॥ १९ ॥
एकः संपन्नमश्नाति वस्ते वासश्च शोभनम् ।
योऽसंविभज्य भृत्येभ्यः को नृशंसतरस्ततः ॥ २० ॥
एकः पापानि कुरुते फलं भुङ्क्ते महाजनः ।
भोक्तारो विप्रमुच्यन्ते कर्ता दोषेण लिप्यते ॥ २१ ॥
एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकम् ॥ २२ ॥

एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते ।
सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविप्लवः ॥ २३ ॥
एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमय युक्तमशक्तं मन्यते जनः ॥ २४ ॥
सोऽ दोषो न मन्तव्यः क्षमा हि परमं बलम् ।
क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ॥ २५ ॥
क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते ।
शान्तिखड्गः करे यस्य किंकरिष्यति दुर्जनः ॥ २६ ॥
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ।
अक्षमावान्परं दोषैरात्मानं चैव योजयेत् ॥ २७ ॥
एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥ २८ ॥

XVIII.

Characteristics of wise and foolish persons.

Part II.

द्वे कर्मणी नरः कुर्वन्नस्मिँल्लोके विरोचते ।
अब्रुवन्परुषं किंचिदसतोऽनर्चयंस्तथा ॥ १ ॥
द्वाविमौ कंटकौ तीक्ष्णौ शरीरपरिशोषिणौ ।
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ॥ २ ॥

न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ ।
अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनम् ॥ ३ ॥

द्वाविमौ पुरुषव्याघ्र सूर्यमण्डलभेदिनौ ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ॥ ४ ॥

हरणं च परस्वानां परदाराभिमर्शनम् ।
सुहृदश्च परित्यागस्त्रयो दोषाः क्षयावहाः ॥ ५ ॥

त्रिविधं नरकस्येदं द्वारं नाशमनात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ॥ ६ ॥

वरप्रदानं राज्यं च पुत्रजन्म च भारत ।
शत्रोश्च मोक्षणं कृच्छ्रात्त्रीणि चैकं च तत्समम् ॥ ७ ॥

चत्वारि राज्ञा तु महाबलेन वर्ज्यान्याहुः पण्डितस्तानि विद्यात् ।
अल्पप्रज्ञैः सह मन्त्रं न कुर्यान्न दीर्घसूत्रै रभसैश्चारणैश्च ॥ ८ ॥

पञ्चाग्नयो मनुष्येण परिचर्याः प्रयत्नतः
पिता माताग्निरात्मा च गुरुश्च भरतर्षभ ॥ ९ ॥

पञ्चैव पूजयँल्लोके यशः प्राप्नोति केवलम् ।
देवान्पितॄन्मनुष्यांश्च भिक्षूनतिथिपञ्चमान् ॥ १० ॥

पञ्चेन्द्रियस्य मर्त्यस्य छिद्रं चेदेकमिन्द्रियम् ।
ततोऽस्य स्रवति प्रज्ञा दृतेः पात्रादिवोदकम् ॥ ११ ॥

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ १२ ॥

षडिमान्पुरुषो जह्याद्भिन्नां नावमिवार्णव ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ १३ ॥
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥ १४ ॥
षडेव तु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ॥ १५ ॥
अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन् ॥१३॥
षडिमे षट्सु जीवन्ति सप्तमो नोपलभ्यते ।
चौराः प्रमत्ते जीवन्ति व्याधितेषु चिकित्सकाः ॥ १७ ॥
प्रमदाः कामयानेषु यजमानेषु याजकाः ।
राजा विवदमानेषु नित्यं मूर्खेषु पण्डिताः ॥ १८ ॥
षडेते ह्यवमन्यन्ते नित्यं पूर्वोपकारिणम् ।
आचार्यं शिक्षिताः शिष्याः कृतदाराश्च मातरम् ॥ १९ ॥
नारीं विगतकामास्तु कृताथाश्च प्रयोजनम् ।
नावं निस्तीर्णकांतारा आतुराश्च चिकित्सकम् ॥ २० ॥
सप्त दोषाः सदा राज्ञा हातव्या व्यसनोदयाः ।
प्रायशो यैर्विनश्यन्ति कृतमूला अपीश्वराः ॥ २१ ॥
स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चमम् ।
महच्च दण्डपारुष्यमर्थदूषणमेव च ॥ २२ ॥

अष्टौ पूर्वनिमित्तानि नरस्य विनशिष्यतः ।
ब्राह्मणान्प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते ॥ २३ ॥

ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति ।
रमते निन्दया चैषां प्रशंसां नाभिनन्दति ॥ २४ ॥

नैतान्स्मरति कृत्येषु याचितश्चाभ्यसूयति ।
एतान्दोषान्नरः प्राज्ञो बुध्येद् बुद्ध्वा विसर्जयेत् ॥ २५ ॥

अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥ २६ ॥

नवद्वारमिदं वेश्म त्रिस्थूणं पञ्चसाक्षिकम् ।
क्षेत्रज्ञाधिष्ठितं विद्वान्यो वेद स परः कविः ॥ २७ ॥

दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान् ।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ॥ २८ ॥

त्वरमाणश्च लुब्धश्च भीतः कामी च ते दश ।
तस्मादेतेषु सर्वेषु न प्रसज्येत पण्डितः ॥ २९ ॥

जानाति विश्वासयितुं मनुष्यान् विज्ञातदोषेषु दधाति दण्डम् ।
जानाति मात्रां च तथा क्षमां च तं तादृशं श्रीर्जुषते समग्रा ॥ ३० ॥

सुदुर्बलं नावजानाति कंचिद्युक्तो रिपुं सेवते बुद्धिपूर्वम् ।
न विग्रहं रोचयते बलस्थैः काले च यो विक्रमते स धीरः ॥ ३१ ॥

प्राप्यापदं न व्यथते कदाचिदुद्योगमन्विच्छति चाप्रमत्तः ।
दुःखं च काले सहते महात्मा धुरंधरस्तस्य जिताः सपत्नाः ॥ ३२ ॥

अनर्थकं विप्रवासं गृहेभ्यः पापैः संधिं परदाराभिमर्शम् ।
दम्भं स्तैन्यं पैशुनं मद्यपानं न सेवते यश्च सुखी सदैव ॥ ३३ ॥
न वैरमुद्दीपयति प्रशान्तं न दर्पमारोहति नास्तमेति ।
न दुर्गतोऽस्मीति करोत्यकार्यं तमार्यशीलं परमाहुरार्याः ॥ ३४ ॥
न स्वे सुखे वै कुरुते प्रहर्षं नान्यस्य दुःखे भवति प्रहृष्टः ।
दत्त्वा च पश्चात्कुरुते न तापं स कथ्यते सत्पुरुषार्थशीलः ॥ ३५ ॥
समैर्विवाहं कुरुते न हीनैः समैः सख्यं व्यवहारं कथां च ।
गुणैर्विशिष्टांश्च पुरो दधाति विपश्चितस्तस्य नयाः सुनीताः ॥३६ ॥
चिकीर्षितं विप्रकृतं च यस्य नान्ये जनाः कर्म जानन्ति किंचित् ।
मन्त्रे गुप्ते सम्यगनुष्ठिते च नाऽल्पोऽप्यस्य च्यवते कश्चिदर्थः ॥३७॥
यः सर्वभूतप्रशमे निविष्टः सत्यत्यो मृदुर्मानकृच्छुद्धभावः ।
अतीव न ज्ञायते ज्ञातिमध्ये महामणिर्जात्य इव प्रसन्नः ॥ ३८ ॥
य आत्मनाऽपत्रपते भृशं नरः स सर्वलोकस्य गुरुर्भवत्युत ।
अनन्ततेजाः सुमनाः समाहितः स तेजसा सूर्य इवावभासते ॥३९॥

Mahâbhârata.

XIX

King Harsha hearing of his father's illness.

अथ कदाचिद् राज्यवर्धनं कवचधरमाहूय हूणान्हन्तुं हरिणानिव हरिणेशः किशोरमपरिमितबलानुयातं चिरंतनैरमात्यैः प्रधानैश्च महासामन्तैः कृत्वा साभिसारमुत्तरापथं प्राहिणोत् । प्रयान्तं च देवो हर्षः

कतिचित्प्रयाणकानि तुरंगमैरनुवव्राज । प्रविष्टे च कैलासप्रभाभासिनीं ककुभं भ्रातरि निवर्तमानो नवे वयति वर्तमानो विक्रमरसानुरोधी केसरिशरभशार्दूलवराहबहुलेषु तुषारशैलोपकण्ठेषु क्रीडन्मृगयया मृगलोचनः कतिपयान्यहानि बहिरेव व्यलम्बत। चकार चाकर्णाकृष्टभासुरभल्लवर्षी स्वल्पीयोभिरेव दिवसैर्निःश्वापदान्यरण्यानि ।

एकदा तु विभावर्यास्तुरीये यामे प्रत्यूषस्येव स्वप्ने चटुलज्वालापुञ्जपिञ्जरितसकलककुभं दुर्निवारणदावहुतभुजा दह्यमानं केसरिणमद्राक्षीत । तस्मिन्नेव दावदहने समुत्सृज्य शावकानुप्लुत्यात्मानं पातयन्तीं सिंहीमपश्यत् । आसीच्चास्य चेतसि । लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशा यदाकृष्टास्तिर्यञ्चोऽप्येवमाचरन्तीति । प्रबुद्धस्यास्य दक्षिणेतरमक्षि पस्पन्दे । गात्रेष्वकस्मादेव च वेपथुर्विपप्रथे । निर्निमित्तमन्तर्बन्धनस्थलाच्चचालेव हृदयम् । अकारणादेवाजायत गरीयसी दुःखासिका। किमिदमिति समुपनतविविधविकल्पविमथितमतिरपगतधृतिश्चिन्तावनमितवदनः स्तिमिततारकेण चक्षुषा समुद्विग्यमानस्थलकमलिनीवनमिव चकार चकोरेक्षणः क्षणं क्षौणीम् । अह्नि च तस्मिन् शून्येनैव चेतसा चिक्रीड मृगयाम् । आरोहति च हरितहये मध्यं नभसो भवनमागत्योभयतो मन्दं मन्दं वाह्यमानतनुतालवृन्तो वेत्रपट्टिकामधिशयानः साशङ्क एव तस्थौ । अथ दूरादेव दीर्घाध्वगन्तारं कुरङ्गकनामानमायान्तमद्राक्षीत्

दृष्ट्वा पूर्वानिमित्तपरंपराविर्भूतभीतिराखिद्यत हृदयेन । कुरङ्गकस्तु कृतप्रणामः समुपसृत्य प्रथममाननलग्नं विषादमुपनिन्ये पश्चाल्लेखम् ।

तं च हर्षः स्वयमेवावाचयत् । लेखार्थेनैव च सह गृहीत्वा हृदयेन संतापमविघ्नरूपोऽभ्यघात् । कुरङ्गक किं ममाद्य तातस्येति । स चाचचक्षे देव दाहज्वरो महानिति । तच्चाकर्ण्य सहसैवास्य हृदयं पफाल । क्षतमनाश्च जनयितुरायुष्कामोऽपरिमितमणिकनकरजतजातमात्मपरिबर्हमशेषं ब्राह्मणसादकरोत् । अनुक्तवानेवोच्चचाल त्वरया च धावमानः परिबर्हकोपनीतमारुह्य तुरंगममेकाक्येव प्रयातुं प्रावर्तत ।

Harshacharita.

XX

A lover's tale.

मकरन्दः— कथिमवलोकितया मदनोद्यानं गतो माधव इति । भवतु तत्रैव गच्छामि । (परिक्रम्यावलोक्य च) दिष्ट्यायं वयस्य इत एवाभिवर्तते । (निरूप्य) अस्य तु

गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं
श्वसितमधिकं किं न्वेतत्स्यात्किमन्यादितोथ वा ।
भ्रमति भुवने कंदर्पाज्ञा विकारि च यौवनं
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम् ॥ १ ॥

(ततः प्रविशति यथानिर्दिष्टो माधवः)

माधव–(स्वगतम्)

तामिन्दुसुन्दरमुखीं सुचिरं विभाव्य चेतः कथं कथमपि व्यपवर्तते मे ।
लज्जां विजित्य विनयं विनिवार्य धैर्यमुन्मथ्य मन्थरविवेकमकाण्ड एव ॥ २ ॥

आश्चर्यम् । यद्विस्मयस्तिमितमस्तमितान्यभाव-
मानन्दमन्दममृतप्लवनादिवाभूत् ।
तत्सन्निधौ तदधुना हृदयं मदीय-
मङ्गारचुम्बितमिव व्यथमानमास्ते ॥ ३ ॥

मकरन्दः– सखे माधव इत इतः

माधवः– (परिक्रम्य) कथं प्रियवयस्यो मम मकरन्दः ।

मकरन्दः– (उपसृत्य) सखे माधव ललाटंतपस्तपति तपनस्तदस्मिन्नुद्याने मुहूर्तमुपविशावः ।

माधवः– यदभिरुचितं वयस्याय ।

(इत्युभावुपविशतः)

मकरन्दः–तदस्यैव तावदुच्छ्वसितकुसुमकेसरकषायशीतलामोदवासितोद्यानस्य काञ्चनारपादपस्याधस्तादुपविशावः ।

(तथा कुरुतः) ।

मकरन्दः– वयस्य माधव । अद्य किल मदनोद्यानयात्राप्रतिनिवृत्तमन्यादृशं भवन्तमवधारयामि । अपि नाम मनागवतार्णोऽसि रतिरमणबाणगोचरम् ।

(माधवः सलज्जमधोमुखस्तिष्ठति ।)

मकरन्दः– (विहस्य) तत्किमघनतमुग्धमुखपुण्डरीकः स्थितोऽसि । पश्य

अन्येषु जन्तुषु रजस्तमसावृतेषु
विश्वस्य धातरि समः परमेश्वरे च ।

सोऽयं प्रसिद्धविभवः खलु चित्तजन्मा
मा लज्जया तव कथंचिदपह्नुतिर्भूत् ॥ ४ ॥

माधवः— वयस्य किं न कथयामि श्रूयताम् । गतोऽहमवलोकिताजनितकौतुकः कामदेवायतनम् । तत्र चेतस्ततः परिक्रम्यावलोक्य च परिश्रमाद्बकुलमुकुलावलीमनोहराभरणरमणीयस्याङ्गनभुवो बालबकुलस्यालवालपरिसरे स्थितः । तस्य च यदृच्छया निरन्तरनिपतितानि कुसुमान्यादाय विदग्धरचनामनोहरां स्रजमभिनिर्मातुमारब्धवानस्मि । अनन्तरं च संचारिणीव देवस्य मकरकेतोर्जगद्विजयवैजयन्तिका निर्गत्य गर्भभवनादुज्ज्वलविदग्धमुग्धनेपथ्यविभावितकुमारभावा महानुभावप्रकृतिरत्युदारपरिजना काऽपि तत एवाभिगतवती ।

सा रामणीयकनिधेरधिदेवता वा
सौन्दर्यसारसमुदायनिकेतनं वा
तस्याः सखे नियतमिन्दुसुधामृणाल-
ज्योत्स्नादि कारणमभून्मदनश्च वेधाः ॥ ५ ॥

अथ सा प्रणयिनीभिरनुचरीभिरविरलकुसुमसंचयावचयलीलादोहदिनीभिरभ्यर्थ्यमाना तमेव बकुलपादपोद्देशमागतवती । तस्याश्च कस्मिंश्चिदपि महाभागधेयजन्मनि बहुदिवसाचीयमानमिव मन्मथव्यथाविकारमुपलक्षितवानस्मि । सा पुनर्मम प्रथमदर्शनात्प्रभृत्यमृतवर्तिरिव चक्षुषोर्निरतिशयमानन्दमुत्पादयन्त्ययस्कान्तमणिशलाकेव लोहधातुमन्तःकरणमाकृष्टवती । किं बहुना

संतापसंततिमहाव्यसनाय तस्या-
मासक्तमेतदनपेक्षितहेतु चेतः ।
प्रायः शुभं च विदधात्यशुभं च जन्तोः
सर्वंकषा भगवती भवितव्यतैव ॥ ६ ॥

मकरन्दः– वयस्य माधव स्नेहश्च निमित्तसव्यपेक्षश्चेति विप्रतिषिद्धमेतत् पश्य

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते ।
विकसति हि पतंगस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ ७ ॥

मकरन्दः– ततस्ततः ।

माधवः– ततश्च तत्र

सभ्रूविलासमथ सोऽयमितीरयित्वा
सप्रत्यभिज्ञमिव मामवलोक्य तस्याः ।
अन्योन्यभावचतुरेण सखीजनेन
मुक्तास्तदा स्मितसुधामधुराः कटाक्षाः ॥ ८ ॥

मकन्दः– (स्वगतम्) कथं प्रत्यभिज्ञाऽपि नाम ।

माधवः– अथ ताः सलीलमुत्तालकरकमलतालिकातरलवलयावलीकं परिवृत्य भर्तृदारिके दिष्टया वर्धामहे यदत्रैव कोऽपि कस्यापि तिष्ठतीति मामङ्गुलीदलविलासेनाख्यातवत्यः । ततश्च

स्तिमितविकसितानामुल्लसद्भ्रूलतानां
मसृणमुकुलितानां प्रान्तविस्तारभाजाम् ।
प्रतिनयननिपाते किंचिदाकुञ्चितानां
विविधमहमभूवं पात्रमालोकितानाम् ॥ ९ ॥

तैश्च

अलसवलितमुग्धस्निग्धनिष्पन्दमन्दै-
रधिकविकसदन्तर्विस्मयस्मेरतारैः ।
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षै-
रपहृतमपविद्धं पीतमुन्मूलितं च ॥ १० ॥

एवमहं तु तस्याः सर्वाकारहृदयंगमायाः संभाव्यमानस्नेहरसेनाभिसंधिना विधेयीकृतोऽपि पारिप्लवत्वमात्मनोऽपनिह्नोतुकामः प्राक्प्रस्तुतस्य बकुलदाम्नो यथाकथंचिदवशेषं ग्रथितवानेव । ततो मिलितवेत्रशस्त्रपाणिवर्षवरप्रायपुरुषपरिवारा गजवधूमारुह्य नगरगामिनं मार्गमिन्दुवदनालंकृतवती । तदा च

यान्त्या मुहुर्वलितकंधरमाननं त-
दावृत्तवृन्तशतपत्रनिभं वहन्त्या ।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः ॥ ११ ॥

ततः प्रभृति ।

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।

विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥ १२ ॥

अपि च

परिच्छेदव्यक्तिर्भवति न पुरःस्थेऽपि विषये
भवत्यभ्यस्तेऽपि स्मरणमतथाभावविरसम् ।
न संतापच्छेदो हिमसरसि वा चन्द्रमसि वा
मनो निष्ठाशून्यं भ्रमति च किमप्यालिखति च ॥१३॥

मकरन्दः– (स्वगतम्) अहो अभिष्वङ्गः । तत्किं निषेधयामि सुहृदम् । अथवा

माऽमूमुहत्खलु भवन्तमनन्यजन्मा
मा ते मलीमसविकारघना मतिर्भूत् ।
इत्यादि नन्विह निरर्थकमेव यस्मा-
त्कामश्च जृम्भितगुणो नवयौवनं च ॥ १४ ॥

(प्रकाशम्) अपि वयस्येन विदिते तदन्वयनामनी ।

माधवः– सखे श्रूयताम् । अथ तस्याः करेणुकारोहणसमय एव महतः सखीकदम्बकादन्यतमा वारयोषिद्विलम्ब्य बालबकुलकुसुमावचयक्रमेण नेदीयसी भूत्वा प्रणम्य कुसुमापीडव्याजेन मामेवमुक्तवती । महाभाग सुश्लिष्टगुणतया रमणीय एष वः सुमनसां संनिवेशः । कुतूहलिनी च नो भर्तृदारिका वर्तते । यस्या अभिनवो विचित्र कुसुमेषु व्यापारः । तद्भवतु कृतार्थता वैदग्धस्य । फलतु निर्माणरमणीयता विधातुः । समासादयतु सरस एष भर्तृदारिकायाः कण्ठावलम्बनमहार्घतामिति ।

मकरन्दः— अहो वैदग्ध्यम् ।

माधवः— तया च मदनुयुक्तया समाख्यातमियममात्यभूरिवसोः प्रसूतिर्मालती नामाहं च प्रसादभूमिर्भर्तृदारिकाया धात्रेयिका लवङ्गिका नामेति ।

मकरन्दः— अमात्यभूरिवसोरात्मजेत्यपर्याप्तिर्बहुमानस्य । अपि च मालती मालतीति मोदते भगवती कामन्दकी तां च किल राजा नन्दनाय प्रार्थयत इति किंवदन्ती श्रूयते ।

माधवः— तया चाहमनुरुध्यमानस्तां बकुलमालामात्मनः कण्ठादवतार्य दत्तवान् । असौ पुनरभिनिविष्टया दृशा मालतीमुखावलोकनविहस्ततया विषमविरचितैकभागां तामेव बहु मन्यमाना महानयं प्रसाद इति प्रतिगृहीतवती । अनन्तरं च यात्राभङ्गप्रचलितस्य महतः पौरजनस्य संकुलेन विघटितायां तस्यमातोऽस्मि ।

Mâlatimâdhava I.

XXI.

An address to the Ganges.

समृद्धं सौभाग्यं सकलवसुधाया किमपि त-
न्महैश्वर्यं लीलाजनितजगतः खण्डपरशोः ।
श्रुतीनां सर्वस्वं सुकृतमथ मूर्त्तं सुमनसां
सुधासौन्दर्यं ते सलिलमशिवं नः शमयतु ॥ १ ॥

दरिद्राणां दैन्यं दुरितमथ दुर्वासनहृदां
    द्रुतं दूरीकुर्वन् सकृदुपगतो दृष्टिसरणिम् ।
अपि द्रागाविद्याद्रुमदलनदीक्षागुरुरिह
    प्रवाहस्ते वारां श्रियमयमपारां दिशतु नः ॥ २ ॥

स्मृतिं याता पुंसामकृतसुकृतानामपि च या
    हरत्यन्तस्तन्द्रां तिमिरमिव चन्द्रांशुसरणिः ।
इयं सा ते मूर्त्तिः सकलसुरसंसेव्यसलिला
    ममान्तःसंतापं त्रिविधमथ तापं च हरताम् ॥ ३ ॥

तवालम्बादम्ब स्फुरदलघुगर्वेण सहसा
    मया सर्वेऽवज्ञासरणिमथ नीताः सुरगणाः ।
इदानीमौदास्यं यदि भजसि भागीरथि तदा
    निराधारो हा रोदिमि कथय केषामिह पुरः ॥ ४ ॥

अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा
    विलोलद्वानीरं तव जननि तीरं श्रितवताम् ।
सुधातः स्वादीयः सलिलमिदमातृप्ति पिबतां
    जनानामानन्दः परिहसति निर्वाणपदवीम् ॥ ५ ॥

स्मृतं सद्यः स्वान्तं विरचयति शान्तं सकृदपि
    प्रगीतं यत्पापं झटिति भवतापं च हरति ।
इदं तद्गङ्गेति श्रवणरमणीयं खलु पदं
    मम प्राणप्रान्ते वदनकमलान्तर्विलसतु ॥ ६ ॥

महादानैर्ध्यानैर्बहुविधवितानैरपि च यत्
न लभ्यं घोराभिः सुविमलतपोराजिभिरपि ।
अचिन्त्यं तद्विष्णोः पदमखिलसाधारणतया
ददाना केनासि त्वमिह तुलनीया कथय नः ॥ ७ ॥

नृणामीक्षामात्रादपि परिहरन्त्या भवभयं
शिवायास्ते मूर्त्तेः क इह बहुमानं कथयतु ।
अमर्षम्लानायाः परममनुरोधं गिरिभुवो
विहाय श्रीकण्ठः शिरसि नियतं धारयति याम् ॥ ८ ॥

स्खलन्ती स्वर्लोकादवनितलशोकापहृतये
जटाजूटग्रन्थौ यदसि विनिबद्धा पुरभिदा ।
अये निर्लोभानामपि मनसि लोभं जनयतां
गुणानामेवायं तव जननि दोषः परिणतः ॥ ९ ॥

जडानन्धान्पङ्गून्प्रकृतिबधिरानुक्तिविकलान्
ग्रहग्रस्तानस्ताखिलदुरितनिस्तारसरणीन् ।
निलिम्पैर्निर्मुक्तानपि च निरयान्तर्निपतितान्
नरानम्ब त्रातुं त्वमिह परमं भेषजमसि ॥ १० ॥

कृतक्षुद्रैनस्कानथ झटिति संतप्तमनसः
समुद्धर्तुं सन्ति त्रिभुवनतले तीर्थनिवहाः ।
अपि प्रायश्चित्तप्रसरणपथातीतचरिता-
न्नरानूरीकर्तुं त्वमिव जननि त्वं विजयसे ॥ ११ ॥

निधानं धर्माणां किमपि च विधानं नवमुदां
प्रधानं तीर्थानाममलपरिधानं त्रिजगतः ।
समाधानं बुद्धेरथ खलु तिरोधानमधियां
श्रियामाधानं नः परिहरतु तापं तव वपुः ॥ १२ ॥

समुत्पत्तिः पद्मारमणपदपद्मामलतला-
न्निवासः कंदर्पप्रतिभटजटाजूटभवने ।
अथायं व्यासङ्गो हतपतितनिस्तारणविधौ
न कस्मादुत्कर्षस्तव जननि जागर्ति जगतः ॥ १३ ॥

नगेभ्यो यान्तीनां कथय तटिनीनां कतमया
पुराणां संहर्तुः सुरधुनि कपर्दोऽधिरुरुहे ।
कया वा श्रीभर्तुः पदकमलमक्षालि सलिलै-
स्तुलालेशो यस्यां तव जननि दीयेत कविभिः ॥ १४ ॥

विधत्तां निःशङ्कं निरवधिसमाधिं विधिरहो
सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः ।
कृतंप्रायश्चित्तैरलमथ तपोदानयजनैः
सवित्री कामानां यदि जगति जागर्ति भवती ॥ १५ ॥

विलीनोऽयं वैवस्वतनगरकोलाहलभरो
गता दूता दूरं क्वचिदपि परेतान्मृगयितुम् ।
विमानानां व्रातो विदलयति वीथीर्दिविषदां
कथा ते कल्याणी यदवधि महीमण्डलमगात् ॥ १६ ॥

त्रपन्ते तीर्थानि त्वरितमिह यस्योद्धृतिविधौ
करं कर्णे कुर्वन्त्यपि किल कप
इमं तं मामम्ब त्वमियमनुकम्पार्द्रहृदया
पुनाना सर्वेषामघशमनदर्पं दलयसि ॥ १७ ॥

विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं
न याभ्यामालीढा परमरमणीया तव तनुः ।
अयं हि न्यक्कारो जननि मनुजस्य श्रवणयो-
र्ययोर्नान्तर्यातस्तव लहरिलीलाकलकलः ॥ १८ ॥

कियन्तः सन्त्येके नियतमिह लोकार्थघटकाः
परे पूतात्मानः कति च परलोकप्रणयिनः ।
सुखं शेते मातस्तव खलु कृपातः पुनरयं
जगन्नाथः शश्वत्त्वयि निहितलोकद्वयभरः ॥ १९ ॥

भवत्या हि व्रात्याधमपतितपाषण्डपरिष-
त्परित्राणस्नेहः श्लथयितुमशक्यः खलु यथा ।
ममाप्येवं प्रेमा दुरितनिवहेष्वम्ब जगति
स्वभावोऽयं सर्वैरपि खलु यतो दुष्परिहरः ॥ २० ॥

प्रपद्यन्ते लोकाः कति न भवतीमत्रभवती-
मुपाधिस्तत्रायं स्फुरति यदभीष्टं वितरसि ।
शपे तुभ्यं मातर्मम तु पुनरात्मा सुरधुनि
स्वभावादेव त्वय्यमितमनुरागं विधृतवान् ॥ २१ ॥

नरान्मूढांस्तत्तज्जनपदसमासक्तमनसो
हसन्तः सोल्लासं विकचकुसुमव्रातमिषतः ।
पुनानाः सौरभ्यैः सततमलिनो नित्यमलिनान्
सखायो नः सन्तु त्रिदशतटिनीतीरतरवः ॥ २२ ॥
यजन्त्येके देवान्कठिनतरसेवांस्तदपरे
वितानव्यासक्ता यमनियमरक्ताः कतिपये ।
अहं तु त्वन्नामस्मरणकृतकामस्त्रिपथगे
जगज्जालं जाने जननि तृणजालेन सदृशम् ॥ २३ ॥
विभूषितानङ्गरिपूत्तमाङ्गा सद्यः कृतानेकजनार्तिभङ्गा ।
मनोहरोत्तुङ्गचलत्तरङ्गा गङ्गा ममाङ्गान्यमलीकरोतु ॥ २४ ॥
इमां पीयूषलहरीं जगन्नाथेन निर्मिताम् ।
यः पठेत्तस्य सर्वत्र जायन्ते जयसंपदः ॥ २५ ॥

Gangâlaharî

XXII.

God is not open to the charges of injustice and cruelty.

नेश्वरो जगतः कारणमुपपद्यते । कुतः । वैषम्यनैर्घृण्यप्रसङ्गात् । कांश्चिदत्यन्तसुखभाजः करोति देवादीन् । कांश्चिदत्यन्तदुःखभाजः करोति पश्वादीन् । कांश्चिन्मध्यमभोगभाजो मनुष्यादीनिति । एवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य पृथग्जनस्येव रागद्वेषोपपत्तेः श्रुतिस्मृत्य-

वधारितस्वच्छत्वादीश्वरस्वभावविलोपः प्रसज्येत । यथा खलजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं दुःखायोगविधानात्सर्वप्रजोपसंहरणाच्च प्रसज्येत । तस्माद्वैषम्यनैर्घृण्यप्रसङ्गान्नेश्वरः कारणमित्येवं प्राप्ते ब्रूमः । वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते । कस्मात् । सापेक्षत्वात् । यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यं च । न तु निरपेक्षस्य निर्मातृत्वमस्ति । सापेक्षो हीश्वरो विषमां सृष्टिं निर्मिमीते । किमपेक्षत इति चेद्धर्माधर्मावपेक्षत इति वदामः । अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरितिनायमीश्वरस्यापराधः । ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः । यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि सामर्थ्यानि कारणानि भवन्ति । एवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति । देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येवासाधारणानि कर्माणि कारणानि भवन्ति एवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दूष्यति ।

Sânkarabhâshya.

XXIII.

A poet's introduction to his poem.

श्रीधाम्नि दुग्धोदधिपुण्डरीके यश्चञ्चरीकद्युतिमातनोति ।
नीलोत्पलश्यामलदेहकान्तिः स वोऽस्तु भूत्यै भगवान्मुकुन्दः ॥ १ ॥

साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति ॥ २ ॥
गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः कापि कवीश्वराणाम् ।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः ॥ ३ ॥
सहस्रशः सन्तु विशारदानां वैदर्भलीलानिधयः प्रबन्धाः ।
तथापि वैचित्र्यरहस्यलुब्धाः श्रद्धां विधास्यन्ति सचेतसोऽत्र ॥४॥
कुण्ठत्वमायाति गुणः कवीनां साहित्यविद्याश्रमवर्जितेषु ।
कुर्यादनार्द्रेषु किमङ्गनानां केशेषु कृष्णागुरुधूपवासः ॥ ५ ॥
व्युत्पत्तिरावर्जितकोविदापि न रञ्जनाय क्रमते जडानाम् ।
न मौक्तिकच्छिद्रकरी शलाका प्रगल्भते कर्मणि टङ्किकायाः ॥ ६॥
कथासु ये लब्धरसाः कवीनां ते नानुरज्यन्ति कथान्तरेषु ।
न ग्रन्थिपर्णप्रणयाश्चरन्ति कस्तूरिकागन्धमृगास्तृणेषु ॥ ७ ॥
न दुर्जनानामिह कोऽपि दोषस्तेषां स्वभावो हि गुणासहिष्णुः ।
द्वेष्यैव केषामपि चन्द्रखण्डविपाण्डुरा पुण्ड्रकशर्करापि ॥ ८ ॥
अलौकिकोल्लेखसमर्पणेन विदग्धचेतःकषपट्टिकासु ।
परीक्षितं काव्यसुवर्णमेतल्लोकस्य कण्ठाभरणत्वमेतु ॥ ९ ॥
किं चारुचारित्रविलासशून्याः कुर्वन्ति भूपाः कविसंग्रहेण ।
किं जातु गुञ्जाफलभूषणानां सुवर्णकारेण वनेचराणाम् ॥ १० ॥
पृथ्वीपतेः सन्ति न यस्य पार्श्वे कवीश्वरास्तस्य कुतो यशांसि ।
भूपाः कियन्तो न बभूवुरुर्व्यां जानाति नामापि न कोपि येषाम् ॥११॥

लङ्कापतेः सङ्कुचितं यशो यद्यत्कीर्तिपात्रं रघुराजपुत्रः ।
स सर्व एवादिकवेः प्रभावो न कोपनीयाः कवयः क्षितीन्द्रैः ॥१२॥
गिरां प्रवृत्तिर्मम नीरसापि मान्या भवित्री नृपतेश्चरित्रैः ।
के वा न शुष्कां मृदमभ्रसिन्धुसम्बन्धिनीं मूर्धनि धारयन्ति ॥ १३ ॥
कर्णामृतं सूक्तिरसं विमुच्य दोषे प्रयत्नः सुमहान्खलानाम् ।
निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव ॥ १४ ॥
एषाऽस्तु चालुक्यनरेन्द्रवंशसमुद्भतानां गुणमौक्तिकानाम् ।
मद्धारतीसूत्रनिवेशितानामेकावली कण्ठविभूषणं वः ॥ १५ ॥

Vikramânkadevacharita I.

XXIV.

Miscellaneous verses.

राज्यं येन पटान्तलग्नतृणकं त्यक्तं गुरोराज्ञया
पाथेयं परिगृह्य कार्मुकवरं घोरं वनं प्रस्थितः ।
स्वाधीनः शशिमौलिचापविषये प्राप्तो न वै विक्रियां ।
पायाद्वः स विभीषणाग्रजनिहा रामाभिधानो हरिः ॥१॥

नायं प्रयाति विकृतिं विरसो न यः स्या-
न्न क्षीयते बहुजनैर्नितरां निपीतः ।
जाड्यं निहन्ति रुचिमेति करोति तृप्तिं
नूनं सुभाषितरसोऽन्यरसातिशायी ॥ २ ॥

लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
    ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥ ३ ॥

यस्याश्चोरश्चिकुरनिकुरः कर्णपूरो मयूरो
    भासो हासः कविकुलगुरुः कालिदासो विलासः ।
हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः
    केषां नैषा कथय कविताकामिनी कौतुकाय ॥ ४ ॥

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ।
    शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥ ५ ॥

पातितोऽपि कराघातैरुत्पतत्येव कन्दुकः ।
    प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः ॥ ६ ॥

किं जन्मना च महता पितृपौरुषेण
    शक्त्या हि याति निजया पुरुषः प्रतिष्ठाम् ।
कुम्भो न कूपमपि शोषयितुं समर्थः
    कुम्भोद्भवेन मुनिनाम्बुधिरेव पीतः ॥ ७ ॥

असाधुः साधुर्वा भवति खलु जात्यैव पुरुषो
    न सङ्गाद्दौर्जन्यं न हि सुजनता कस्यचिदपि ।
प्ररूढे संसर्गे मणिभुजगयोर्जन्मजनिते
    मणिर्नाहेर्दोषान् स्पृशति न हि सर्पो मणिगुणान् ॥ ८ ॥

रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगा
    निरालम्बो मार्गश्चरणरहितः सारथिरपि ।

रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥ ९ ॥

विपक्षः श्रीकण्ठो जडतनुरमात्यः शशधरो
वसन्तः सामन्तः कुसुममिषवः सैन्यमबलाः ।
तथापि त्रैलोक्यं जयति मदनो देहरहितः
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥ १० ॥

ये जाते व्यसने निराकुलधियः सम्पत्सु नाभ्युन्नताः
प्राप्ते नैव पराङ्मुखाः प्रणयिनि प्राणप्रयोगैरपि ।
ह्रीमन्तः स्वगुणप्रकाशनविधावन्यस्तुतौ पण्डिता-
स्ते भूमण्डलमण्डनैकतिलकाः सन्तः कियन्तो जनाः॥११॥

क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः
स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः ।
दुष्पूरोदरपूरणाय पिबति स्रोतःपतिं वाडवो
जीमूतस्तु निदाघसंभृतजगत्संतापविच्छित्तये ॥ १२ ॥

किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्किं
वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः ।
किं त्वङ्गीकृतमुत्सृजन् कृपणवच्छ्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥ १३ ॥

दुर्जनदूषितमनसां पुंसां सुजनेऽपि नास्ति विश्वासः ।
पाणौ पायसदग्धे तक्रं फूत्कृत्य पामरः पिबति ॥ १४ ॥

प्राक्पादयोः पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥ १५ ॥

दुर्वृत्तसंगतिरनर्थपरंपराया
हेतुः सतां भवति किं वचनीयमेतत् ।
लङ्केश्वरो हरति दाशरथेः कलत्रं
प्राप्नोति बन्धमथ दक्षिणसिन्धुराजः ॥ १६ ॥

आलस्यं स्थिरतामुपैति भजते चापल्यमुद्योगितां
मूकत्वं मितभाषितां वितनुते मौढ्यं भवेदार्जवम् ।
पात्रापात्रविचारणाविरहिता यच्छत्युदारात्मतां
मातर्लक्ष्मि तव प्रसादवशतो दोषा अमी स्युर्गुणाः ॥१७॥

पीतोऽगस्त्येन तातश्चरणतलहतो वल्लभोऽन्येन रोषा-
दाबाल्याद्विप्रवर्यैः स्ववदनविवरे धारिता वैरिणी मे ।
गेहं मे छेदयन्ति प्रतिदिवसमुमाकान्तपूजानिमित्तं
तस्मात्खिन्ना सदाहं द्विजकुलसदनं नाथ नित्यं त्यजामि॥१८॥

आपद्गतं हससि किं द्रविणान्ध मूढ
लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम् ।
एतान्प्रपश्यसि घटान् जलयन्त्रचक्रे
रिक्ता भवन्ति भरिता भरिताश्च रिक्ताः ॥ १९ ॥

उड्डीना गुणपत्रिणः सुखफलान्याराद्विकीर्णान्यधः
पर्यस्ताः परितो यशःस्तबकिताः संपल्लतापल्लवाः ।
प्रागेवापसृतप्रमोदहरिणच्छाया कथान्तं गता
दैन्यारण्यमतङ्गजेन सहसा भग्नेऽभिमानद्रुमे ॥ २० ॥

लज्जे त्वं मज्ज सिन्धौ गिरिवरशिखरे त्वं च तिष्ठ प्रतिष्ठे
शान्ते प्रान्ते दिशान्ते कुरु वसतिमहो गर्व खर्वो भवाशु ।
तेजः पातालमूलं भज भुवि भगवन्मान मा नाम तेस्तु
प्रेम्णैकामाश्रयन्तीं सततमहमिमां तूर्णमाशां श्रयिष्ये॥२१॥

सिंहक्षुण्णकरीन्द्रकुम्भगलितं रक्ताक्तमुक्ताफलं
कान्तारे बदरीधिया द्रुतमगाद्भिल्लस्य पत्नी मुदा ।
पाणिभ्यामवगुह्य शुक्लकठिनं तद्वीक्ष्य दूरे जहा-
वस्थाने पततामतीव महतामेतादृशी स्याद्गतिः ॥ २२ ॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनस्तदभवद् दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी॥२३॥

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥२४॥

गीतं कोकिल ते मुदा रसविदः शृण्वन्ति कर्णामृतं
नो किंचिद्वितरन्ति ते तरुदलैरेव स्वयं जीवसि ।
कर्णायुर्हरमुद्गिरन्ति विरुतं काकास्तु तेभ्यो बलिं
प्रह्वा एव दिशन्ति हन्त धिगिदं वक्रं विधेः क्रीडितम् ॥२५॥

लब्धं जन्म सह श्रिया स्वयमपि त्रैलोक्यभूषाकरः
स्थित्यर्थं परमेश्वराभ्युपगतस्तेनापि मूर्ध्ना धृतः ।
वृद्धिं शीतकरस्तथापि न गतः क्षीणः परं प्रत्युत
प्रायः प्राक्तनमेव कर्म बलवत् कः कस्य कर्तुं क्षमः ॥२६॥

कांश्चित्तुच्छयति प्रपूरयति वा कांश्चिन्नयत्युन्नतिं
कांश्चित्पातविधौ करोति च पुनः कांश्चिन्नयत्याकुलान् ।
अन्योन्यप्रतिपक्षसंहतिमिमां लोकस्थितिं बोधय-
न्नेष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः ॥ २७ ॥

येनाकारि मृणालपत्रमशनं क्रीडा करिण्या सह
स्वच्छन्दं भ्रमणं च कन्दरगणे पीतं पयो नैर्झरम् ।
सोऽयं वन्यकरी नरेषु पतितः पुष्णाति देहं तृणै-
र्यद्दैवेन ललाटपत्रलिखितं तत्प्रोज्झितुं कः क्षमः ॥ २८ ॥

शय्या शाद्वलमासनं शुचि शिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कंदाः सहाया मृगाः ।
इत्यप्रार्थितलभ्यसर्वविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा स्थीयते ॥ २९ ॥

अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः ॥ ३० ॥
यत्कीर्त्या धवलीकृतं त्रिभुवनं मूर्त्या जगन्मोहितं
भक्त्येशः परितोषितः सुचरितैरानन्दिताः सज्जनाः ।
पूर्णाशा बहवः कृता वितरणैर्येन त्वया याचका-
स्तस्मै सर्वगुणाश्रयाय भवते दीर्घायुराशास्महे ॥ ३१ ॥
महाराज श्रीमज्जगति यशसा ते धवलिते
पयःपारावारं परमपुरुषोऽयं मृगयते ।
कपर्दी कैलासं सुरपतिरपि स्वं करिवरं
कलानाथं राहुः कमलभवनो हंसमधुना ॥ ३२ ॥
मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति च सदा दूरतस्त्वप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ३३ ॥
भक्तानामुपकारिणां परहितव्यापारयुक्तात्मनां
सेवासंव्यवहारतत्त्वविदुषां द्रोहच्युतानामपि ।
व्यापत्तिः स्खलितान्तरेषु नियता सिद्धिर्भवेद्वा न वा
तस्मादम्बुपतेरिवावनिपतेः सेवा सदा शङ्किनी ॥ ३४ ॥

फलार्थी नृपतिर्लोकान्पालयेद्यत्नमास्थितः ।
दानमानादितोयेन मालाकारोऽङ्कुरानिव ॥ ३५ ॥

नृपदीपो धनस्नेहं प्रजाभ्यः संहरन्नपि ।
अन्तरस्थैर्गुणैः शुभ्रैर्लक्ष्यते नैव केनचित् ॥ ३६ ॥

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
संभावनागुणमवेहि तमीश्वराणाम् ।
किं प्राभविष्यदरुणस्तमसां विभेत्ता
तं चेत्सहस्रकिरणो धुरि नाकरिष्यत् ॥ ३७ ॥

एकं भूमिपतिः करोति सचिवं राज्ये प्रमाणं यदा
तं मोहाच्छ्रयते मदः स च मदाद्दास्येन निर्विद्यते ।
निर्विण्णस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा
स्वातन्त्र्यान्नृपतेः स राज्यमथवा प्राणानपि च्यावयेत् ॥३८॥

धर्मार्थे क्षीणवित्तस्य क्षीणत्वमपि शोभते
सुरैः पीतावशेषस्य कृष्णपक्षे विधोरिव ॥ ३९ ॥

कोऽर्थान्प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तं गताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः ।
कः कालस्य न गोचरान्तरगतः कोऽर्थी गतो गौरवं
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ॥४०॥

पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्
रामेणापि कथं न हेमहरिणस्यासंभवो लक्षितः ।

अक्षैश्चापि युधिष्ठिरेण रमता ज्ञातो न दोषः कथं
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ॥ ४१ ॥

शक्तेनापि सता जनेन विदुषा कालान्तरप्रेक्षिणा
वस्तव्यं खलु वज्रपातविषमे क्षुद्रेऽपि पापे जने ।
दर्वीव्यग्रकरेण धूममलिनेनायासयुक्तेन किं
भीमेनातिबलेन मत्स्यभवनेऽपूपा न संघट्टिताः ॥ ४२ ॥

येनास्यभ्युदितेन चन्द्र गमितः क्लान्तिं रवौ तत्र ते
युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः ।
क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नो मना-
गस्त्वेवं जडधामता तु भवतो यद्व्योम्नि विस्फूर्जसे ॥४३॥

तवैव प्रावीण्यं जलद जगदानन्दकरणं
यदम्भःपालीराहरसि खलसत्त्वाज्जलनिधेः ।
निसर्गात्क्षारास्ता नयसि च कथंचिन्मधुरता-
मथासारैस्तासां युगपदुपकर्तासि जगतः ॥ ४४ ॥

दृष्ट्वा स्फीतोऽभवदालिरसौ लेख्यपद्मं विशालं
चित्रं चित्रं किमिति किमिति व्याहरान्निष्पपात ।
नास्मिगन्धो न च मधुकणा नास्ति तत्सौकुमार्यं
घूर्णन्मूर्ध्ना बत नतशिरा व्रीडया निर्जगाम ॥ ४५ ॥

भ्रातः कोकिल कूजितेन किमलं नाद्याप्यनर्घ्यो गुण-
स्तूष्णीं तिष्ठ विशीर्णपर्णपटलच्छन्नः क्वचित्कोटरे ।

प्रोद्दामद्रुमसंकटे कटुरटत्काकावलीसंकुलः
कालोऽयं शिशिरस्य संप्रति सखे नायं वसन्तोत्सवः॥४६॥

अन्ये ते जलदायिनो जलधरास्तृष्णां विनिघ्नन्ति ये
भ्रातश्चातक किं वृथा विरुदितैः खिन्नोऽसि विश्राम्यताम्।
मेघः शारद एव काशधवलः पानीयरिक्तोदरो
गर्जत्येव हि केवलं भृशतरं नो बिन्दुमप्युज्झति ॥४७॥

मातङ्गाः किमु वल्गितैः किमफलैराडम्बरैर्जम्बुकाः
सारंगा महिषा मदं व्रजथ किं शून्येषु शूरा न के।
कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुरः
सिन्धुध्वानिनि हुंकृते स्फुरति यत्तद्गर्जितं गर्जितम् ॥४८॥

पीतं यत्र हिमं पयः कवलिता यस्मिन्मृणालाङ्कुरा-
स्तापार्तेन निमज्ज्य यत्र सरसो मध्ये विमुक्तः श्रमः।
धिक्तस्यैव जलानि पङ्किलयतः पाथोजिनीं मध्नतो
मूलान्युत्खनतः करीन्द्र भवतो लज्जापि नो जायते ॥४९॥

अल्पायासबलेन यत्र पतनं कृच्छ्रेण यत्रोन्नति-
र्द्वारे वेत्रलतावितानगहने कष्टप्रवेशक्रमः।
हे सारंग मनोरमा वनभुवस्त्यक्त्वा विशेषार्थिना
किं भूभृत्कटकस्थितिव्यसनिना व्यर्थं खुराः शातिताः॥५०॥

यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा
नैषां गर्वगिरः शृणोषि न च तान्प्रत्याशया धावसि।

काले बालतृणानि खादसि परं निद्रासि निद्रागमे
तन्मे ब्रूहि कुरङ्ग कुत्र भवता किं नाम तप्तं तपः ॥ ५१

ये पूर्वं परिपालिताः फलभरच्छायादिभिः प्राणिनो
विश्रामद्रुम कथ्यतां तव विपत्काले क्व ते सांप्रतम्
एताः संगतिमात्रकल्पितपुरस्कारास्तु धन्यास्त्वचो
यासां छेदनमन्तरेण पतितो नायं कुठारस्त्वयि ॥ ५२ ।

येऽभिज्ञाः कुसुमोद्गमादनुदिनं त्वामाश्रिताः षट्पदा-
स्ते भ्राम्यन्ति फलाद्बहिर्बहिरहो दृष्ट्वा न सम्भाषसे ।
ये कीटास्तव दृक्पथं न च गतास्ते त्वत्फलाभ्यन्तरे
धिक्त्वां चूततरो परापरपरिज्ञानानभिज्ञो भवान् ॥ ५३ ॥

आकर्ण्याम्रफलस्तुतिं जलमभूत्तन्नारिकेलान्तरं
प्रायः कण्टकितं तथैव पनसं जातं द्विधोर्वारुकम् ।
आस्तेऽधोमुखमेव कादलमलं द्राक्षाफलं क्षुद्रतां
श्यामत्वं बत जाम्बवं गतमहो मात्सर्यदोषादिह ॥ ५४ ।

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते ।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न छायापि परोपकारकृतये मार्गस्थितस्यापि मे ॥ ५५ ॥

परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरो
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः ।

न संप्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः
किमिऽक्षोर्दोषोसौ न पुनरगुणाया मरुभुवः ॥ ५६ ॥

न तेजस्तेजस्वी प्रसृतमपरेषां प्रहसते
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः ।
मयूखैरश्रांन्तं तपति यदि देवो दिनकरः
किमाग्नेयग्रावा निकृत इव तेजांसि वमति ॥ ५७ ॥

अजानन्माहात्म्यं पततु शलभो दीपदहने
स मीनोप्यज्ञानाद्बडिशयुतमश्नातु पिशितम् ।
विजानन्तोप्येते वयमिह विपज्जालजटिलान्न
मुञ्चामः कामानहह गहनो मोहमहिमा ॥ ५८ ॥

अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितं ।
यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां
कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ ५९ ।

यत्रानेके क्वचिदपि गृहे तत्र तिष्ठत्यथैको
यत्राप्येकस्तदनु बहवस्तत्र नैकोपि चान्ते
इत्थं चेमौ रजनिदिवसौ दोलयन्द्वाविवाक्षौ
कालः काल्या भुवनफलके क्रीडति प्राणिशारैः ॥ ६० ॥

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताभ्रपटलीलीनाम्बुवद्भङ्गुरम् ।

लोला यौवनलालना तनुभृतामित्याकलय्य द्रुतं
योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ॥ ६१ ॥
नायं ते समयो रहस्यमधुना निद्राति नाथो यदि
स्थित्वा द्रक्ष्यति कुप्यति प्रभुरिति द्वारेषु येषां वचः ।
चेतस्तानपहाय याहि भवनं देवस्य विश्वेशितु-
र्निर्दौवारिकनिर्दयोक्त्यपरुषं निःसीमशर्मप्रदम् ॥ ६२ ॥
उदन्वच्छन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं कलयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ ६३ ॥

तृतीयावलिः

THIRD SERIES.

I.

The hare and the lion.

अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम सिंहः। स च सर्वदा पशूनां वधं कुर्वन्नास्ते। ततः सर्वैः पशुभिर्मिलित्वा स सिंहो विज्ञप्तः। मृगेन्द्र किमर्थमेकदा बहुपशुघातः क्रियते। यदि प्रसादो भवति तदा वयमेव भवदाहाराय प्रत्यहमेकैकं पशुमुपढौकयामः। ततः सिंहेनोक्तम्। यद्येतदभिमतं भवतां तर्हि भवतु तत्। ततः प्रभृत्येकैकं पशुमुपकल्पितं भक्षयन्नास्ते। अथ कदाचिद्वृद्धशशकस्य वारः समायातः। सोऽचिन्तयत्। यद्यहं पञ्चत्वं गमिष्यामि तर्हि किं मे सिंहानुनयेन तन्मन्दं मन्दं गच्छामि। ततः सिंहोऽपि क्षुधापीडितः कोपात्तमुवाच। कुतस्त्वं विलम्ब्य समागतोऽसि। शशकोऽब्रवीत्। देव नाहमपराधी। आगच्छन्पथि सिंहान्तरेण बलाद्धृतः। तस्याग्रे पुनरागमनाय शपथं कृत्वा स्वामिनं निवेदयितुमत्रागतोऽस्मि। सिंहः सकोपमाह। सत्वरं गत्वा दुरात्मानं दर्शय क्व स दुरात्मा तिष्ठति। ततः शशस्तं गृहीत्वा गभीरकूपं दर्शयितुं गतः। तत्रागत्य स्वयमेव पश्यतु स्वामीत्युक्त्वा तस्मिन्कूपजले तस्य सिंहस्यैव प्रतिबिम्बं दर्शितवान्। ततोऽसौ क्रोधाध्मातो दर्पात्तस्योपर्यात्मानं निक्षिप्य पञ्चत्वं गतः। अतोऽहं ब्रवीमि।

बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
पश्य सिंहो मदोन्मतः शशकेन निपातितः ॥ ॥

Hitopadeśa II.

II.

The crane and the crab.

अस्ति कस्मिंश्चित्प्रदेशे नानाजलचरसनाथं सरः । तत्र च कृताश्रयो बक एको वृद्धभावमुपागतो मत्स्यान्व्यापादयितुमसमर्थः । ततश्च क्षुत्क्षामकण्ठः सरस्तीर उपविष्टो मुक्ताफलसदृशैरश्रुप्रवाहैर्धरातलमभिषिञ्चन्रुरोद । एकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरमिदमूचे । माम किमद्य त्वयाहारवृत्तिर्नानुष्ठीयते । केवलमश्रुपूर्णनेत्राभ्यां सनिःश्वासेन स्थीयते । स आह । वत्स सत्यमुपलक्षितं भवता । मया हि मत्स्यादनं प्रति परमवैराग्यतया सांप्रतं प्रायोपवेशनं कृतं तेनाऽहं समीपगतानपि मत्स्यान्न भक्षयामि । कुलीरकस्तच्छ्रुत्वा प्राह । किं तद्वैराग्यकारणम् । स प्राह । वत्स अहमस्मिन्सरसि जातो वृद्धिं गतश्च । तन्मयैतच्छ्रुतं यद् द्वादशवार्षिक्यनावृष्टिः संपद्यते लग्ना । कुलीरक आह । कस्मात्तच्छ्रुतम् । बक आह दैवज्ञमुखात् । यतः शनैश्चरो रोहिणीशकटं भित्त्वा भौमश्च शुक्रश्च प्रयास्यति । तदेतत्सरः स्वल्पतोयं वर्तते शीघ्रं शोषं यास्यति । अस्मिञ् शुष्के यैः सहाहं वृद्धिं गतः सदैव क्रीडि-

तश्चैते सर्वे तोयाभावान्नाशं यास्यन्ति। तत्तेषां वियोगं द्रष्टुमहमसमर्थः। तेनैतत्प्रायोपवेशनं कृतम्। सांप्रतं सर्वेषां स्वल्पजलाशयानां जलचरा गुरुजलाशयेषु स्वस्वजनैर्नीयन्ते। केचिच्च मकरगोधाशिशुमारजलहस्तिप्रभृतयः स्वयमेव गच्छन्ति। अत्र पुनः सरसि ये जलचरास्ते निश्चिन्ताः सन्ति। तेनाहं विशेषाद्रोदिमि यद्बीजशेषमात्रमप्यत्र नोद्धरिष्यति। ततः स तदाकर्ण्यान्येषामपि जलचराणां तत्तस्य वचनं निवेदयामास। अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभृतयस्तमभ्युपेत्य पप्रच्छुः। माम अस्ति कश्चिदुपायो येनास्माकं रक्षा भवति। बक आह। अस्त्यस्य जलाशयस्य नातिदूरे प्रभूतजलसनाथं सरः पद्मिनीखण्डमण्डितं यच्चतुर्विंशत्यापि वर्षाणामवृष्ट्या न शोषमेति। तद्यदि मम पृष्ठं कश्चिदारोहति तदहं तं तत्र नयामि। अथ ते तत्र विश्वासमापन्नास्तात मातुल भ्रातरिति ब्रुवाणा अहं पूर्वमहं पूर्वमिति समन्तात्परितस्थुः। सोऽपि दुष्टाशयः क्रमेण तान्पृष्ठमारोप्य जलाशयस्य नातिदूरे शिलां समासाद्य तस्यामाक्षिप्य स्वेच्छया भक्षयित्वा भूयोऽपि जलाशयं समासाद्य जलचराणां मिथ्यावार्त्तासंदेशकैर्मनांसि रञ्जयन्नित्यमिवाहारवृत्तिमकरोत्। अन्यस्मिन्दिने स कुलीरकेणोक्तः। माम मया सह ते प्रथमः स्नेहसंभाषः संजातः। तत्किं मां परित्यज्यान्यान्नयसि। तस्मादद्य मे प्राणत्राणं कुरु। तदाकर्ण्य सोऽपि दुष्टाशयश्चिन्तितवान्। निर्विण्णोऽहं मत्स्यमांसादनेन। तदद्यैतं कुलीरकं व्यञ्जनस्थाने करोमि। इति विचिन्त्य तं पृष्ठे समारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः। कुलीरकोऽपि दूरादेवा-

स्थिपर्वतं शिलाश्रयमवलोक्य मत्स्यास्थीनि परिज्ञाय तमपृच्छत् । माम कियद्दूरे स जलाशयः । मदीयभारेणातिश्रान्तस्त्वं तत्कथय । सोऽपि मन्दधीर्जलचरोयमिति मत्वा स्थले न प्रभवतीति सस्मितमिदमाह । कुलीरक कुतोऽन्यो जलाशयः। मम प्राणयात्रेयम् । तस्मात्स्मर्यतामात्मनोभीष्टदेवता । त्वामप्यस्यां शिलायां निक्षिप्य भक्षयिष्यामि । इत्युक्तवति तस्मिन्स्ववदनदंशद्वयेन मृणालनालधवलायां मृदुग्रीवायां गृहीतो मृतश्च । अथ स तां बकग्रीवां समादाय शनैः शनैस्तज्जलाशयमाससाद । ततः सर्वैरेव जलचरैः पृष्टः। भोः कुलीरक किंनिमित्तस्त्वं पश्चादायातः। कुशलकारणं तिष्ठति । स मातुलोऽपि नायातः । तत्किं चिरयसि । वयं सर्वे सोत्सुकाः कृतक्षणास्तिष्ठामः । एवं तैरभिहिते कुलीरकोऽपि विहस्योवाच । मूर्खाः सर्वे जलचरास्तेन मिथ्यावादिना वञ्चयित्वा नाऽतिदूरे शिलातले प्रक्षिप्य भक्षिताः। तन्मयायुःशेषतया तस्य विश्वासघातकस्याभिप्रायं ज्ञात्वा ग्रीवेयमानीता । तदलं संभ्रमेण । अधुना सर्वजलचराणां क्षेमं भविष्यति । अतोऽहं ब्रवीमि ।

भक्षयित्वा बहून् मत्स्यानुत्तमाधममध्यमान् ।
अतिलौल्याद्बकः कश्चिन्मृतः कर्कटकग्रहात् ॥ १ ॥

Panchatantra I.

III.

The tale of Sâvitrî.

Part I.

पुरा किल मद्रेष्वश्वपतिर्नाम राजा बभूव । स धर्मात्मा ब्रह्मण्यः शरण्यः सत्यसंधो जितेन्द्रियो यज्वा पौरजानपदप्रियः सर्वभूतहितरतश्चासीत् । किंत्वनपत्यः । तस्मात्सोऽपत्योत्पादनार्थं तीव्रनियममास्थाय सावित्रीं देवतामाराधयामास । अथ कस्मिंश्चित्काले गते तस्य ज्येष्ठा महिषी गर्भमादधे । प्राप्ते काले चैकां कन्यां सुषुवे । सा सावित्र्या प्रीतया दत्तेति पिता विप्राश्च तस्याः सावित्रीत्येव नाम चक्रुः । सा नृपात्मजा विग्रहवती श्रीरिव वर्धमाना गच्छता कालेन यौवनस्था बभूव । तां काञ्चनीं प्रतिमामिव तेजसा ज्वलन्तीं दृष्ट्वा सर्वे जना देवकन्येयं प्राप्तेति मेनिरे । तस्यास्तेजसा प्रतिवारितश्च न कोऽपि तां वरयामास । तां यौवनस्थामपि नृपतिभिरयाच्यमानां दृष्ट्वा पिता परमदुःखितोऽभवत् । तामाहूयोवाच च पुत्रि प्रदानकालस्तेऽयम् । न च कश्चित्त्वां वृणोति । तस्माद् गुणैरात्मनः सदृशं भर्तारं स्वयमन्विच्छेति । सा तथेति पितुर्वचनमादाय सचिवैर्युता हैमं रथमास्थाय राजर्षीणां तपोवनानि जगाम । सर्वाणि तीर्थान्याश्रमांश्चाभिगम्य पितुर्वेश्म निववृते । तदा स सभामध्ये भगवता नारदेन सह कथायोगेनोपविष्ट आसीत् । तां तथायान्तीं दृष्ट्वा नारदोऽश्वपतिं पप्रच्छ । क तवेयं सुता गताऽभूत्कुतश्चागता किमर्थं च त्वमिमां भर्त्रे नाद्यापि प्रयच्छसीति । अश्वपतिः प्रोवाच । इयं खल्वनेनैव कार्येण प्रेषिताऽद्यैवा-

गता यो भर्ताऽनया वृतस्तं भगवाञ्श्रोतुमर्हति । इत्युक्त्वा विस्तरेण ब्रूहीति कन्यामादिदेश । एवमादिष्टा सा प्रत्युवाच । आसीच्छाल्वेषु द्युमत्सेनो नाम पृथिवीपतिः । स कालेनान्धो बभूव । विनष्टचक्षुषो बालपुत्रस्य तस्य राज्यं पूर्ववैरिणा छिद्रेऽस्मिन् हृतम् । ततोऽसौ महारण्यं प्रस्थितस्तपोवनं च गत्वा तपस्तेपे । तस्य राज्ञः पुत्रस्तपोवने संवृद्धः सत्यवाननुरूपो मे भर्तेति मनसा वृत इति । नारदस्तु तद्वचः श्रुत्वा प्राह । अहो बत महत्पापं सावित्र्या कृतं यदनया गुणवानपि सत्यवान्वृतः । अश्वपतिः प्राह भगवन् किं तत्पापम् । नारदः प्रत्युवाच । असौ सर्वगुणोपेतः । किंतु गुणानाक्रम्यैक एवास्य दोषस्तिष्ठति । स च प्रयत्नेनापि नातिवर्तितुं शक्यः । दोषस्त्वयमेव यदद्यप्रभृति संवत्सरेणाऽयं क्षीणायुर्भूत्वा देहन्यासं करिष्यतीति । नारदस्य वचः श्रुत्वाऽश्वपतिः सावित्रीमाह । गच्छ त्वमन्यं भर्तारं वरय यतः सत्यवति महानयं दोषः । सावित्री प्राह । सकृदंशो निपतति सकृत्कन्या प्रदीयते । सकृदाह ददानीति त्रीण्येतानि सकृत्सताम् । अतो दीर्घायुरल्पायुर्वा सगुणो निर्गुणो वा सकृन्मया भर्ता वृतो नाहमधुना द्वितीयं वृणोमीति । तच्छ्रुत्वा नारदः प्रोवाच । अश्वपते तव दुहितुः स्थिरेयं बुद्धिः । तस्मात्सत्यवतेऽस्याः प्रदानमेव मे रोचते । एवमुक्त्वा नारदस्त्रिदिवं गतः । राजाऽपि दुहितुः सर्वं वैवाहिकं कारयित्वा द्युमत्सेनाश्रमं कन्यया द्विजैश्च सार्धं पद्भ्यामेव जगाम । गत्वा च सावित्रीं मे कन्यकां स्नुषार्थे गृहाणेति द्युमत्सेनमुवाच । द्युमत्सेन आह । वयं राज्याच्च्युता वनवासमाश्रितास्तपस्विनो भूत्वा धर्मं

चराम: कथं नामेयं तत्र सुता वनवासक्लेशं सहिष्यते । किंतु भूयो भूयोऽश्वपतिनानुरुध्यमानो द्युमत्सेनस्तत्प्रणयमङ्गीचकार । ततोऽखिलानाश्रमवासिनो द्विजानाहूय नृपौ तौ यथाविधि समुद्वाहं कारयामासतु: । अश्वपति: कन्यां यथार्हं परिच्छदं च दत्त्वा परमया मुदा युक्तः स्वभवनं ययौ । सत्यवानपि तां सर्वगुणान्वितां भार्यां लब्ध्वा मुमुदे । सापि मनसेप्सितं भर्तारं प्राप्य परं संतोषमनुबभूव । गते पितरि सा सर्वाण्याभरणानि संन्यस्य वल्कलानि काषायं वस्त्रं च जगृहे । शुश्रूषातत्परतया च न केवलं भर्तुर्गुरूणामपि तुष्टिमावहत् । एवं तत्र तेषां निवसतां बहुतिथे काले व्यतीते यदा सत्यवता मर्तव्यं स काल उपस्थित: । भाविनी सावित्री नारदोक्तान् दिवसान् गणयित्वा चतुर्थेऽहनि सत्यवता मर्तव्यमिति संचिन्त्य त्रिरात्रं व्रतमुद्दिश्य दिवारात्रं स्थिताऽभवत् । तस्या व्रताचरणनिश्चयं श्रुत्वा द्युमत्सेनस्तस्मात्तां व्यावर्तयितुमियेष । किंतु सावित्र्युवाच । तात न संताप: कार्यः । अहं व्रतं पारयिष्यामि । व्यवसायकृतं हीदं व्यवसायश्च कारणमिति । एवमुक्त: श्वशुरस्तामनुजज्ञे । अथ भर्तृमरणदिवसे प्राप्ते प्रातरुत्थाय हुताशनं हुत्वा सर्वान् द्विजान् वृद्धाञ् श्वश्रूं श्वशुरं चाभिवाद्य सर्वेषामवैधव्याशिष: प्रत्यग्रहीत् । अनन्तरं द्युमत्सेनस्तामाह । त्वया यथोद्दिष्टं व्रतं पारितमधुनाऽऽहारकाल: संप्राप्त: । सावित्र्योक्तम् । अस्तं गत आदित्ये भोक्तव्यमिति मे संकल्पः । एवं संभाषमाणायां सावित्र्यां सत्यवान्स्कन्धे परशुमादाय काष्ठान्याहर्तुं वनं प्रस्थित: । तं च सावित्र्यनुगन्तुकामा तेन निषिध्यमानापि ध्रुवेच्छाऽ-

भूत् । ततः सत्यवानाह । यदि ते गमनोत्साहस्तव प्रियं करिष्यामि । किंतु मम गुरूनामन्त्रयस्व नो चेन्मामयं दोषः स्पृशेत् । एवमुक्त्वा सा श्वश्रूं श्वशुरं च गत्वोवाच । आर्ययार्येण चाभ्यनुज्ञाताऽनेन सह वनं गन्तुमिच्छामि । कुसुमितं वनं द्रष्टुं परं हि मे कौतूहलमिति । ततोऽनुज्ञां लब्ध्वा भर्त्रा सह सा वनं प्रतस्थे ।

Mahâbhârata.

IV.

The tale of Sâvitrî.

Part II.

तौ दंपती विचित्राणि वनानि पुण्यवहा नदीः पुष्पितांश्च नगोत्तमान् दृष्ट्वा परां मुदमवापतुः । अथ सत्यवान्फलान्यादाय काष्ठानि पाटयामास । तच्छ्रमेणाऽस्य शिरसि वेदना जज्ञे । अतः स प्रियामभिगम्याह । अस्वस्थमिवात्मानं लक्षये तत्स्वपितुमिच्छामि न मे स्थातुं शक्तिरिति । पतिवाक्यपरायणा सा स्वोत्सङ्गेऽस्य शिरः कृत्वा भूतले निषसाद । अथ सा मुहूर्तादेव रक्तवाससं बद्धमौलिमादित्यसमतेजसं श्यामावदातं रक्ताक्षं पाशहस्तं भयावहं पुरुषं सत्यवतः पार्श्वे स्थितमपश्यत् । तं तथाविधमवलोक्य सावित्री प्राह । दैवतं त्वामभिजानामि । वपुरेतदमानुषम् । कस्त्वं किं चिकीर्षसि चेति मां ब्रूहि । अहं यमः क्षीणायुषः सत्यवतः प्राणानपहर्तुकामश्चेत्याख्याय यमस्त-

स्य कायात्पाशबद्धं वशंगतमङ्गुष्ठमात्रं पुरुषं बलान्निश्चकर्ष दक्षिणामुखः प्रतस्थे च । सावित्र्यपि दुःखार्ता तमेवानुगन्तुमारब्धा । तामवलोक्य यमः प्राह । निवर्तस्व सावित्रि कुरुष्वास्यौर्ध्वदेहिकं कृतं भर्तुस्त्वयानृण्यं यावद्गम्यं गतं त्वयेति । तत उभयोरेवंविधः संवादः प्रचक्रमे ।

सावित्र्युवाच

यत्र मे नीयते भर्ता स्वयं वा यत्र गच्छति ।
मयाऽपि तत्र गन्तव्यमेष धर्मः सनातनः ॥
प्राहुः साप्तपदं मैत्रं बुधास्तत्त्वार्थदर्शिनः ।
मित्रतां च पुरस्कृत्य किंचिद्वक्ष्यामि तच्छृणु ॥
नानात्मवन्तो हि वने चरन्ति धर्मं च वासं च परिश्रमं च ।
विज्ञानतो धर्ममुदाहरन्ति तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥

यम उवाच

निवर्त तुष्टोऽस्मि तवानया गिरा स्वराक्षरव्यञ्जनहेतुयुक्तया ।
वरं वृणीष्वेह विनास्य जीवितं ददानि ते सर्वमनिन्दिते वरम् ॥

सावित्र्युवाच

च्युतः स्वराज्याद्वनवासमाश्रितो विनष्टचक्षुः श्वशुरो ममाऽश्रमे ।
स लब्धचक्षुर्बलवान्भवेन्नृपस्तव प्रसादाज्ज्वलनार्कसंनिभः ॥

यम उवाच

ददानि ते सर्वमनिन्दिते वरं यथा त्वयोक्तं भविता च तत्तथा ।
तवाऽध्वनि ग्लानिमिवोपलक्षये निवर्त गच्छस्व न ते श्रमो भवेत् ॥

सावित्र्युवाच

कुतः श्रमो भर्तृसमीपतो हि मे यतो हि भर्ता मम सा गतिर्ध्रुवा ।
यतः पतिं नेष्यसि तत्र मे गतिः सुरेश भूयश्च वचो निबोध मे ॥

सतां सकृत्संगतमीप्सितं परं ततः परं मित्रमिति प्रचक्षते ।
न चाफलं सत्पुरुषेण संगतं ततः सतां संनिवसेत्समागमे ॥

यम उवाच

मनोनुकूलं बुधबुद्धिवर्धनं त्वयेदमुक्तं वचनं हिताश्रयम् ।
विना पुनः सत्यवतोस्य जीवितं वरं द्वितीयं वरयस्व भाविनि ।

सावित्र्युवाच

हृतं पुरा मे श्वशुरस्य धीमतः स्वमेव राज्यं लभतां स पार्थिवः ।
न च स्वधर्मं प्रजहातु मे गुरुर्द्वितीयमेतद्वरयामि ते वरम् ॥

यम उवाच

स्वमेव राज्यं प्रतिपत्स्यतेऽचिरान्न च स्वधर्मात्परिहास्यते नृपः ।
कृतेन कामेन मया नृपात्मजे निवर्त गच्छस्व न ते श्रमो भवेत् ॥

सावित्र्युवाच

प्रजास्त्वयैता नियमेन संयता नियम्य चैता नयसे निकामया ।
अतो यमत्वं तव देव विश्रुतं निबोध चेमां गिरमीरितां मया ॥

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥

यम उवाच

पिपासितस्येव भवेद्यथा पयस्तथा त्वया वाक्यमिदं समीरितम् ।
विना पुनः सत्यवतोऽस्य जीवितं वरं वृणीष्वेह शुभे यदीच्छसि ॥

सावित्र्युवाच

ममानपत्यः पृथिवीपतिः पिता भवेत्पितुः पुत्रशतं तथौरसम् ।
कुलस्य संतानकरं च यद्भवेत्तृतीयमेतं वरयामि ते वरम् ॥

यम उवाच

कुलस्य संतानकरं सुवर्चसं शतं सुतानां पितुरस्तु ते शुभे ।
कृतेन कामेन नराधिपात्मजे निवर्त दूरं हि पथस्त्वमागता ॥

सावित्र्युवाच

न दूरमेतन्मम भर्तृसंन्निधौ मनो हि मे दूरतरं प्रधावति ।
अथ व्रजन्नेव गिरं समुद्यतां मयोच्यमानां शृणु भूय एव च ॥
विवस्वतस्त्वं तनयः प्रतापवांस्ततो हि वैवस्वत उच्यसे बुधैः ।
समेन धर्मेण च रञ्जिताः प्रजास्ततस्तवेहेश्वर धर्मराजता ॥

आत्मन्यपि न विश्वासस्तावान्भवति सत्सु यः ।
तस्मात्सत्सु विशेषेण सर्वः प्रणयमिच्छति ॥

यम उवाच

उदाहृतं ते वचनं यदङ्गने शुभे न तादृक् त्वदृते मया श्रुतम् ।
अनेन तुष्टोऽस्मि विनास्य जीवितं वरं चतुर्थं वरयस्व गच्छ च ॥

सावित्र्युवाच

ममात्मजं सत्यवतस्तथौरसं भवेदुभाभ्यामिह यत्कुलोद्वहम् ।
शतं सुतानां बलवीर्यशालिनामिमं चतुर्थं वरयामि ते वरम् ॥

यम उवाच

शतं सुतानां बलवीर्यशालिनां भविष्यति प्रीतिकरं तवाबले ।
परिश्रमस्ते न भवेन्नृपात्मजे निवर्त दूरं हि पथस्त्वमागता ॥

सावित्र्युवाच

सतां सदा शाश्वतधर्मवृत्तिः सन्तो न सीदन्ति न च व्यथन्ते ।
सतां सद्भिर्नाफलः संगमोस्ति सद्भ्यो भयं नानुवर्तन्ति सन्तः ॥
आर्यजुष्टमिदं वृत्तामति विज्ञाय शाश्वतम् ।
सन्तः परार्थं कुर्वाणा नावेक्षन्ते प्रतिक्रियाम् ॥

यम उवाच

यथा यथा भाषसि धर्मसंमितं मनोऽनुकूलं सुपदं महार्थवत् ।
तथा तथा मे त्वयि भक्तिरुत्तमा वरं वृणीष्वाप्रतिमं पतिव्रते ॥

सावित्र्युवाच

न कामये भर्तृविनाकृता सुखं न कामये भर्तृविनाकृता दिवम् ।
न कामये भर्तृविनाकृता श्रियं न भर्तृहीना व्यवसामि जीवितुम् ॥
वरातिसर्गः शतपुत्रता मम त्वयैव दत्तो ह्रियते च मे पतिः ।
वरं वृणे जीवतु सत्यवानयं तवैव सत्यं वचनं भविष्यति ॥
यमस्तथेत्युक्त्वा पाशं मुक्त्वा च सावित्रीमाह । हे कुलनन्दिनि

एष ते भर्ता मया मुक्तः । स त्वया सार्धं चतुर्वर्षशतायुरवाप्स्यति । इत्युक्त्वाऽसौ स्वलोकं ययौ । गते तस्मिन् सावित्री यावत्सत्यवन्तमाभिगम्यावलोकयति तावत्स लब्धसंज्ञो भूत्वा प्रोष्येवागतोऽहं क्वासौ श्यामः पुरुषो गतस्तवोत्सङ्गे प्रसुप्तोऽहं घोरं तमो महौजसं पुरुषं चापश्यं किमयं स्वप्न उत सत्यमिति तां सोत्कण्ठं पप्रच्छ । सावित्री प्रत्युवाच । अधुना रजनी व्यवगाहते श्वस्ते सर्वमाख्यास्यामि संप्रति निवृत्तो दिवाकरो नक्तंचराश्च क्रूराभिभाषिणश्चरन्ति । तद्यदि तेऽभिरोचते तत इमां क्षपामत्रैवोषित्वा श्वो गृहं यास्याव इति । सत्यवानाह । दिवापि मयि निष्क्रान्ते मम गुरू संतप्येते । मदर्थं तयोरद्य काऽवस्थेति न जाने । माता वृद्धा पिताप्यन्धस्तयोरहं यष्टिः किल । अतः पित्रोः सकाशं गमनमेव वरमिति सावित्रीमुक्त्वा त्वरायुक्तस्तया पतिव्रतया सहाश्रमं प्रायात् । एतस्मिन्नेव काले द्युमत्सेनो लब्धचक्षुः प्रसन्नया दृष्ट्या सर्वं ददर्श । पुत्रमनागतं विलोक्य पितरौ परमामार्तिं गत्वाश्रमान्नदीः सरांसि वनानि च विचिन्वन्तौ परं परिश्रमं जग्मतुः । सुतस्य बाल्यवृत्तानि तानि तानि स्मृत्वा शोककर्षितौ कथमप्याश्रमवासिभिर्ऋषिभिः परिसान्त्वितौ । तस्मिन्नेव क्षणे भर्त्रा सह सावित्र्याश्रमं प्रविवेश । तावुभौ कुशलौ दृष्ट्वा सर्वे ते परमानन्दमवापुः । द्युमत्सेनं लब्धचक्षुषं दृष्ट्वा ऋषयः सावित्रीमस्य कारणं त्वं खलु विजानासि यदि न रहस्यं तर्हि निवेद्यतामित्यूचुः । सा प्रत्युवाच । पूर्वं नारदमहर्षिणा कथितो मम भर्तुर्मृत्युरद्यागत इति चिन्तयित्वा तेनैव सहाहं वनमगच्छम् । तत्र च परिश्रमात्सुप्तमिमं यमो दक्षिणामाशां

निनाय। अहं तु तमेवानुसरन्ती स्तुतिभिराराध्य प्रासादयम्। ततस्तुष्टेन तेन मह्यं पञ्चवरा दत्ताः। तेषामेकतमेन मे श्वशुरो लब्धचक्षुर्जातः स्वराज्यमप्याचिरात्प्राप्स्यत्येव। इत्युक्त्वान्येषामपि चतुर्णां वराणां स्वरूपं कथयित्वा विरराम। तन्निशम्य ऋषय ऊचुः। साध्वि व्यसनैरभिद्रुतं तमोमये ह्रदे निमज्जमानं नरेन्द्रस्य कुलं सुशीलव्रतपुण्यया कुलीनया त्वयाऽद्य समुद्धृतम्। इति तामभिनन्द्य सर्वे ते ऋषयो मुदिताः स्वमालयं जग्मुः। तस्यां रात्र्यां व्यतीतायां शाल्वेभ्यः प्रकृतय आगत्य द्युमत्सेनमाहुः। राजन्संप्राप्तानि यानानि चतुरङ्गबलं च सिद्धमतोऽधुनैव नगरं यास्यामो येन भवान्राज्येऽभिषिच्येतेति। द्युमत्सेनोऽपि राज्ञ्या सावित्र्या सुतेन चानुगतो नगरं प्राप्य सिंहासनमारूढः। सत्यवानपि यौवराज्येऽभिषिक्तः। अथ गच्छता कालेन सावित्री पुत्रशतं सुषुवे। तस्याः पिताऽपि पुत्रशतं प्राप। एवमात्मा माता पिता श्वश्रूः श्वशुरो भर्तुः कुलमेव सकलं सावित्र्या कृच्छ्रात्समुद्धृतम्।

Mahábhârata.

V.

Know thyself.

मूढ जहीहि धनागमतृष्णां कुरु तनुबुद्धे मनसि वितृष्णाम्।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम्॥ १॥

अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥ २ ॥

का तव कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं वा कुत आयातस्तत्त्वं चिन्तय तदिदं भ्रातः ॥ ३ ॥

मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं हित्वा ब्रह्मपदं प्रविशाशु विदित्वा ॥ ४ ॥

नलिनीदलगतजलमतितरलं तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याधिव्यालग्रस्तं लोकं शोकहतं च समस्तम् ॥ ५ ॥

तत्त्वं चिन्तय सततं चित्ते परिहर चिन्तां नश्वरवित्ते ।
क्षणमिह सज्जनसंगतिरेका भवति भवार्णवतरणे नौका ॥ ६ ॥

यावद्वित्तोपार्जनशक्तस्तावन्निजपरिवारो रक्तः ।
तदनु च जरया जर्जरदेहे वार्तां कोऽपि न पृच्छति गेहे ॥ ७ ॥

कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं पश्य हि कोऽहम् ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ ८ ॥

सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ ९ ॥

बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः ।
वृद्धस्तावच्चिन्तामग्नः परमे ब्रह्मणि कोऽपि न लग्नः ॥ १० ॥

शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसंधौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥ ११ ॥

यावज्जननं तावन्मरणं तावज्जननीजठरे शयनम् ।
इति संसारे स्फुटतरदोषः कथमिह मानव तव संतोषः ॥ १२ ॥
दिनयामिन्यौ सायम्प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥ १३ ॥
अङ्गं गलितं पलितं मुण्डं दन्तविहीनं जातं तुण्डम् ।
करधृतकम्पितशोभितदण्डं तदपि न मुञ्चत्याशा पिण्डम् ॥ १४ ॥
त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः ।
सर्वं पश्यात्मन्यात्मानं सर्वत्रोत्सृज भेदज्ञानम् ॥ १५ ॥

Mohamudgra.

VI.

Repudiation of Sakuntalà by Dushyanta.

Part I.

पुरोहितः– (पुरोगत्वा) एते विधिवदर्चितास्तपस्विनः । कश्चिदेषामुपाध्यायसंदेशः । तं देवः श्रोतुमर्हति ।

राजा– अवहितोऽस्मि ।

ऋषय– (हस्तानुद्यम्य) विजयस्वराजन् ।

राजा– सर्वानभिवादये ।

ऋषय– इष्टेन युज्यस्व ।

राजा– अपि निर्विघ्नतपसो मुनयः ।

ऋषय—

कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति ॥ १ ॥

राजा— अर्थवान्खलु मे राजशब्दः । अथ भगवाल्लोकानुग्रहाय कुशली काश्यपः ।

ऋषय— स्वाधीनकुशलाः सिद्धिमन्तः । स भवन्तमनामयप्रश्नपूर्वकमिदमाह ।

राजा— किमाज्ञापयति भगवान् ।

शार्ङ्गरव— यन्मिथःसमयादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुज्ञातम् । कुतः

त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमती च सत्क्रिया ।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः ॥ २ ॥

तदिदानीमापन्नसत्त्वा प्रतिगृह्यतां सहधर्मचरणायेति ।

गौतमी— आर्य किमपि वक्तुकामास्मि । न मे वचनावसरोऽस्ति । कथमिति—

नापेक्षितो गुरुजनोऽनया न त्वयापि पृष्टो बन्धुः ।
एकैकमेव चरिते किं भणतु एक एकस्य ॥ ३ ॥

शकुन्तला— (आत्मगतम्) किं नु खल्वार्यपुत्रो भणति ।

राजा— किमिदमुपन्यस्तम् ।

शकुन्तला— (आत्मगतम्) पावकः खल्वेष वचनोपन्यासः ।

शार्ङ्गरव– कथमिदं नाम । भवन्त एव सुतरां लोकवृत्तान्त-निष्णाताः

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
तदप्रियापि प्रमदा स्वबन्धुभिः ॥ ४ ॥

राजा– किं चात्रभवती मया परिणीतपूर्वा ।

शकु.– (सविषादम्) (आत्मगतम्) हृदय सांप्रतं त आशङ्का ।

शार्ङ्गरव–

किं कृतकार्यद्वेषाद्धर्मं प्रति विमुखतोचिता राज्ञः ।

राजा– कुतोऽयमसत्कल्पनाप्रश्नः ।

शार्ङ्गरव–

मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु ॥ ५ ॥

राजा– विशेषेणाधिक्षिप्तोऽस्मि ।

गौतमी– जाते मुहूर्तं मा लज्जस्व । अपनेष्यामि तावत्तेऽवगुण्ठनम् । ततस्त्वां भर्ताऽभिज्ञास्यति । (इति यथोक्तं करोति)

राजा– (शकुन्तलां निर्वर्ण्य) (आत्मगतम्)

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्नवेत्यव्यवस्यन् ।

भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न खलु च परिभोक्तुं नैव शक्नोमि हातुम् ॥ ६ ॥
इति विचारयन्स्थितः)

प्रतीहारी– अहो धर्मावेक्षिता भर्तुः । ईदृशं नाम सुखोपनतं रूपं प्रेक्ष्य कोऽन्यो विचारयति ।

शार्ङ्गरव– भो राजन् किमिति जोषमास्यते ।

राजा– भोस्तपोधनाश्चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि । तत्कथमिमामभिव्यक्तसत्त्वलक्षणां प्रत्यात्मानं क्षेत्रिणमाशङ्कमानःप्रतिपत्स्ये

शकु.– (अपवार्य) आर्यपुत्रस्य परिणय एव संदेहः । कुत इदानीं मे दूराधिरोहिण्याशा ।

शार्ङ्गरव– मा तावत्

कृताभिमर्षामनुमन्यमानः
सुतां त्वया नाम मुनिर्विमान्यः ।
मुष्टं प्रतिग्राहयता स्वमर्थं
पात्रीकृतो दस्युरिवासि येन ॥ ७ ॥

शारद्वत– शार्ङ्गरव विरम त्वमिदानीम् । शकुन्तले वक्तव्यमुक्तमस्माभिः । सोऽयमत्रभवानेवमाह । दीयतामस्मै प्रत्ययप्रतिवचनम् ।

शकु.– (अपवार्य) इदमवस्थान्तरं गते तादृशेऽनुरागे किं वास्मारितेन । आत्मेदानीं मे शोचनीय इति व्यवासितम् । (प्रकाशम्)

आर्यपुत्र–(इत्यर्धोक्ते) संशयित इदानीं परिणये नैष समुदाचारः । पौरव न युक्तं नाम ते तथा पुराश्रमपदे स्वभावोत्तानहृदयमिमं जनं समयपूर्वं प्रतार्येदृशैरक्षरैः प्रत्याख्यातुम् ।

राजा– (कर्णौ पिधाय) शान्तं पापम्

व्यपदेशमाविलायितुं किमीहसे जनमिमं च पातयितुम् ।
कूलंकषेव सिन्धुः प्रसन्नमम्भस्तरु तटं च॥ ८ ॥

शकु.– भवतु । यदि परमार्थतः परपरिग्रहशङ्किना त्वयैवं प्रवृत्तं तदभिज्ञानेनानेन तवाशङ्कामपनेष्यामि ।

राजा– उदारः कल्पः ।

शकु.– (मुद्रास्थानं परामृश्य) हा धिक्–हाधिक् । अङ्गुलीयकशून्या मेऽङ्गुलिः । (इति सविषादं गौतमीमवेक्षते)

गौतमी– नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टमङ्गुलीयकम् ।

राजा– (सस्मितम्) इदं तत्प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते

शकु.– अत्र तावद्विधिना दर्शितं प्रभुत्वम् । अपरं ते कथयिष्यामि ।

राजा– श्रोतव्यमिदानीं संवृत्तम् ।

Sâkuntala V

VII.

Repudiation of S'akuntalâ by Dushyanta.

Part II.

शकुन्तला— नन्वेकदिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते सन्निहितमासीत् ।

राजा— शृणुमस्तावत् ।

शकु.— तत्क्षणं स मे पुत्रकृतको दीर्घापाङ्गो नाम मृगपोतक उपस्थितः । त्वयायं तावत्प्रथमं पिबत्वित्यनुकम्पिनोपच्छन्दित उदकेन । न पुनस्तेऽपरिचयाद्धस्ताभ्यासमुपगतः । पश्चात्तस्मिन्नेव मया गृहीते सलिले तेन कृतः प्रणयः । तदा त्वमित्थं प्रहसितोऽसि । सर्वः सगन्धेषु विश्वसिति द्वावप्यत्रारण्यकाविति ।

राजा— एवमादिभिरात्मकार्यनिर्वर्तिनीनामनृतमयवाङ्मधुभिराकृष्यन्ते विषयिणः ।

गौतमी— महाभाग नार्हस्येवं मन्त्रयितुम् । तपोवनसंवर्धितोऽनभिज्ञोऽयं जनः कैतवस्य ।

राजा— तापसवृद्धे

स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात्स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥ ९ ॥

शकु.— (सरोषम्) अनार्य आत्मनो हृदयानुमानेन प्रेक्षसे । क

इदानीमन्यो धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तवानुकृतं प्रतिपत्स्यते ।

राजा– (आत्मगतम्) संदिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते । तथा ह्यनया

मय्येवं विस्मरणदारुणचित्तवृत्तौ
वृत्तं रहःप्रणयमप्रतिपद्यमाने ।
भेदाद् भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥ १० ॥

(प्रकाशम्) भद्रे प्रथितं दुष्यन्तस्य चरितम् । तथापीदं न लक्षये ।

शकुन्तला– सुष्ठु तावदत्र स्वच्छन्दचारिणी कृतास्मि याहमस्य पुरुवंशप्रत्ययेन मुखमधोर्हृदयस्थितविषस्य हस्ताभ्यासमुपगता । (इति पटान्तेन मुखमावृत्य रोदिति)

शार्ङ्गरव– इत्थमात्मकृतमप्रतिहतं चापलं दहति

अतः परीक्ष्य कर्तव्यं विशेषात्संगतं रहः
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥ ११ ॥

राजा– अयि भोः किमत्रभवतीप्रत्ययादेवास्मान्संभ्रतदोषैराधिक्षिपथ ।

शार्ङ्गरव-- (सासूयम्) श्रुतं भवद्भिरधरोत्तरम्

आजन्मनः शाठ्यमशिक्षितो य-
स्तस्याप्रमाणं वचनं जनस्य ।

परातिसंधानमधीयते यै-
विद्येति ते सन्तु किलाप्तवाचः ॥ १२ ॥

राजा– भोः सत्यवादिन् अभ्युपगतं तावदस्माभिरेवम्। किं पुनरिमामतिसंधाय लभ्यते।

शार्ङ्गरव– विनिपातः।

राजा– विनिपातः पौरवैः प्रार्थ्यत इति न श्रद्धेयमेतत्।

शारद्वत– शार्ङ्गरव किमुत्तरेण। अनुष्ठितो गुरोः संदेशः प्रतिनिवर्तामहे वयम्। (राजानं प्रति)

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥ १३ ॥

गौतमि गच्छाग्रतः।

(इति प्रस्थिताः)

शकु.– कथमनेन कितवेन विप्रलब्धाऽस्मि यूयमपि मां परिदेविनीं परित्यजथ। (इत्यनुप्रतिष्ठते)

गौतमी– (स्थित्वा) वत्स शार्ङ्गरव अनुगच्छतीयं खलु नः करुणपरिदेविनी शकुन्तला। प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्री करिष्यति।

शार्ङ्गरव– (सरोषं निवृत्य) किं पुरोभागिनि स्वातन्त्र्यमवलम्बसे।

(शकुन्तला भीता वेपते)

शार्ङ्गरव– शकुन्तले

यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पितुरुत्कुलया त्वया ।
अथ तु वेत्सि शुचि व्रतमात्मनः
पतिकुले तव दास्यमपि क्षमम् ॥ १४ ॥

तिष्ठ । साधयामो वयम् ।

राजा– भोस्तपस्विन् किमत्रभवतीं विप्रलभसे । कुतः

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥ १५ ॥

शार्ङ्गरव– यदा तु पूर्ववृत्तमन्यसंगाद्विस्मृतो भवान् तदा कथमधर्मभीरुः ।

राजा– भवन्तमेवात्र गुरुलाघवं पृच्छामि ।

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये ।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः ॥ १६ ॥

पुरोहित– (विचार्य) यदि तावदेवं क्रियताम् ।

राजा– अनुशास्तु मां भवान्

पुरोहित– अत्रभवती तावदाप्रसवादस्मद्गृहे तिष्ठतु । कुत इदमुच्यत इति चेत् त्वं साधुभिरुद्दिष्टः । प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति । स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यत्याभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि । विपर्यये तु पितुरस्याः समीपनयनमवस्थितमेव ।

राजा— यथा गुरुभ्यो रोचते ।

पुरोहित— वत्से अनुगच्छ माम् ।

शकु.— भगवति वसुधे देहि मे विवरम् । (इति रुदती प्रस्थिता)

S'akuntala V.

VIII.

Ayodhyâ and its subjects &c.

कोशलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥ १ ॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता ।
मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ॥ २ ॥
आयता दश च द्वे च योजनानि महापुरी ।
श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा ॥ ३ ॥
राजमार्गेण महता सुविभक्तेन शोभिता ।
मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः ॥ ४ ॥
तां तु राजा दशरथो महाराष्ट्रविवर्धनः ।
पुरीमावासयामास दिवि देवपतिर्यथा ॥ ५ ॥
कपाटतोरणवतीं सुविभक्तान्तरापणाम् ।
सर्वयन्त्रायुधवतीमुषितां सर्वशिल्पिभिः ॥ ६ ॥
दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदाम् ।
वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा ॥ ७ ॥

सामन्तराजसंघैश्च बलिकर्मभिरावृताम् ।
नानादेशनिवासैश्च वणिग्भिरुपशोभिताम् ॥ ८ ॥

प्रासादै रत्नविकृतैः पर्वतैरिव शोभिताम् ।
कूटागारैश्च संपूर्णामिद्रस्येवामरावतीम् ॥ ९ ॥

चित्रामष्टापदाकारां वरनारीगणायुताम् ।
सर्वरत्नसमाकीर्णां विमानगृहशोभिताम् ॥ १० ॥

तस्यां पुर्यामयोध्यायां वेदवित्सर्वसंग्रहः ॥
दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥ ११ ॥

इक्ष्वाकूणामधिरथो यज्वा धर्मपरो वशी ।
महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥ १२ ॥

बलवान्निहताऽमित्रो मित्रवान्विजितेन्द्रियः ।
धनैश्च संचयैश्चान्यैः शक्रवैश्रवणोपमः ॥ १३ ॥

यथा मनुर्महातेजा लोकस्य परिरक्षिता ।
तथा दशरथो राजा लोकस्य परिरक्षिता ॥ १४ ॥

तेन सत्याभिसंधेन त्रिवर्गमनुतिष्ठता ।
पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती ॥ १५ ॥

तस्मिन्पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः ।
नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः ॥ १६ ॥

नाल्पसन्निचयः कश्चिदासीत्तस्मिन्पुरोत्तमे ।
कुटुम्बी यो ह्यसिद्धार्थोऽगवाश्वधनधान्यवान् ॥ १७ ॥

कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित् ।
द्रष्टुं शक्यमयोध्यायां नाविद्वान्न च नास्तिकः ॥ १८ ॥

सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः ।
मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥ १९ ॥

स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ।
दानाध्ययनशीलाश्चसंयताश्च प्रतिग्रहे ॥ २० ॥

नास्तिको नाऽनृती वापि न कश्चिदबहुश्रुतः ।
नासूयको न चाशक्तो नाविद्वान्विद्यते क्वचित् ॥ २१ ॥

नाषडङ्गविदत्रास्ति नाव्रतो नाबहुश्रुतः ।
न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन ॥ २२ ॥

कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान् ।
द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥ २३ ॥

वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजकाः ।
कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥ २४ ॥

दीर्घायुषो नराः सर्वे धर्मं सत्यं च संश्रिताः ।
सहिता पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥ २५ ॥

क्षत्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्रमनुव्रताः ।
शूद्राः स्वकर्मनिरतास्त्रीन्वर्णानुपचारिणः ॥ २६ ॥

सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता ।
यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता ॥ २७ ॥

नित्यमत्तैः सदा पूर्णा नागैरचलसंनिभैः ।
सा योजने द्वे च भूयः सत्यनामा प्रकाशते ॥ २८ ॥
तां पुरीं स महातेजा राजा दशरथो महान् ।
शशास शमितामित्रो नक्षत्राणीव चन्द्रमाः ॥ २९ ॥
तां सत्यनामां दृढतोरणार्गलां गृहैर्विचित्रैरुपशोभितां शिवाम् ।
पुरीमयोध्यां नृसहस्रसंकुलां शशास वै शक्रसमो महीपतिः ३०॥

Râmâyana.

IX.

The hermitage of Jâbâli.

अवलोक्य चाहमचिन्तयम् । अहो प्रभावस्तपसाम् । इयमस्य शान्तापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सौदामिनीव चक्षुषः प्रतिहन्ति तेजांसि । सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य । नित्यमसहिष्णु तपस्विनां तनुतपसामपि तेजः प्रकृत्या भवति । किमुत सकलभुवनतलवन्दितचरणानामनवरततपःक्षपितमलानां करतलामलकफलवदखिलं जगदालोकयतां दिव्येन चक्षुषा भगवतामेवं विधानामवक्षयकारिणाम् । पुण्यानि हि नामग्रहणान्यपि महामुनीनाम् । किं पुनर्दर्शनानि । धन्यमिदमाश्रमपदमयमधिपतिर्यत्र । अथवा भुवनतलमेव धन्यमखिलमनेनाधिष्ठितमवनितलकमलयोनिना । पुण्यभाजः खल्वमी मुनयो यदहर्निशमेनमपरमिव नलिनासनमपगतान्यव्यापारा मुखावलोकननिश्चलदृष्टयः पुण्याः कथाः शृण्वन्तः समुपासते ।

सरस्वत्यपि धन्या यास्य सततमतिप्रसन्ने करुणाजलनिस्यन्दिन्यगाधगाम्भीर्ये मुखकमलसंपर्कमनुभवन्ती निवसति हंसीव मानसे। धरणितलमनेनाधिष्ठितमालोक्य न वहति नूनमिदानीं सप्तर्षिमण्डलनिवासाभिमानमम्बरतलम्। प्रायो महाभूतानामपि भवन्ति तेजांसि दुःसहानि। सर्वतेजस्विनामयं चाग्रणीः। द्विसूर्यमिवाभाति जगदनेनाधिष्ठितं महात्मना। निष्कम्पेव क्षितिरेतदवष्टम्भात्। एष प्रवाहः करुणारसस्य संतरणसेतुः संसारसिन्धोराधारः क्षमाम्भसां परशुस्तृष्णालतागहनस्य सागरः संतोषामृतस्योपदेष्टा सिद्धिमार्गस्यास्तगिरिरसद्ग्रहस्य मूलमुपशमतरोर्नाभिः प्रज्ञाचक्रस्य स्थितिवंशो धर्मध्वजस्य तीर्थं सर्वविद्यावताराणां वडवानलो लोभार्णवस्य निकषोपलः शास्त्ररत्नानां दावानलो रागपल्लवस्य महामन्त्रः क्रोधभुजंगस्य दिवसकरो मोहान्धकारस्यार्गलाबन्धो नरकद्वाराणां कुलभवनमाचाराणामायतनं मङ्गलानामभूमिर्मदविकाराणां दर्शकः सत्पथानामुत्पत्तिः साधुताया नेमिरुत्साहचक्रस्याश्रयः सत्त्वस्य प्रतिपक्षः कलिकालस्य कोशस्तपसः सखा सत्यस्य क्षेत्रमार्जवस्य प्रभवः पुण्यसंचयस्यादत्तावकाशो मत्सरस्यारातिर्विपत्तेरस्थानं परिभूतेरननुकूलोऽभिमानस्यासंमतो दैन्यस्यानायत्तो रोषस्यावशो विषयाणामनभिमुखः सुखानाम्। अस्य भगवतः प्रसादादेवोपशान्तवैरमपगतमत्सरं तपोवनम्। अहो प्रभावो महात्मनाम्। अत्र हि शाश्वतिकमपहाय विरोधमुपशान्तात्मानस्तिर्यञ्चोऽपि तपोवनवसतिसुखमनुभवन्ति। तथा ह्येष विकचोत्पलवनरचनानुकारिणमुपतप्तचारुचन्द्रकशतं हरिणलोचनद्युतिशबलमभिनवशाद्वलमिव विशति शिखिनः

कलापमातपाहतो निःशङ्कमहिः । अयमुत्सृज्य मातरमजातकेसरैः केसरिशिशुभिः सहोपजातपरिचयः प्रक्षरत्क्षीरधारमापिबति कुरङ्गशावकः सिंहीस्तनम् । एष मृणालकलापाशङ्किभिः जटाभारमामीलितलोचनो बहु मन्यते द्विरदकलभैराकृष्यमाणं मृगपतिः । इदमिह कपिकुलमपगतचापलमुपनयति मुनिकुमारकेभ्यः स्नातेभ्यः फलानि । एते च न निवारयन्ति मदान्धा अपि गण्डस्थलीभाञ्जि मदजलपाननिश्चलानि मधुकरकुलानि जातदयाः कर्णतालैः करिणः । किं बहुना । फलमूलभृतो वल्कलिनो निश्चेतनास्तरवोपि सनियमा इवालक्ष्यन्ते अस्य भगवतः । किं पुनः सचेतनाः प्राणिनः ।

Kâdambarî

X.

Siva disguised as an ascetic to test Pârvatí's love.

अथाजिनाषाढधरः प्रगल्भवाग्ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रयो यथा ॥ १ ॥

तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ २ ॥

विधिप्रयुक्तां परिगृह्य सत्क्रियां परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ ३ ॥

अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥ ४ ॥

अपि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा ॥ ५ ॥

अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु ।
य उत्पलाक्षि प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥ ६ ॥

यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः ।
तथाहि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम् ॥ ७ ॥

विकीर्णसप्तर्षिबलिप्रहासिभिस्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ।
यथा त्वदीयैश्चरितैरनाविलैर्महीधरः पावित एष सान्वयः ॥ ८ ॥

प्रयुक्तसत्कारविशेषमात्मना न मां परं संप्रतिपत्तुमर्हसि ।
यतः सतां सन्नतगात्रि संगतं मनीषिभिः साप्तपदीनमुच्यते ॥ ९

अतोऽत्र किंचिद्भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ १० ॥

कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वयस्तपःफलं स्यात्किमतः परं वद ॥ ११ ॥

भवत्यनिष्टादपि नाम दुःसहान्मनस्विनीनां प्रतिपत्तिरीदृशी ।
विचारमार्गप्रहितेन चेतसा न दृश्यते तच्च कृशोदरि त्वयि ॥ १२ ॥

अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्नसूचये ॥ १३ ॥

किमित्यपास्याभरणानि यौवने धृतं त्वया वार्द्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ॥ १४ ॥

दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ॥ १५ ॥

निवेदितं निःश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते ।
न दृश्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम् ॥ १६ ॥

अहो स्थिरः कोऽपि तवेप्सितो युवा चिराय कर्णोत्पलशून्यतां गते ।
उपेक्षते यः श्लथलम्बिनीर्जटाः कपोलदेशे कलमाग्रपिङ्गलाः ॥ १७ ॥

मुनिव्रतैस्त्वामतिमात्रकर्शितां दिवाकराप्लुष्टविभूषणास्पदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते ॥ १८ ॥

अवैमि सौभाग्यमदेन वञ्चितं तव प्रियं यश्चतुरावलोकिनः ।
करोति लक्ष्यं चिरमस्य चक्षुषो न वक्त्रमात्मीयमरालपक्ष्मणः ॥ १९ ॥

कियच्चिरं श्राम्यसि गौरि विद्यते ममापि पूर्वाश्रमसंचितं तपः ।
तदर्धभागेन लभस्व काङ्क्षितं वरं तमिच्छामि न साधु वेदितुम् ॥ २० ॥

इति प्रविश्याभिहिता द्विजन्मना मनोगतं सा न शशाक शंसितुम् ।
अथो वयस्यां परिपार्श्ववर्तिनीं विवर्तितानञ्जननेत्रमैक्षत ॥ २१ ॥

सखी तदीया तमुवाच वर्णिनं निबोध साधो तव चेत् कुतूहलम् ।
यदर्थमम्भोजमिवोष्णवारणं कृतं तपःसाधनमेतया वपुः ॥ २२ ॥

इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात्पिनाकपाणिं पतिमाप्तुमिच्छति ॥ २३ ॥

यदा च तस्याधिगमे जगत्पतेरपश्यदन्यं न विधिं विचिन्वती ।
तदा सहास्माभिरनुज्ञया गुरोरियं प्रपन्ना तपसे तपोवनम् ॥ २४ ॥

द्रुमेषु सख्या कृतजन्मसु स्वयं फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते मनोरथोस्याः शशिमौलिसंश्रयः॥२५॥

न वेद्मि स प्रार्थिदुर्लभः कदा सखीभिरस्रोत्तरमीक्षितामिमाम् ।
तपःकृशामभ्युपपत्स्यते सखीं वृषेव सीतां तदवग्रहक्षताम् ॥ २६ ॥

अगूढसद्भावमितीङ्गितज्ञया निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमामपृच्छदव्याञ्जितहर्षलक्षणः ॥ २७ ॥

अथाग्रहस्ते मुकुलीकृताङ्गुलौ समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथंचिदद्रेस्तनया मिताक्षरं चिरव्यवस्थापितवागभाषत ॥ २८ ॥

यथा श्रुतं वेदविदां वर त्वया जनोऽयमुच्चैःपदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं मनोरथानामगतिर्न विद्यते ॥ २९ ॥

अथाह वर्णी विदितो महेश्वरस्तदर्थिनी त्वं पुनरेव वर्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं तवानुवृत्तिं न च कर्तुमुत्सहे ॥ ३० ॥

अवस्तुनिर्बन्धपरे कथं नु ते करोऽयमामुक्तविवाहकौतुकः ।
करेण शंभोर्वलयीकृताहिना सहिष्यते तत्प्रथमावलम्बनम् ॥ ३१ ॥

त्वमेव तावत्परिचिन्तय स्वयं कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं गजाजिनं शोणितबिन्दुवर्षि च ॥ ३२ ॥

चतुष्कपुष्पप्रकरावकीर्णयोः परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयोर्विकीर्णकेशासु परेतभूमिषु ॥ ३३ ॥

इयं च तेऽन्या पुरतो विडम्बना यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति ॥ ३४॥

द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥३५॥

बपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने॥ ३६ ॥

निवर्तयास्मादसदीप्सितान्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा ।
अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया ॥ ३७ ॥

इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया ।
विकुञ्चितभ्रूलतमाहिते तया विलोचने तिर्यगुपान्तलोहिते ॥ ३८ ॥

उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकतामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥३९॥

विपत्प्रतीकारपरेण मङ्गलं निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः ॥ ४०॥

अकिंचनः सन्प्रभवः स संपदां त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः ॥४१॥

विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्तेरवधार्यते वपुः ॥ ४२ ॥

असंपदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना विनिद्रमन्दाररजोरुणाङ्गुली ॥ ४३॥

विवक्षता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधुभाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं कथं स लक्ष्यप्रभवो भविष्यति ॥ ४४ ॥

अलं विवादेन यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते ॥ ४५ ॥

निवार्यतामालि किमप्ययं बटुः पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक्॥ ४६ ॥

इतो गमिष्याम्यथवेतिवादिनी चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ॥ ४७ ॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ४८ ॥

अद्य प्रभृत्यवनताङ्गि तवाऽस्मि दासः
क्रीतस्तपोभिरितिवादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ४९ ॥

Kumârasambhava V.

XI.

The prologue to the Ratnâvalî.

सूत्रधारः— अलमतिप्रसङ्गेन । अद्याहं वसन्तोत्सवे सबहुमान-

माहूय नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः । यथाऽस्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालंकृता रत्नावली नाम नाटिका कृता । सा चास्माभिः श्रुता न तु प्रयोगतो दृष्टा । तत्तस्यैव राज्ञः सकलजनहृदयह्लादिनो बहुमानादस्मासु चानुग्रहबुद्धया यथावत्प्रयोगेण त्वया नाटयितव्येति । (परिक्रम्यावलोक्य च) तद्यावदिदानीं नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि । (परिषदमवलोक्य) अये आवर्जितानीव सकलसामाजिकानां मनांसीति मे निश्चयः । यतः—

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराचरितं नाट्ये च दक्षा वयम् ।
वस्त्वैकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥ १॥

तद्यावद्गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि । (परिक्रम्य नेपथ्याभिमुखमवलोक्य च) इदमस्मदीयं गृहम् । यावत्प्रविशामि ! (प्रविश्य) आर्ये इतस्तावत् ।

(प्रविश्य)

नटी– आर्यपुत्र इयमस्मि । आज्ञापयत्वार्यः को नियोगोऽनुष्ठीयतामिति ।

सूत्रधारः- आर्ये रत्नावलीदर्शनोत्सुकोऽयं राजलोकः तद्गृह्यतां नेपथ्यम् ।

नटी– (निःश्वस्य सोद्वेगम्) आर्यपुत्र निश्चिन्त इदानीमसि

त्वम् । तत्कस्मान्न नृत्यसि । मम पुनर्मन्दभाग्याया एकैव दुहिता । साऽपि त्वया कुत्राऽपि देशान्तरे दत्ता । तदेवं दूरदेशास्थितेन भर्त्रा सह कथं तस्याः पाणिग्रहणं भविष्यतीत्यनया चिन्तयात्मापि मे न प्रतिभाति । तत्किं पुनर्नर्तितव्यम् ।

सूत्रधारः– आर्ये दूरस्थेनेत्यलमुद्वेगेन । पश्य

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥ २ ॥

(नेपथ्ये)

साधु भरतपुत्र साधु । एवमेतत् । कः संदेहः । (द्वीपादित्यादि पठति)

सूत्रधारः– (आकर्ण्य नेपथ्याभिमुखमवलोक्य) आर्ये किमतः परं विलम्बसे । नन्वयं मम यवीयान्भ्राता गृहीतयौगंधरायणभूमिकः प्राप्त एव । तदेहि वयमप्यनन्तरकरणीयवेषवशेनापरभूमिकया सज्जीभवामः ।

Ratnâvalî I.

XII.

Kapinjala's account of himself after Pundarîka's death.

श्रूयतां गन्धर्वराजपुत्रि । तथा कृतार्तप्रलापामपि त्वामहमेकाकिनीमुत्सृज्य वयस्यस्नेहादाबद्धपरिकरः क्व मे प्रियसुहृदमपहृत्य गच्छसीत्यभिधाय पुरुषं तमनुबध्नञ्जवेनोदपतम् । स तु मे प्रतिवचन-

मदत्त्वैव गीर्वाणवर्त्मनि विस्मयोत्फुल्लनयनैरालोक्यमानो वैमानिकैरम्बरसरःकुमुदाकारं तारकागणमतिक्रम्य चन्द्राभिरामसकललोकं चन्द्रलोकमगमत्। तत्र महोदयाख्यायां सभायामिन्दुकान्तमये महति पर्यङ्के तत्पुण्डरीकशरीरं स्थापयित्वा मामवादीत्। कपिञ्जल जानीहि मां चन्द्रमसम्। अहं खल्वुदयगतो जगदनुग्रहाय स्वव्यापारमनुतिष्ठन्ननेन ते प्रियवयस्येन कामापराधाज्जीवितं समुत्सृजता निरपराधः संशप्तः। दुरात्मन्निन्दुहतक यथाहं त्वया करैः संतापित उत्पन्नानुरागोऽप्राप्तहृदयवल्लभासमागमसुखः प्राणैर्वियोजितस्तथा त्वमपि कर्मभूमिभूतेऽस्मिन्भारते वर्षे जन्मनि जन्मन्येवमेव प्राप्तानुरागोऽप्राप्तसमागमसुखस्तीव्रतमां हृदयवेदनामनुभूय जीवितमुत्स्रक्ष्यसीति। अहं तु तेनास्य शापहुतभुजा धगित्युद्दीपित इव निरागाः किमनेनात्मदोषानुबन्धेन निर्विवेकबुद्धिना शप्तोऽस्मीत्युत्पन्नकोपस्त्वमपि मत्तुल्यसुखदुःख एव भविष्यसीति प्रतिशापमस्मै प्रायच्छम्। अपगतामर्षश्च विवेकमागतया बुद्ध्या विमृशन्महाश्वेताव्यतिकरमस्याधिगतवानस्मि। वत्सा तु महाश्वेता मन्मयूखसंभवादप्सरसः कुलाल्लब्धजन्मनि गौर्यामुत्पन्ना तया चायं भर्ता स्वयं वृतोऽनेन च संप्रति स्वयंकृतादेव शापदोषान्मया सह मर्त्यलोके वारद्वयमवश्यमुत्पत्तव्यमन्यथा जन्मनि जन्मनीत्येषा वीप्सैव न चरितार्था भवति। तद्यावदयं शापदोषो व्यपैति तावदस्यात्मना विरहितस्य शरीरस्य मा विनाशोऽभूदिति मयेदमुत्क्षिप्यानीतम्। वत्सा च महाश्वेता समाश्वासिता। तदिदमत्र मत्तेजसाप्यायितमाशापक्षयात्स्थितम्। अधुना त्वं गत्वा वृत्तान्तमिमं श्वेतकेतवे

निवेद्य महाप्रभावोऽसौ कदाचिदत्र प्रतिक्रियामपि कांचित्करोती-त्युक्त्वा मां व्यसर्जयत् ।

अहं तु विनाकृतो वयस्येन शोकावेगान्धो गीर्वाणवर्त्मना धावन्नन्यतममतिक्रोधनं वैमानिकमलङ्घयम् । स तु मां दहन्निव रोषहुतभुजा भ्रुकुटीविकरालेन चक्षुषा निरीक्ष्याब्रवीत् । दुरात्मन्मिथ्यातपोबलगर्वित यदेवमतिविस्तीर्णे गगनमार्गे त्वयाहमुद्दामप्रचारिणा तुरङ्गमेणेवोल्लङ्घितस्तस्मात्तुरङ्गम एव भूत्वा मर्त्यलोकेऽवतर । अहं तु तमुद्बाष्पपक्ष्मा कृताञ्जलिरवदम् । भगवन् वयस्यशोकान्धेन त्वं मयोल्लङ्घितो नावज्ञानात्तत्प्रसीदेमं शापमपसंहरेति । स तु मां पुनरवादीत् । दत्त एव शापः संप्रति मया नान्यथा भवितुमर्हति । तदेदत्ते करोमि किं-यन्तमपि कालं यस्यैव वाह्यतामुपयास्यसि तस्यैवावसाने स्नात्वा विगतशापो भविष्यसि । एवमुक्तस्तु पुनरहमवदम् । भगवन् यद्येवं तत विज्ञापयामि तेनापि मे प्रियवयस्येन चन्द्रमसा सह शापदोषान्मर्त्यलोक एवोत्पत्तव्यं तदेतावन्तमपि भगवान्प्रसादं करोतु मे दिव्येन चक्षुषावलोक्य यथा तुरङ्गमत्वेऽपि मे तेनैव सहावियोगेन कालो यायादिति । स त्वेवमुक्तो मुहूर्तमिव ध्यात्वा पुनर्मामवादीत् । अनया स्नेहलतया ते ममार्द्रितं हृदयं तदालोकितं मयोज्जयिन्यामपत्यस्य हेतोस्तपस्यतस्तारापीडनाम्नो राज्ञश्चन्द्रमसा तनयत्वमुपगन्तव्यं वयस्येनापि ते पुण्डरीकेण तन्मन्त्रिण एव शुकनासनाम्नस्त्वमपि तस्यैव परमोपकारिणश्चन्द्रात्मनो राजपुत्रस्य वाहनतामुपयास्यसीति । अहं तु तद्वचनानन्तरमेवाधः स्थिते महोदधौ न्यपतम् । तस्माच्च तुरङ्गीभूयोद-

तिष्ठम्। संज्ञा तु मे तुरङ्गमत्वेऽपि नैवापयाता येनायं मयास्यैवार्थस्य कृते किन्नरमिथुनानुसारी भूमिमेतामानीतः। तदेष चन्द्रमसोरवतार श्चन्द्रापीडः। योऽप्यसौ प्राक्तनादेवानुरागसंस्कारादभिलषंस्त्वया-जानन्त्या शापाग्निना निर्दग्धः सोऽपि मे वयस्यस्य पुण्डरीकस्या-वतार इति

Kâdambarî.

XIII.

The omnipresent form of Vishnu.

श्रीभगवानुवाच।

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च॥ १॥
पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत॥ २॥
इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्।
मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि॥ ३॥
न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्॥ ४॥

संजय उवाच।

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम्॥ ५॥

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यदायुधम् ॥ ६ ॥
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ७ ॥
दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ ८ ॥
तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ ९ ॥
ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ १० ॥

अर्जुन उवाच ।

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥ ११ ॥
अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपम् ॥१२॥
किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १३ ॥
त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १४ ॥
अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥ १५ ॥

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ १६ ॥

अमी हि त्वां सुरसंघा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः॥१७॥

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसंघाः वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ १८ ॥

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥ १९ ॥

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥२०॥

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २१ ॥

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथा यैः सहास्मदीयैरपि योधमुख्यैः ॥ २२ ॥

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ २३ ॥

यथा नदीनां बहवाम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २४ ॥

यथा प्रदीप्तं ज्वलनं पतंगा विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ २५ ॥

लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रपतन्ति विष्णो ॥ २६ ॥
आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ॥ २७ ॥

Bhagavadgîtâ X.

XIV.

Râma abandoning Sîtâ

रामः– कथं प्रियवचना वक्षसि प्रसुप्तैव । (निर्वर्ण्य सस्नेहम्)

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ १ ॥

प्रतीहारीः-- प्रविश्य देव उपस्थितः ।

रामः– अये कः ।

प्रतीहारीः– आसन्नपरिचारको देवस्य दुर्मुखः ।

रामः– (स्वगतम्) शुद्धान्तचारी दुर्मुखः । स मया पौरजानपदानपसर्पितुं प्रयुक्तः । (प्रकाशम्) आगच्छतु ।

(प्रतीहारी निष्क्रान्ता)

दुर्मुखः– (प्रविश्य) (स्वगतम्) हा कथं सीतादेव्या ईदृश-

मचिन्तनीयं जनापवादं देवस्य कथयिष्यामि । अथवा नियोगः खल्वीदृशो मन्दभागस्य ।

(सीता-उत्स्वप्नायते हा आर्यपुत्र)

रामः– अये सैवेयं रणरणकदायिनी चित्रदर्शनाद्विरहभावना देव्याः स्वप्नोद्वेगं करोति ।

दुर्मुखः– (उपसृत्य) जयतु जयतु देवः ।

रामः– ब्रूहि यदुपलब्धम् ।

दुर्मुखः– उपस्तुवन्ति देवं पौरजानपदा विस्मारिता वयं महाराजदशरथस्य रामदेवेनेति ।

रामः– अर्थवाद एषः । दोषं तु मे कचित् कथय येन स प्रतिधीयेत ।

दुर्मुखः– (सास्रम्) शृणोतु देवः । (कर्णे एवमेवम्)

रामः– अहह तीव्रसंवेगो वाग्वज्रः । (इति मूर्च्छति)

दुर्मुखः– आश्वसितु देवः ।

रामः– (आश्वस्य)

हा हा धिक् परगृहवासदूषणं यद्
वैदेह्याः प्रशमितमद्भुतैरुपायैः ।
एतत्तत्पुनरपि दैवदुर्विपाका-
दालर्कं विषमिव सर्वतः प्रसृप्तम् ॥ ३ ॥

तत्किमत्र मन्दभाग्यः करोमि । (विमृश्य सकरुणम्) अथवा किमन्यत् —

सतां केनापि कार्येण लोकस्याराधनं व्रतम् ।
यत्पूरितं हि तातेन मां च प्राणांश्च मुञ्चता ॥ ४ ॥

संप्रत्येव भगवता वशिष्ठेन संदिष्टम् । अपि च ।

यत्सावित्रैर्दीपितं भूमिपालैर्लोकश्रेष्ठैः साधु शुद्धं चरित्रम् ।
मत्संबंधात्कश्मला किंवदंती स्याच्चेदस्मिन्हंत धिङ् मामधन्यम् ॥५॥

हा देवि देवयजनसंभवे । हा स्वजन्मानुग्रहपवित्रीकृतवसुन्धरे । हा जनकवंशनन्दिनि । हा पावकवशिष्ठारुन्धतीप्रशस्तशीलशालिनि । हा रामैकजीविते । हा महारण्यवासप्रियसखि । हा तातप्रिये । हा स्तोकप्रियवादिनि । कथमेवंविधायास्तवायमीदृशः परिणामः ।

त्वयाजगान्ति पुण्यानि त्वय्यपुण्या जनोक्तयः ।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे ॥ ६ ॥

(दुर्मुखं प्रति) दुर्मुख । ब्रूहि लक्ष्मणमेष ते नूतनो राजा रामः समाज्ञापयति । (कर्णे एवमेवम् ।)

दुर्मु:-- कथमिदानीमग्निपरिशुद्धाया गर्भपरिस्फुरितपवित्ररघुकुलसन्तानाया देव्या दुर्जनवचनादेवमनार्यमध्यवसितं देवेन ।

रामः— शान्तम् । कथं दुर्जनाः पौरजानपदाः ।

इक्ष्वाकुवंशोऽभिमतः प्रजानां जातं च दैवाद्वचनीयबीजम् ।
यच्चाद्भुतं कर्म विशुद्धिकाले प्रत्येतु कस्तद् ह्यतिदूरवृत्तम् ॥७॥

तद्गच्छ ।

दुर्मु:— हा देवि । (इति निष्क्रांतः)

रामः— हा कष्टमतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः ।

शैशवात्प्रभृति पोषितां प्रियां सौहृदादपृथगाशयामिमाम् ।
छद्मना परिददामि मृत्यवे सौनिको गृहशकुन्तिकामिव ॥ ८ ॥

तत्किमित्यस्पर्शनीयः पातकी देवीं दूषयामि ।

(सीतायाः शिरः स्वैरमुन्नमय्य बाहुमाकर्षन्)

अपूर्वकर्मचाण्डालमयि मुग्धे विमुञ्च माम् ।
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥ ९ ॥

(उत्थाय) हन्त विपर्यस्तः संप्रति जीवलोकः । अद्य पर्यवसितं जीवितप्रयोजनं रामस्य । शून्यमधुना जीर्णारण्यं जगत् । असारः संसारः । कष्टप्रायं शरीरम । अशरणोऽस्मि किं करोमि । का गतिः । क गच्छामि । अथवा—

दुःखसंवेदनायैव रामे चैतन्यमर्पितम् ।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं स्थिरैः ॥ १० ॥

हा अम्ब अरुन्धति । हा भगवन्तौ वशिष्ठविश्वामित्रौ । हा भगवन्पावक । हा देवि भूतधात्रि । हा तात जनक । हा तात । हा मातरः । हा प्रियसख महाराज सुग्रीव । हा सौम्य हनुमन् । हा परमोपकारिन् लङ्काधिपते बिभीषण । हा सखि त्रिजटे । दूषिताः स्थ परिभूताः स्थ रामहतकेन । अथवा को नामाहमेतेषामाह्वाने

ते हि मन्ये महात्मनः कृतघ्नेन दुरात्मना ।
मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥ ११ ॥

योऽहम्

विश्रम्भादुरसि निपत्य लब्धनिद्रा-
मुन्मुच्य प्रियगृहिणीं गृहस्य शोभाम् ।

आतङ्कस्फुरितकठोरगर्भगुर्वीं
क्रव्याद्भयो बलिमिव निर्घृणः क्षिपामि ॥ १२ ॥

(सीतायाः पादौ शिरसि कृत्वा) देवि देवि । अयमपश्चिमस्ते रामस्य शिरसि पादपङ्कजस्पर्शः । (इति रोदिति)

(नेपथ्ये) अब्रह्मण्यम् ।

रामः– ज्ञायतां भोः किमेतत् ।

(पुनर्नेपथ्ये)

ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः ॥ १३ ॥

रामः– आः कथमद्यापि राक्षसत्रासः । तद्यावदस्य दुरात्मनः कुम्भीनसीपुत्रस्य समुन्मूलनाय शत्रुघ्नं प्रेषयामि । (कतिचित्पदानि गत्वा पुनः प्रतिनिवृत्य) हा देवि कथमेवंविधा गमिष्यसि । भगवति वसुन्धरे । श्लाघ्यां दुहितरमवेक्षस्व जानकीम्

जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम् ।
यां देवयजने पुण्ये पुण्यशीलामजीजनः ॥ १४ ॥

(इति निष्क्रान्तः)

सीता– हा सौम्य आर्यपुत्र पुत्रासि । (सहसोत्थाय) धिक । हा धिक् । दुःस्वप्नरणरणकाविप्रलब्धाहमार्यपुत्रमाक्रन्दामि । (सर्वतोऽवलोक्य) हा धिक् । हा धिक् । कथमेकाकिनीं मां प्रसुप्तामुज्झित्वा आर्यपुत्रा गतः । तत् किमिदानीमेतत् । भवतु कोपि-

ष्यामि यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि । कोऽत्र परिजनः । (प्रविश्य)

दुर्मुखः– देवि कुमारलक्ष्मणो विज्ञापयति । सज्जो रथः । आरोहतु देवीति ।

सीता– इयमहमारोहामि । (उत्थाय परिक्रम्य) परिस्फुरितीव मे गर्भगारः । तच्छनैर्गच्छामः ।

दुर्मुख– इत इतो देवी ।

सीता– नमो नमस्तपोधनानां नमो नमो रघुकुलदेवतानां नमो नम आर्यपुत्रचरणकमलानां नमो नमः सकलगुरुजनानाम् ।

Uttararámacharita I.

XV.

S'ûrpanakhá personating Mantharâ.

शूर्पणखा– आवेशितमन्थराशरीरा शूर्पणखाहम् । वशिष्ट-विश्वामित्रगमनेन सुसमाहितम् । अहो एष परशुरामविजयी क्षत्रिय-कुमारो रामः । (निर्वर्ण्य) अहो समग्रसौभाग्यलक्ष्मीपरिग्रहेण लोचनरसायनसौम्यमस्य शरीरनिर्माणम् । इदानीं चिरबालवैधव्यदुःख-प्रभ्रंशितसंसारसौख्यस्यापि जनस्य चारित्रधैर्यसुपूरितं पुनरपि हृदयं परिस्फुरति ।

रामः– (प्राणिपत्य) अयि मन्थरे कुशलमम्बायाः ।

शूर्प.-- सुखं कुशलं च। वत्सलताप्रस्नुतस्तनी मध्यमा ते माता परिष्वज्याज्ञापयति। पुत्रक पुरा प्रतिज्ञातौ द्वौ वरौ महाराजेन ज्ञापयामि। अत्र विज्ञप्तिहारको भवत्येष तातस्य कार्यलेखः।

लक्ष्मणः– (गृहीत्वा वाचयति)

अस्त्वेकेन वरेण वत्सभरतो भोक्ताऽधिराज्यश्रियः।

(स्वगतम्) कथमेतदार्ये तिष्ठति कनिष्ठस्यार्यस्य भरतस्य राज्यप्रार्थनम्। (प्रकाशम्)

यात्वन्येन विहाय कालहरणं रामो वनं दण्डकाम्।

(स्वगतम्) हा अम्ब। किं त्वयार्यगमनवरणेन।

(प्रकाशम्)

तस्यां चीरधरश्चतुर्दश समास्तिष्ठत्वसौ तं पुनः।
सीतालक्ष्मणमात्रकात्परिजनादन्यो न चानुव्रजेत्॥ १ ॥

(स्वगतम्) हा पापे मातृबन्धो

तदा भरतशत्रुघ्नलक्ष्मणार्यमुखैः कृताम्।
अम्बेति व्याहृतिं हित्वा किं कृतं पापया त्वया॥ २ ॥

रामः– अहो प्रसादप्रकर्षः

तत्रैव गमनादेशो यत्र पर्युत्सुकं मनः।
न चैष विरहो जातः स च वत्सो ममानुगः॥ ३ ॥

लक्ष्मणः– दिष्ट्यानुगोदितोऽहमार्येण।

रामः– आर्ये मन्थरे एवं प्रस्थितोऽस्मि।

Mahâvîracharita IV.

XVI.

Advice to a king grieved at thedeath of his beloved queen.

अथ तं सवनाय दीक्षितः प्रणिधानाद्गुरुराश्रमस्थितः ।
अभिषङ्गजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ॥ १ ॥
असमाप्तविधिर्यतो मुनिस्तव विद्वानपि तापकारणम् ।
न भवन्तमुपस्थितः स्वयं प्रकृतौ स्थापयितुं पथश्च्युतम् ॥ २ ॥
मयि तस्य सुवृत्त वर्तते लघुसंदेशपदा सरस्वती ।
शृणु विश्रुतसत्त्वसार तां हृदि चैनामुपधातुमर्हसि ॥ ३ ॥
पुरुषस्य पदेष्वजन्मनः समतीतं च भवच्च भावि च
स हि निष्प्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति ॥ ४ ॥
चरतः किल दुश्चरं तपस्तृणबिन्दोः परिशङ्कितः पुरा ।
प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुराङ्गनाम् ॥ ५ ॥
स तपः प्रतिबन्धमन्युना प्रमुखाविष्कृतचारुविभ्रमाम् ।
अशपद्भव मानुषीति तां शमवेलाप्रलयोर्मिणा भुवि ॥ ६ ॥
भगवन्परवानयं जनः प्रतिकूलाचरितं क्षमस्व मे ।
इति चोपनतां क्षितिस्पृशं कृतवानासुरपुष्पदर्शनात् ॥ ७ ॥
क्रथकैशिकवंशसंभवा तव भूत्वा महिषी चिराय सा ।
उपलब्धवती दिवश्च्युतं विवशा शापनिवृत्तिकारणम् ॥ ८
तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता ।
वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः ॥ ९ ॥

उदये मदवाच्यमुज्झता श्रुतमाविष्कृतमात्मवत्तया ।
मनसस्तदुपस्थिते ज्वरे पुनरक्लीबतया प्रकाश्यताम् ॥ १० ॥
रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते ।
परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम् ॥ ११ ॥
अपशोकमनाः कुटुम्बिनीमनुगृह्णीष्व निवापदात्तिभिः
स्वजनाश्रु किलातिसंततं दहति प्रेतमिति प्रचक्षते ॥ १२ ॥
मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ ॥ १३ ॥
अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् ।
स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ॥ १४ ॥
स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययौ यदा ।
विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् ॥ १५ ॥
न पृथग्जनवच्छुचो वशं वशिनामुत्तम गन्तुमर्हसि ।
द्रुमसानुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः ॥ १६ ॥
स तथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिम् ।
तदलब्धपदं हृदि शोकघने प्रतियातमिवान्तिकमस्य गुरोः ॥ १७ ॥

Raghuvams'a. VIII.

XVII.

An account of Kâdambarî.

महाश्वेताऽब्रवीत् । महाभाग यत्तन्मया कथितममृतसंभवमप्सरसः कुलं तस्मान्मदिरेति नाम्ना मदिरायतेक्षणा कन्यकाऽभूत् । तस्याश्चासौ

सकलगन्धर्वकुलमुकुटकुड्मलपीठप्रतिष्ठितचरणो देवश्चित्ररथः पाणिमग्रहीत् । अपरिमितगुणगणाकृष्टहृदयश्चान्यवनितादुर्लभेनाधःकृताशेषान्तःपुरेण हेमपट्टलाञ्छनेन छत्रचामरचिह्नेन महादेवीशब्देन परं प्रीतः प्रसादमकरोत् । अन्योन्यप्रेमसंवर्धनपरयोश्च तयोर्यौवनसुखानि सेवमानयोः कालेनाश्चर्यभूतमेकजीवितमिव पित्रोरथवा सर्वस्यैव गन्धर्वकुलस्य वा जीवलोकस्य दुहितृरत्नमुदपादि कादम्बरीति नाम्ना । सा च मे जन्मतः प्रभृत्येकासनशयनपानाशना परं प्रेमस्थानमखिलविश्रम्भधाम द्वितीयमिव हृदयं बालमित्रम् । एकत्र तया मया च नृत्यगीतादिकलासु कृताः परिचयाः । शिशुजनोचिताभिश्च क्रीडाभिरनियन्त्रणनिर्भरमपनीतो बालभावः । सा चामुनैव मदीयेन हतवृत्तान्तेन समुपजातशोका निश्चयमकार्षीन्नाहं कथंचिदपि सशोकायां महाश्वेतायामात्मनः पाणिं ग्राहयिष्यामीति सखीजनस्य पुरतः सशपथमभिहितवती । यदि कथमपि मामनिच्छन्तीमपि बलात्तातः कदाचित्कस्मैचिद्दातुमिच्छति तदाहमनशनेन वा हुताशनेन वा रज्ज्वा वा विषेण वा नियतमात्मानमुत्स्रक्ष्यामीति । सर्वं च तदात्मदुहितुः कृतनिश्चयं निश्चलभाषितं कर्णपरम्परया परिजनसकाशाद्गन्धर्वराजश्चित्ररथः स्वयमशृणोत् । गच्छति काले समुपारूढनिर्भरयौवनामालोक्य सुतां बलवदुपतापपरवशः क्षणमपि न धृतिमलभत । एकापत्यतया चातिप्रियतया च न शक्तः किंचिदपि तामभिधातुमित्यपश्यंश्चान्यदुपायान्तरामिदमत्र प्राप्तकालमिति मत्वा तया महादेव्या मदिरया सहावधार्य क्षीरोदनामानं कञ्चुकिनं वत्से महाश्वेते त्वद्व्यतिकरेणैव दग्धहृदयानामिदम-

परमस्माकमुपस्थितमिदानीं तु कादम्बरीमनुनेतुं त्वं शरणमिति संदिश्य मत्समीपमद्यैव प्रत्यूषसि प्रेषितवान् । ततो मया गुरुवचनगौरवेण सखीप्रेम्णा च क्षीरोदेन सार्धं सा तरलिका सखि कादम्बरि किं दुःखितमपि जनमतितरां दुःखयसि जीवन्तीमिच्छसि चेन्मां तत्कुरु गुरुवचनमवितथमिति संदिश्य विसर्जिता । नातिचिरं गतायां च तस्यामनन्तरमेवेमां भूमिमनुप्राप्तो महाभाग इत्यभिधाय तूष्णीमभवत् ।

Kâdambarî.

XVIII.

The duties of a king.

राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
संभवश्च यथा तस्य सिद्धिश्च परमा यथा ॥ १ ॥

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् ॥ २ ॥

अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥ ३ ॥

इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥ ४ ॥

यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥ ५ ॥

तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥ ६ ॥
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥ ७ ॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ ८ ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसंचयम् ॥ ९ ॥
कार्यं सोऽवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः ।
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः ॥ १० ॥
यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ ११ ॥
तं यस्तु द्वेष्टि संमोहात् स विनश्यत्यसंशयम् ।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥ १२ ॥
तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥ १३ ॥
तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ॥ १४ ॥
तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ॥ १५ ॥

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु ॥ १६ ॥
स राजा पुरुषो दण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ॥ १७ ॥
दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥ १८ ॥
समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥ १९ ॥
यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवाक्षिप्य दुर्बलान् बलवत्तराः ॥ २० ॥
अद्यात्काकः पुरोडाशं श्वाऽवलिह्याद्धविस्तथा ।
स्वाम्यं च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरम् ॥ २१ ॥
सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः ।
दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते ॥ २२ ॥
देवदानवगन्धर्वा रक्षांसि पतगोरगाः ।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः ॥ २३ ॥
दुष्येयुः सर्ववर्णाश्च भिद्येरन् सर्वसेतवः ।
सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् ॥ २४ ॥
यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा ।
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ॥ २५ ॥

तस्याहुः संप्रणेतारं राजानं सत्यवादिनम्
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् ॥ २६ ॥

तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्धते ।
कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते ॥ २७ ॥
दण्डो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः ।
धर्माद्विचलितं हन्ति नृपमेव सबान्धवम् ॥ २८ ॥

Manu VII.

XIX.

An address to the Supreme Being.

तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम् ।
अभिजग्मुर्निदाघार्ताश्छायावृक्षमिवाध्वगाः ॥ १ ॥

ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ।
अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ॥ २ ॥

भोगिभोगासनासीनं ददृशुस्तं दिवौकसः ।
तत्फणामण्डलोदार्चिर्मणिद्योतितविग्रहम् ॥ ३ ॥

श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले ।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥ ४ ॥

प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥ ५ ॥

प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा ॥ ६ ॥
मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥ ७ ॥
योगनिद्रान्तविशदैः पावनैरवलोकनैः ।
भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् ॥ ८ ॥
प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ॥ ९ ॥
नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधा स्थितात्मने ॥ १० ॥
रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥ ११ ॥
अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः ।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ॥ १२ ॥
हृदयस्थमनासन्नमकामं त्वां तपस्विनम् ।
दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥ १३ ॥
सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः ।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥ १४ ॥
सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्चिमुखमाचख्युः सप्तलोकैकसंश्रयम् ॥ १५ ॥

चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥ १६ ॥

अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् ।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ॥ १७ ॥

अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥ १८ ॥

शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः
पर्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्तितुम् ॥ १९ ॥

बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः ।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥ २० ॥

त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम् ।
गतिस्त्वं वीतरागाणामभूयः संनिवृत्तये ॥ २१ ॥

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ॥ २२ ॥

केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ॥ २३ ॥

उदधेरिव रत्नानि तेजांसीव विवस्वतः ।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥ २४ ॥

अनवाप्तमवाप्तव्यं न ते किंचन विद्यते ।
लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः ॥ २५ ॥

महिमानं यदुत्कीर्त्य तव संह्रियते वचः ।
श्रमेण तदशक्त्या वा न गुणानामियत्तया ॥ २६ ॥

इति प्रसादयामासुस्ते सुरास्तमधोक्षजम् ।
भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः ॥ २७ ॥

Raghuvams'a X.

XX.

An old minister's advice to a young prince.

अथ सोऽप्याचचक्षे । देव मयापि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यन्नक्लेशार्हः क्वचित्कूपाभ्यासेऽष्टवर्षदेशीयो दृष्टः । स च त्रासगद्गदमगदत् । महाभाग क्लिष्टस्य मे क्रियतामार्य साहाय्यकम् । अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चन्निह कूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः । तमलमस्मि नाहमुद्धर्तुमिति । अथाहमभ्येत्य व्रतत्या कयापि वृद्धमुत्तार्य तं च बालं वंशनालीमुखोद्धृताभिरद्भिः फलैश्च पञ्चषैः शरक्षेपोच्छ्रितस्य लकुचवृक्षस्य शिखरात्पाषाणपतितैः प्रत्यानीतप्रकृतिमापाद्य तरुतलनिषण्णस्तं जरन्तमब्रवम् । तात क एष बालः को वा भवान्कथं चेयमापदापन्नेति । सोऽश्रुयद्गदमगदत् श्रूयतां महाभाग । विदर्भो नाम जनपदः । तस्मिन्भोजवंशभूषणमवतार इव धर्मस्यातिसत्त्वः सत्यवादी वदान्यो विनीतो विनेता प्रजानां रञ्जितभृत्यः कीर्तिमानुदग्रो बुद्धिमूर्तिभ्यामुत्थानशीलः शास्त्रप्रमाणकः शक्यभव्यकल्पारम्भी

संभावयिता बुधान्प्रभावयिता सेवकानुद्भावयिता बन्धून्न्यग्भावयिता शत्रूनसंबद्धप्रलापेष्वदत्तकर्णः कदाचिदप्यवितृष्णो गुणेष्वतिनदीष्णः कलासु नेदिष्ठो धर्मार्थसंहितासु स्वल्पेऽपि सुकृते सुतरां प्रत्युपकर्ता प्रत्यवेक्षिता कोशवाहनयोर्यत्नेन परीक्षिता सर्वाध्यक्षाणामुत्साहयिता कृतकर्मणामनुरूपैर्दानमानैः सद्यः प्रतिकर्ता दैवमानुषीणामापदां षाड्गुण्योपयोगनिपुणो मनुमार्गेण प्रणेता चातुर्वर्ण्यस्य पुण्यश्लोकः पुण्यवर्मा नामासीत् । स पुण्यैः कर्मभिः प्राप्य पुरुष्वायुषं पुनरपुण्येन प्रजानामगण्यतामरेषु । तदनन्तरमनन्तवर्मा नाम तदायतिरवनिमध्यतिष्ठत् । स सर्वगुणैः समृद्धोऽपि दैवाद्दण्डनीत्यां नात्यादृतोऽभूत् । तमेकदा रहसि वसुरक्षितो नाम मन्त्रिवृद्धः पितुरस्य बहुमतः प्रगल्भवागभाषत । तात सर्वैवात्मसंपदभिजनाप्रभृत्यन्यूनैवात्रभवति लक्ष्यते। बुद्धिश्च निसर्गपट्वी कलासु नृत्यगीतादिषु चित्रेषु च काव्यविस्तरेषु प्राप्तविस्तारा तवेतरेभ्यो विशिष्यते । तथाप्यसावप्रतिपद्यात्मसंस्कारमर्थशास्त्रेष्वनग्निसंशोधितेव हेमजातिर्नातिभाति बुद्धिः । बुद्धिहीनो हि भूभृदत्युच्छ्रितोऽपि परैरध्यारुह्यमाणमात्मानं न चेतयते । न च शक्तः साध्यं साधनं वा विभज्य वर्तितुम् । अयथावृत्तश्च कर्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते । न चावज्ञातस्याज्ञा प्रभवति प्रजानां योगक्षेमाराधनाय । अतिक्रान्तशासनाश्च प्रजा यत्किञ्चनवादिन्यो यथाकथंचिद्वर्तिन्यः सर्वाः स्थितीः संकिरेयुः । निर्मर्यादश्च लोको लोकादितोऽमुतश्च स्वामिनमात्मानं च भ्रंशयते । आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा । दिव्यं हि चक्षुर्भूतभवद्भ-

विष्यत्सु व्यवहितविप्रकृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति। तेन हीनः सतोरप्यायतविशालयोर्लोचनयोरन्ध एव जन्तुरर्थदर्शनेष्वसामर्थ्यात्। अतो विहाय बाह्यविद्यास्वभिषङ्गमागमय दण्डनीतिं कुलविद्याम्। तदर्थानुष्ठानेन चावर्जितशक्तिसिद्धिरस्खलितशासनः शाधि चिरमुदधिमेखलामुर्वीमिति।

Dasakumâracharita.

XXI.

Châṇakyâs' soliloquy.

चाणक्य– कथय क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति।

आस्वादितद्विरदशोणितशोणशोभां
संध्यारुणामिव कलां शशलाञ्छनस्य।
जृम्भाविदारितमुखस्य मुखात्स्फुरन्तीं
को हर्तुमिच्छति हरेः परिभूय दंष्ट्राम्॥ १॥

(शिष्योपनीत आसन उपविश्य नाट्येनात्मगतम्) कथं प्रकाशतां गतोऽयमर्थः पौरेषु यथा किल नन्दकुलविनाशजनितरोषो राक्षसः पितृवधामर्षितेन सकलनन्दराज्यपरिपणनप्रोत्साहितेन पर्वतकपुत्रेण मलयकेतुना सह संधाय तदुपगृहीतेन च महता म्लेच्छराजबलेन परिवृतो वृषलमभियोक्तुमुद्यत इति। (विचिन्त्य) अथवा येन मया सर्वलोकप्रकाशं नन्दवंशवधं प्रतिज्ञाय निस्तीर्णा दुस्तरा

प्रतिज्ञासरित्सोऽहमिदानीं प्रकाशीभवन्तमप्येनमर्थं न समर्थः किं प्रशमयितुम् । सोऽहमिदानीमवसितप्रतिज्ञाभारोऽपि वृषलापेक्षया शस्त्रं धारयामि । येन मया भुवो हृदयरोगा इव नव नन्दाः समुत्खाताः सरसि कमलिनीव च मौर्ये लक्ष्मीः स्थिरपदा कृता । अथवा अगृहीते राक्षसे किमुत्खातं नन्दवंशस्य ।क वा स्थैर्यमुत्पादितं चन्द्रगुप्तलक्ष्म्याः । अहो राक्षसस्य नन्दवंशे निरतिशयो भक्तिगुणः । स खलु कस्मिंश्चिदपि जीवति नन्दान्वयावयवे वृषलस्य साचिव्यं ग्राहयितुं न शक्यते । (प्रत्यक्षवदाकाशे लक्ष्यं बध्वा) साधु अमात्य राक्षस साधु । साधु श्रोत्रिय साधु । साधु मन्त्रिबृहस्पते साधु । कुतः

ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते
तं गच्छत्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया ।
भर्तुर्ये प्रलयेऽपि पूर्वसुकृतासङ्गेन निःसङ्गया
भक्त्या कार्यधुरं वहन्ति बहवस्ते दुर्लभास्त्वादृशाः ॥ २ ॥

अत एवास्माकं त्वत्संग्रहे यत्नः कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः स्यादिति । तन्मयाप्यस्मिन्वस्तुनि न शयानेन स्थीयते यथाशक्ति क्रियते तद्ग्रहणं प्रति यत्नः । कथमिव । अत्र तावद्वृषलपर्वतकयोरन्यतरविनाशेनापि चाणक्यस्यापकृतं भवतीति विषकन्यया राक्षसेनास्माकमत्यन्तोपकारी मित्रं घातितस्तपस्वी पर्वतक इति संचारितो जगति जनापवादः । लोकप्रत्ययार्थमस्यैवार्थस्याभिव्यक्तये पिता ते चाणक्येन घातित इति रहसि त्रासयित्वा भागुरायणेनापवाहितः पर्वतकपुत्रो मलयकेतुः । शक्यः खल्वेषु राक्षसमतिपरिगृही-

तोऽपि व्युत्तिष्ठमानः प्रज्ञया निग्रहीतुम् । न पुनरस्य निग्रहात्पर्वतकवधोत्पन्नं राक्षस्यायशः प्रकाशीभवत्प्रमार्ष्टुमिच्छामि । प्रयुक्ताश्च स्वपक्षपरपक्षयोरनुरक्तापरक्तजनजिज्ञासया बहुविधदेशवेषभाषाऽऽचारसंचारवेदिनो नानाव्यञ्जनाः प्रणिधयः । अन्विष्यते च कुसुमपुरवासिनां नन्दामात्यसुहृदां निपुणं प्रचारगतम् । तत्तत्कारणमुत्पाद्य कृतकृत्यतामापादिताश्चन्द्रगुप्तसहोत्थायिनो भद्रभटप्रभृतयः प्रधानपुरुषाः। शत्रुप्रयुक्तानां च तीक्ष्णरसदायिनां प्रतिविधानं प्रत्यप्रमादिनः परीक्षितभक्तयः क्षितिपतिप्रत्यासन्ना नियोजितास्तत्राप्तपुरुषाः । अस्ति चास्माकं सहाध्यायि मित्रमिन्दुशर्मा नाम ब्राह्मणः स चौशनस्यां दण्डनीत्यां चतुःषष्ट्यङ्गे ज्योतिःशास्त्रे च परं प्रावीण्यमुपगतः । स मया क्षपणकलिङ्गधारी नन्दवंशवधप्रतिज्ञानन्तरमेव कुसुमपुरमुपनीय सर्वनन्दामात्यैः सह सख्यं ग्राहितो विशेषतश्च तस्मिन् राक्षसः समुत्पन्नविश्रम्भः । तेनेदानीं महत्प्रयोजनमनुष्ठेयं भविष्यति । तदेवमस्मत्तो न किंचित्परिहास्यते । वृषल एव केवलं प्रधानप्रकृतिष्वस्मास्वारोपितराज्यतन्त्रभारः सततमुदास्ते । अथवा यत्स्वयमभियोगदुःखैरसाधारणैरपाकृतं तदेव राज्यं सुखयति । कुतः

स्वयमाहृत्य भुञ्जाना बलिनोऽपि स्वभावतः ।
गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः ॥ ३ ॥

Mudrârâkshasa I.

XXII.

Sarasvatî cursed by Durvâsas.

पुरा किल भगवान् स्वं लोकमधितिष्ठन् परमेष्ठी विकासिनि पद्मविष्टरे समुपविष्टः शुनासीरप्रमुखैर्गीर्वाणैः परिवृतो ब्रह्मोदिताः कथाः कुर्वन्नन्याश्च निरवद्या विद्यागोष्ठीर्विभावयन् कदाचिदासांचक्रे। तथासीनं च तं त्रिभुवनप्रतीक्ष्यं सर्वे दक्षचाक्षुषप्रभृतयः सप्रजापतयः सर्वे च सप्तर्षिपुरःसरमहामुनयः सिषेविरे। विद्याविसंवादकृताश्च तत्र तेषामन्योन्यस्य विवादाः प्रादुरभूवन्। अथातिरोषणः प्रकृत्या महातपा मुनिरत्रेस्तनयस्तारापतेर्भ्राता नाम्ना द्वितीयेन मन्दुनाम्ना मुनिना सह कलहायमानः साम गायन् क्रोधान्धो विस्वरमकरोत्। सर्वेषु शापभयप्रतिपन्नमौनेषु मुनिषु देवी सरस्वती तच्छ्रुत्वा जहास। दृष्ट्वा तु तां तथा हसन्तीं स मुनिराः पापे दुर्गृहीतविद्यालवावलेपे दुर्विदग्धे मामप्यपहससीत्युक्त्वा कोपतरलिताङ्गुलिना करेणाक्षमालां विक्षिप्य कामण्डेलवेन वारिणा समुपस्पृश्य शापजलं जग्राह।

अत्रान्तरे स्वयंभुवोऽभ्यासे समुपविष्टा देवी सावित्री आः पाप क्रोधोपहत दुरात्मन्नजात्मज्ञ ब्रह्मबन्धो मुनिखेटक कथमात्मस्खलितविलक्षः सकलसुरासुरमुनिमनुजवन्दनीयां त्रिभुवनमातरं सरस्वतीं शप्तुमभिलषसीत्युक्त्वा वृसीमपहाय समुत्तस्थे। ततो मर्षय मर्षय भगवन्नभूमिरेषा शापस्येत्यनुशास्यमानोऽपि तापसैरुपाध्याय स्खलितमेकं क्षमस्वेति बद्धाञ्जलिपुटैः प्रसाध्यमानोऽपि शिष्यैः पुत्र मा कृथास्तपसः प्रत्यूहमिति निवार्यमाणोऽप्यत्रिणा रोषावेशविवशो दुर्वासा दुर्विनीते

व्यपनयामि ते विद्यालवावलेपविशेषजनितामुन्नतिमधस्ताद्गच्छ मर्त्यलोकमित्युक्त्वा तच्छापोदकं विससर्ज । ततः प्रतिशापदानोद्यतां च सावित्रीं सखि संहर क्रोधं संस्तुतमतयोऽपि जात्यैव द्विजन्मानो माननीया इत्यभिदधाना सरस्वत्येनां न्यवारयत् । अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा पितामहः सधीरमुवाच । ब्रह्मन्न खलु साधुसेवितोऽयं पन्था येनासि प्रवृत्तः । पुरस्तादुद्दामप्रसृतेन्द्रियवाजिसमुत्थापितं रजः कलुषयति दृष्टिमनक्षजिताम् । कियद्दूरं वा चक्षुरीक्षते । विशुद्धया धिया पश्यन्ति कृतबुद्धयः सर्वानसतः सतो वा । निसर्गविरोधिनी चेयं पयःपावकयोरिव एकत्र धर्मक्रोधयोर्वृत्तिः । आलोकमपहाय कथं तमसि निमज्जसि । क्षमा हि मूलं सर्वतपसाम् । परदोषदर्शनदक्षा दृष्टिरिव कुपिता न ते बुद्धिरात्मनो दोषान्पश्यति । क्व महातपोभारवैषयिकता क्व पुरोभागित्वम् । अतिरोषणश्चक्षुष्मानपि अन्ध एवाजनि । न हि खलु कोपकलुषिता विमृशति मतिः कर्तव्यमकर्तव्यं वा । कुपितस्य हि प्रथमान्धकारिणी भवति विद्या ततो भ्रुकुटी । आदाविन्द्रियाणि रागः समास्कन्दति चरमं चक्षुः । आरम्भ तपो गलति पश्चात् स्वेदसलिलम् । पूर्वमयशः स्फुरति अनन्तरमधरः । कथं च ते विषपादपस्येव लोकविनाशाय वल्कलानि जातानि । अनुचिता खल्वस्य मुनिवेषस्य हारयष्टिरिव वृत्तमुक्ता चित्तवृत्तिः । शैलूष इव वृथा वहसि कृत्रिमोपशमम् । अनेनापि लघिम्ना चाद्याप्युपर्येव प्लवसे ज्ञानोदन्वतः । न खल्वेडमूकाक्षा एडा जडा वा सर्व एते महर्षयः । रोषदोषनिषेव्ये स्वहृदये निग्राह्ये किमर्थमसि निगृहीतवाननागसं सर-

स्वतीम् । एतानि तान्यात्मस्खलितवैलक्ष्याणि यैर्याति वाच्यतामविदग्धो जनः । इत्युक्त्वा पुनराह । भद्रे सरस्वति मा गा विषादम् । एषा त्वामनुयास्यति सावित्री । विनोदयिष्यति चास्मद्विरहितां त्वाम् । आत्मजमुखकमलावलोकनावधिश्च ते शापोऽयं भविष्यतीत्यभिधाय विसर्जितसुरमुनिमण्डलः समुचिताह्निककरणायोदतिष्ठत् । सरस्वत्यपि शप्ता किंचिदधोमुखी सह सावित्र्या गृहमगात् ।

Harshacharita.

XXIII.

Miscellaneous verses.

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षर ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥ १ ॥

अर्थातुराणां न गुरुर्न बन्धुः कामातुराणां न भयं न लज्जा ।
विद्यातुराणां न सुखं न निद्रा क्षुधातुराणां न रुचिर्न वेला ॥ २ ॥

कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रणिधीयते
न स विरौति न चापि स शोभते भवति योजयितुर्वचनीयता ॥ ३ ॥

निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशतां वाञ्छति ।
चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्राह्मं पदं वाञ्छति

ब्रह्मा शैवपदं शिवो हरिपदमाशावधिं को गतः ॥ ४ ॥
यथा चतुर्भिः कनकं परीक्ष्यते निर्घर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन कुलेन कर्मणा ॥ ५ ॥
यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥ ६ ॥
स हि गगनविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुरपि विधियोगाद् ग्रस्यते राहुणाऽसौ
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥ ७ ॥
अहमेव गुरुः सुदारुणानामिति हालाहल मास्म तात दृप्यः ।
ननु संति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम् ॥ ८ ॥
गुणालयोप्यसन्मन्त्री नृपतिर्नाऽधिगम्यते ।
प्रसन्नस्वादुसलिलो दुष्टग्राहो यथा ह्रदः ॥ ९ ॥
उदयति यदि भानुः पश्चिमे दिग्विभागे
विकसति यदि पद्मं पर्वतानां शिखाग्रे ।
प्रचलति यदि मेरुः शीततां याति वह्नि-
र्न चलति खलु वाक्यं सज्जनानां कदाचित् ॥ १० ॥
उपेक्षितः क्षीणबलोऽपि शत्रुः प्रमाददोषात्पुरुषैर्मदान्धैः ।
साध्योऽपि भूत्वा प्रथमं ततोऽसावसाध्यतां व्याधिरिव प्रयाति ॥ ११ ॥
गुणवदगुणवद्वा कुर्वता कार्यमादौ
परिणतिरवधार्या यत्नतः पण्डितेन ।

अतिरभसकृतानां कर्मणामाविपत्ते-
  र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ १२ ॥

वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः
  पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः ।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टश्रियं मन्त्रिणः
  सर्वः कार्यवशाज्जनोऽभिरमते कस्यास्ति को वल्लभः ॥१३॥

सदादानः परिक्षीणः शस्त एव करीश्वरः ।
अदानः पीनगात्रोऽपि निंद्य एव हि गर्दभः ॥ १४ ॥

मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः ।
उन्मार्गे वाच्यतां यान्ति महामात्राः समीपगाः ॥ १५ ॥

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा
ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥ १६ ॥

हे राजानस्त्यजत सुकविप्रेमबन्धे विरोधं
शुद्धा कीर्तिः स्फुरति भवतां नूनमेतत्प्रसादात् ।
तुष्टैर्बद्धं तदलघु रघुस्वामिनः सच्चरित्रं
क्रुद्धैर्नीतस्त्रिभुवनजयी हास्यमार्गं दशास्यः ॥ १७ ॥

  वार्ता च कौतुकवती विमला च विद्या
    लोकोत्तरः परिमलश्च कुरङ्गनाभेः ।

तैलस्य बिन्दुरिव वारिणि दुर्निवार-
मेतत्त्रयं प्रसरति स्वयमेव लोके ॥ १८ ॥

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणं
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥ १९ ॥

को न याति वशं लोके मुखे पिण्डेन पूरितः
मृदङ्गो मुखलेपेन करोति मधुरध्वनिम् ॥ २० ॥

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ २१ ॥

अन्यस्माल्लब्धपदो नीचः प्रायेण दुःसहो भवति ।
रविरपि न दहति तादृग्यादृग्दहति वालुकानिकरः ॥ २२ ॥

क्वचिद्वीणावाद्यं क्वचिदपि च हाहेति रुदितं
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः ।
क्वचिद्रामा रम्या क्वचिदपि जराजर्जरतनु-
र्न जाने संसारः किममृतमयः किं विषमयः ॥ २३ ॥

कौशेयं कृमिजं सुवर्णमुपलाद् दूर्वापि गोरोमतः
पङ्कात्तामरसं शशाङ्क उदधेरिन्दीवरं गोमयात् ।

काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना
प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना ॥२४॥
बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥ २५ ॥

तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचैः प्रणतानि सर्वतः ।
स्वभाव एवोन्नतचेतसामयं महान्महत्स्वेव करोति विक्रमम् ॥२६॥

गुणायन्ते दोषाः सुजनवदने दुर्जनमुखे
गुणा दोषायन्ते किमिति जगतां विस्मयपदम् ।
यथा जीमूतोऽयं लवणजलधेर्वारि मधुरं
फणी पीत्वा क्षीरं वमति गरलं दुःसहतरम् ॥ २७ ॥

दलति हृदयं गाढोद्वेगं द्विधा न तु भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥ २८ ॥

यस्मिन्कुले यः पुरुषः प्रधानः स सर्वयत्नैः परिरक्षणीयः
तस्मिन् विनष्टे स्वकुलं विनष्टं न नाभिभङ्गे ह्यरका वहन्ति ॥२९॥

इक्षोरग्रात्क्रमशः पर्वणि पर्वणि यथा विशेषः ।
तद्वत्सज्जनमैत्री विपरीतानां च विपरीता ॥ ३० ॥

क्षते प्रहारा निपतन्त्यभीक्ष्णं धनक्षये वर्धति जाठराग्निः ।
आपत्सु वैराणि समुद्भवन्ति छिद्रेष्वनर्था बहुलीभवन्ति ॥३१॥

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥३२॥

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुदण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं
न प्राणान्ते प्रकृतिविकृतिर्जायते ह्युत्तमानाम् ॥ ३३ ॥

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनु-
र्नरः संसारान्ते विशति यमधानीजवनिकाम् ॥ ३४ ॥

प्रतिपक्षेणापि पतिं सेवन्ते भर्तृवत्सलाः साध्व्यः ।
अन्यसरितां शतानि हि समुद्रगाः प्रापयन्त्यब्धिम् ॥ ३५ ॥

उदयमयते दिङ्मालिन्यं निराकुरुतेतरां
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।
रचयतितरां स्वैराचारप्रवर्तनकर्तनं
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥ ३६ ॥

गङ्गेवाघविनाशिनी जनमनःसन्तोषवच्चन्द्रिका
तीक्ष्णांशोरपि सत्प्रभेव जगदज्ञानान्धकारापहा ।
छायेवाखिलतापनाशनकरी स्वर्धेनुवत्कामदा
पुण्यैरेव हि लभ्यते सुकृतिभिः सत्संगतिर्दुर्लभा ॥ ३७ ॥

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः ॥ ३८ ॥

बहिः सर्वाकारप्रगुणरमणीयं व्यवहरन्
पराभ्यूहस्थानान्यपि तनुतराणि स्थगयति ।
जनं विद्वानेकः सकलमभिसन्धाय कपटै-
स्तटस्थः स्वानर्थान्घटयति च मौनं च भजते ॥ ३९ ॥

किं कापि प्रलयानलैर्विटपिनो निर्दह्य भस्मीकृताः
किंस्विद्दैवगजेन पङ्कजवनं निष्कन्दमुन्मूलितम् ।
किं वा हन्त कृतान्तकेसरिभयात्त्यक्तो मदः कुञ्जरै-
र्येनास्मिन् विरसे करीरकुसुमे हा भृङ्ग विश्राम्यसि ॥ ४० ॥

इहानेके सत्यं सततमुपकारिण्युपकृतिं
कृतज्ञाः कुर्वन्तो जगति नित्रसन्त्येव सुधियः ।
कियन्तस्ते सन्तः सुकृतपरिपाकप्रणयिनो
विना स्वार्थं येषां भवति परकृत्यव्यसनिता ॥ ४१ ॥

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरा प्रकटितप्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥ ४२ ॥

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नालिकेरा नराणाम् ।

उदकममृतकल्पं दद्युराजीवितान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति ॥ ४३ ॥

मज्जन्तोऽपि विपत्पयोधिगहने निःशङ्कधैर्यावृताः
कुर्वन्त्येव परोपकारमनिशं सन्तो यथाशक्ति वै ।
राहोरुग्रकरालवक्त्रकुहरग्रासाऽभिभूतोप्यलं
चन्द्रः किं न जनं करोति सुखिनं ग्रासावशेषैः करैः ॥ ४४ ॥

अतिमलिने कर्तव्ये भवति खलानामतीव निपुणा धीः ।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते दृष्टिः ॥ ४५ ॥

गुणिनामपि निजरूपप्रतिपत्तिः परत एव संभवति ।
स्वमहिमदर्शनमक्ष्णोर्मुकुरतले जायते यस्मात् ॥ ४६ ॥

दीनानां कल्पवृक्षः स्वगुणफलनतः सज्जनानां कुटुम्बी
आदर्शः शिक्षितानां सुचरितनिकषः शीलवेलासमुद्रः ।
सत्कर्ता नावमन्ता पुरुषगुणनिधिर्दक्षिणोदारसत्त्वो
ह्येकः श्लाघ्यः स जीवत्यधिकगुणतया चोच्छ्वसन्तीव चान्ये ॥ ४७ ॥

चाञ्चल्यमुच्चैःश्रवसस्तुरङ्गात्कौटिल्यमिन्दोर्विषतो विमोहः ।
इति श्रियाऽशिक्षि सहोदरेभ्यो जाने न कस्माद्गुणवद्विरोधः ॥ ४८ ॥

गन्धाढ्यां नवमल्लिकां मधुकरस्त्यक्त्वा गतो यूथिकां
तां दृष्ट्वाशु गतः स चन्दनवनं पश्चात्सरोजं गतः ।
बद्धस्तत्र निशाकरेण सहसा रोदित्यसौ मन्दधीः
संतोषेण विना पराभवपदं प्राप्नोति सर्वो जनः ॥ ४९ ॥

स पुमानर्थवज्जन्मा यस्य नाम्नि पुरः स्थिते ।
नान्यामङ्गुलिमभ्येति संख्यायामुद्यताङ्गुलिः ॥ ५० ॥

भजते विदेशमधिकेन जितस्तदनुप्रवेशमथवा कुशलः ।
मुखमिन्दुरुज्ज्वलकपोलमतः प्रतिमाच्छलेन सुदृशामविशत् ॥ ५१ ॥

बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
संभूयाम्भोधिमभ्येति महानद्या नगापगा ॥ ५२ ॥

भयं तावत्सेव्यादभिनिविशते सेवकजनं
ततः प्रत्यासन्नाद्भवति हृदये चैव निहितम् ।
ततोऽध्यारूढानां पदमसुजनद्वेषजननं
गतिः सोच्छ्रायाणां पतनमनुकूलं कलयति ॥ ५३ ॥

भेतव्यं नृपतेस्ततः सचिवतो राज्ञस्ततो वल्लभा-
दन्येभ्यश्च वसन्ति येऽस्य भवने लब्धप्रसादा विटाः ।
दैन्यादुन्मुखदर्शनापलपनैः पिण्डार्थमायस्यतः
सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः ॥ ५४ ॥

दोषाकरोऽपि कुटिलोऽपि कलङ्कितोऽपि
मित्रावसानसमये विहितोदयोऽपि ।
चन्द्रस्तथापि हरवल्लभतामुपैति नैवाश्रितेषु
महतां गुणदोषशङ्का ॥ ५५ ॥

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।

इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ ५६ ॥

मृद्घटवत्सुखभेद्यो दुःसंधनाश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्याश्वाशुसंधेयः ॥ ५७ ॥

पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रान्तं येन क्षपिततमसा मध्यमं धाम विष्णोः ।
सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखै-
रत्यारूढिर्भवति महतामप्यपभ्रंशनिष्ठा ॥ ५८ ॥

गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥५९॥

कुमुदशबलैः फुल्लाम्भोजैः सरोभिरलंकृतां
मरकतमपिश्यामां शष्पैर्विहाय वनस्थलीम् ।
स्मरति करभो यद् वृक्षाणां चरन्मरुधन्वनां
परिचयरतिः सा दुर्वारा न सा गुणवैरिता ॥ ६० ॥

आपुष्पप्रसवान्मनोहरतया विश्वास्य विश्वं जनं
हंहो दाडिम तावदेव सहसे वृद्धिं स्वकीयामिह ।
यावन्नैति परोपभोगसहतामेषा ततस्तां तथा
ज्ञात्वा ते त्वदयं द्विधा दलति यत्तेनातिवन्द्यो भवान् ॥ ६१ ॥

अगुरुरिति वदतु लोको गौरवमत्रैव पुनरहं मन्ये ।
दर्शितगुणैव वृत्तिर्यस्य जने जनितदाहेऽपि ॥ ६२ ॥

भानुः सकृद्युक्ततुरङ्ग एव रात्रिंदिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥ ६३ ॥
हस्त इव भूतिमलिनो यथा यथा लङ्घयति खलः सुजनम् ।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥ ६४ ॥
शमयति गजानन्यान्गन्धद्विपः कलभोऽपि सन्
भवति सुतरां वेगोदग्रं भुजंगशिशोर्विषम् ।
भुवमधिपतिर्बालावस्थोऽप्यलं परिरक्षितुं
न खलु वयसा जात्यैवायं स्वकार्यसहो भरः ॥ ६५ ॥
सृजति तावदशेषगुणाकरं पुरुषरत्नमलङ्करणं भुवः ।
तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः ॥ ६६ ॥
धवलयति समग्रं चन्द्रमा जीवलोकं
किमिति निजकलङ्कं नात्मसंस्थं प्रमार्ष्टि ।
भवति विदितमेतत्प्रायशः सज्जनानां
परहितनिरतानामादरो नात्मकार्ये ॥ ६७ ॥
केनादिष्टौ कमलकुमुदोन्मीलने पुष्पवन्तौ
विश्वं तोयैः स्नपयितुमसौ केन वा वारिवाहः ।
विश्वानन्दोपचयचतुरो दुर्जनानां दुरापः
श्लाघ्यो लोके जयति महतामुज्ज्वलोऽयं निसर्गः ॥ ६८ ॥

NOTES.

I.

रात्रावपि this very night. यस्यास्ति सर्वत्र गतिः he who has access everywhere, i. e. he who can go anywhere. कस्मात् why.

तद्यद्यायुःक्षयोऽस्ति if therefore, life is to end, i. e. if we are destined to die.

तिष्ठति lives, remains alive. कृतप्रयत्नोऽपि. (कृतः प्रयत्नः यस्मै and not येन) though efforts be made for him ; though well taken care of सुखं adv. happily.

II.

उद्धृत्य having spared. विश्वासमुत्पाद्य having created confidence in him with respect to me. व्यवहार conduct, character.

